SUBHASHITA RATNÁKARA

A

COLLECTION OF WITTY AND EPIGRAMMATIC SAYINGS IN SANSKRIT

COMPILED AND EDITED WITH EXPLANATORY NOTES

BY

KRISHNA SHÁSTRI BHÁTAVADEKAR

BOMBAY

PRINTED AT GANPAT KRISHNAJI'S PRESS

BY

NARO KRISHNA DUMALE BY ORDER OF THE EXECUTORS.

1872

श्रीः

सुभाषित रत्नाकरः

अयंच

ग्रंथः

नानाविधसुभाषितग्रंथाधारेण

विद्वज्जनमनोविनोदाय

धुंडिराज सूरि सूनुना भाटवडेकराभिधेन

कृष्ण शास्त्रिणा

विरचितः

सच

मुंबापुर्यां,

गणपति कृष्णाख्यस्य मुद्रायंत्रागारे इक्झिक्युटरसाख्याधिकारिनियुक्त

ह्मिालोपाव्ह नारोकृष्णशर्मणा मुद्रितः

॥ सुभाषितेनगीतेन [illegible]ांचलीलया ॥

॥ मनोनभिद्यतेयस्य सयोगीह्यथवापशुः ॥ १ ॥

शकाब्दाः १७९३

सनाब्दाः १८७२

५७

TO

J. B. PEILE ESQUIRE M. A.

BOMBAY CIVIL SERVICE,

DIRECTOR OF PUBLIC INSTRUCTION

IN THE

BOMBAY PRESIDENCY,

THIS LITTLE WORK

IS

DEDICATED

(WITH PERMISSION)

AS A TOKEN OF RESPECT

BY

HIS HUMBLE SERVANT,

THE COMPILER.

PREFACE.

If there is a language on the surface of the earth, dead or living, which may preeminently deserve, by its compressibility of thought, richness of expression, and euphony of words, to be entitled the Language of Poets, it is undoubtedly Sanskrit The Sanskrit writers cultivated poetry to such an extent, that every work, whether on the philosophy of the soul or on the composition of a cement, on a battle deciding the fate of the country for a thousand years to come and shedding the blood of millions of human beings, or on the prosaic sacrifice of an animal offered to appease the hungry demons or the reluctant gods, came to be written in verse Logic and grammar no less than the art and science of medicine were thought worthy of being written in verse. Shortness and capability of being easily committed to memory were the chief objects in preferring verse to prose as regards the subjects for which poetry as such had no sympathy. But real poetry was by no means neglected and among other kinds, epigrammatic poetry received special attention. The Panchatantra is full of short epigrams on all possible topics relating to humanity viewed in all possible aspects Thousands of couplets and stanzas embodying in the most laconic style the choicest thoughts of serious as well as humorous minds are floating on the surface of what is called learned conversation among our country-men, and a man is not considered learned, and perhaps rightly, unless he is able to repeat some celebrated saying of a poet or a dramatist illustrating either side of a question that may form the subject of conversation in which he is taking part. And though very few of these popular sayings can be verified as the productions of known authors, they are nevertheless greedily learnt by heart by the generality of shastris, and may be heard repeated by them in the course of their conversation. As they are very generally used among the well informed and well read of the passing generation

of shastris, they may freely be described as containing a faithful reflection of the modes of thought and of the sentiments of the Indian mind busy in a civilization that is now in a state of transition. Not infrequently these epigrammatic pieces serve as authorities with the ignorant classes, to whom every thing written in the sacred tongue has the authority of the shastras.

It is trusted that what is said above will be sufficient excuse for placing before the public the following collection of *Subhashitas*. The collection is arranged under various heads and sometimes sayings both praising and censuring a custom or a state of things are separately given. It is one of the characteristics of the Subhâshita poetry that, coming as it does from various hands, it is both one sided and exhaustive,—one sided when viewed only in parts, and exhaustive when viewed as a whole. The reader will doubtless remember the satakas of Bhartrihari, who writing in praise of the pleasures of the company of young women will raise them to the highest heaven; but speaking of indifference to the pleasures of the world will almost in the same breath send his angels to the lowest depth of Bottomless Perdition. The same may be said of the epigrammatic verses of the Panchatantra, the interlocutors in which are never at a loss to support their conflicting views by authoritative verses either quoted from old writers or composed for the occasion by the author. Both sides of every subject touched by the Subhâshitas are well, some-times perhaps too well, illustrated, and the truth always lies between the extremes.

So far as possible the verses have been referred in the Index to their sources, and it is hoped the Index will also prove useful in other respects.

It would probably have been better if the text had been printed in the present edition with the words separated from one another. But the suggestion came too late to be carried out, and it is not very necessary for persons who have been accustomed to read old native editions of Sanskrit works.

प्रस्तावना.

स्मृत्वेश्वरंबहुविधान् ग्रंथानालोक्ययत्नतः ॥
सुभाषितानांपद्यानां संग्रहःक्रियतेऽधुना ॥ १ ॥
भाषासुमुख्यामधुरा दिव्यागीर्वाणभारती ॥
तत्राऽपिकाव्यंमधुरं तत्रापिचसुभाषितं ॥ २ ॥
प्राचीनैःकविभिःकृताःसुवचनाग्रंथाअनेकेभुवि
सर्वेषांपरिशीलनंनघटतेकार्यानुरोधादतः ॥
तेभ्यःसंप्रतिसागरादिवसुधामुद्धृत्यसारंमया
न्यस्तंसुज्ञजनायतोहिरसिकागृह्णंतुचैतन्मुदा ॥ ३ ॥
ननवीनंमाक्सिद्धं युष्माकंदत्तमेवयुष्मभ्यं ॥
भांडारस्थंभृत्यो यथानृपायाऽर्पयत्यलंकारं ॥ ४ ॥
निर्मातिनोयद्यपिमालिकोवै नवानिपुष्पाणिमनोहराणि ॥
करोतिमालांप्रविचित्यतानि ससाधुनायाभवतीहपात्रं ॥ ५ ॥
खिन्नत्वेऽपिसुभाषितेनरमतेस्वीयंमनःसर्वदा
श्रुत्वाऽन्यस्यसुभाषितंखलुमनःश्रोतुंपुनर्वांछति ॥
अज्ञानज्ञानवतोऽप्यनेनहिवशीकर्तुंसमर्थोभवेत्
कर्तव्योहिसुभाषितस्यमनुजैरावश्यकःसंग्रहः ॥ ६ ॥

अस्मिन् भारते वर्षे पुरा खलु वेदशास्त्रपुराणेतिहासादिविविध विद्यासंपन्नाँ बहवो विद्वांसोऽभूवन्. तत्समये भोजविक्रमादयो विद्यागुणग्राहिणो महीपालाः स्वयशःशुभ्रांशुकौमुदीधवलितदिक्चक्रवालाआसन्. तेचतान् विदुषो दानमानसत्कारैर्यथोचितं पूजयांचक्रुः. एवमाश्रयबलेनोत्तेजिताः कालिदासभवभूतिजगन्नाथप्रभृतयः कवयः स्वबुद्धिकौशलेन गीर्वाणवाण्यां सुरसकाव्यनाटकचंपुभाणादीन् गद्यपद्यग्रथितानतीव मनोहरान् ग्रंथान् व्यदधुः. परंतु तदर्वाक् केचित्कालपर्यंतं वेदादिविद्याःपठनपाठनादिसंप्रदायस्यातिकार्श्येन सकल गीर्वाणविद्यामार्तंडोऽस्तंगत इवासीत्.

अधुनाचेदं भारतवर्षमांग्लसत्ताकं जातं. तेपि नाना विद्या

अनुक्रमणिका

सुभाषित प्रशंसा

॥ श्रीगणेशंवंदे ॥

सुभाषितेनगीतेन युवतीनांचलीलया ॥
मनोनभिद्यतेयस्य सयोगीह्यथवापशुः ॥ १ ॥
सुभाषितमयद्रव्य संग्रहंनकरोतियः ॥
प्रस्तावयज्ञसंप्रामे कांप्रदास्यतिदक्षिणां ॥ २ ॥
संसारकटुवृक्षस्य द्वेफलेह्यमृतोपमे ॥
सुभाषितरसास्वादः संगतिःसुजनेजने ॥ ३ ॥
सुभाषितरसास्वाद जातरोमांचकंचुकाः ॥
विनापिकामिनीसंगं कवयःसुखमासते ॥ ४ ॥
प्रस्तावेहेतुयुक्तानि यःपठत्यविशंकितः ॥
सकविस्तानिकाव्यानि काव्येतस्यपरिश्रमः ॥ ५ ॥
पृथिव्यांत्रीणिरत्नानि जलमन्नंसुभाषितं ॥
मूढैःपाषाणखंडेषु रत्नसंज्ञाविधीयते ॥ ६ ॥
यस्यवक्त्रकुहरे[1]सुभाषितं नास्तिनाप्यवसरेप्रजल्पति ॥
आगतःसदसिधीमतामसौ लेप्य[2]निर्मितइवावभासते ॥७॥
धर्मोयशोनयोदाक्ष्यं मनोहारिसुभाषितं ॥
इत्यादिगुणरत्नानां संग्रहीनावसीदति ॥ ८ ॥
बोद्धारोमत्सरग्रस्ताः प्रभवःस्मयदूषिताः ॥
अबोधोपहताश्चान्ये जीर्णमंगेसुभाषितं ॥ ९ ॥
प्रसन्नाः[3]कांतिहारिण्यो[4] नानाश्लेष[5]विचक्षणाः ॥
भवंतिकस्यचित्पुण्यैः मुखेवाचोगृहेस्त्रियः ॥ १० ॥
नायंप्रयातिविकृतिं[6]विरसोनयःस्या न्नक्षीयतेबहुजनैर्नितरांनिपीतः ॥

---

१ कुहरे बिले. २ लेप्यःपंकस्तेननिर्मितोरचितः ३ प्रसन्नाः प्रसन्नवदनाः पक्षे उत्तानार्थाः ४ कांत्याशोभयामनोहारिण्यः पक्षे भाषणगुणेनमनोहारिण्यः ५ नानाश्ले० आश्लेषः आलिंगनं पक्षे श्लेषः ६ विकृतिंविकारं

गंडोड्डीनालिमालामुखरितककुभस्तांडवेशूलपाणे
वैनायक्यश्चिरंवोवदनविधुतयःपांतुचीत्कारवत्यः ॥८॥

शिव

श्री० ॥ पाणिग्रहेपुलकितं वपुरैशंभूतिभूषितंजयति ॥
अंकुरितइवमनोभूर्यस्मिनभस्मावशेषोपि ॥ १ ॥
पार्वतीफणिबालेंदु भस्ममंदाकिनीयुता ॥
पवर्गरचितामूर्ति रपवर्गप्रदायिनी ॥ २ ॥
जातोजडप्रसंगा द्विस्मारयतिभ्रमोयमात्मानं ॥
शुभमधुनाद्रिरसेनच सुरैसंसेव्यंभजस्वचंडीशं ॥ ३ ॥
वामांगीकृतवामांगि कुंडलीकृतकुंडलि ॥
आविरस्तुपुरोवस्तु भूतिभृत्यंबरांबरं ॥ ४ ॥
कस्त्वंशूलीमृगयभिषजंनीलकंठःप्रियेहं
केकामेकांकुरुपशुपतिर्नैवदृष्टेविषाणे ॥
स्थाणुर्मुग्धेनवदतितरुर्जीवितेशःशिवाया
गच्छाटव्यमितिवचनजडःपातुवश्चंद्रचूडः ॥ ५ ॥
केयंमूर्ध्न्यंधकारेतिमिरमिहकुतःसुभ्रुकांतेंदुयुक्ते
कांताप्यत्रास्तिकाचिन्ननुभवतुमयापृष्टमेतावदेव ॥
नाहंद्वंद्वंकरोमीत्यपनयशिरसस्तूर्णमेनामिदानी
मित्थंमांक्तोभवान्यामतिवचनजितःपातुवश्चंद्रचूडः ॥६॥
गौरीशपत्रोनगजार्तिहारी कुमारतातः शशिखंडमौलिः ॥

१ तांडवेनृत्ये. २ वद० वदनकंपनानि. ३ परिणये. ४ संजातपुलकं. ५ भूत्या-भस्मनाशोभितं. ६ मदनः ७ अपवर्गोमोक्ष ८ जडंविश्वं. पक्षे डलयोःसावर्ण्यात्जु-लप्रसंगात् ९ भ्रमःरज्जौसर्पभ्रांतिः पक्षे चक्रारूढस्येवावस्था. १० भक्तिरसेन. पक्षे शृंग-वेररसेन ११ सुरैःदेवैःसंसेव्यः पक्षे सुरसंशोभनरसं. सेव्यं सेवनार्हं. १२ उमापतिं पक्षे चंडीशनामानरसं. १३ स्त्री. १४ सर्पः १५ दिगंबरं १६ त्रिशूली पक्षे शूलरो-गवान् १७ नी० पक्षे मयूरः १८ मयूरवाणी. १९ कोर्णु. २० गवीशोवृषःपत्रंवाहनंयस्य. पक्षे वीशोगरुडः २१ नगजापार्वतीतस्यादुःखनाशकः पक्षे गजेंद्रपीडानाशकः २२ का-र्तिकेयपिता. पक्षे मारोमदनस्तत्पिता. २३ शशिखंडोमौलौयस्य पक्षे शिखंडमौलिः

लंकेशसंपूजितपादपद्मः पायादनादिः परमेश्वरोनः ॥ ७ ॥
द्विजराजशेखरोय वृषमारूढःसदासदारस्त्वं ॥
चक्रेहरतद्विधिना पुनरुपनयनंललाटघटितंते ॥ ८ ॥

कृष्ण.

श्रीः ॥ देवःपायात्पयसिविमलेयामुनेमज्जतीनां
याचंतीनामनुनयपदैर्वंचितान्यंशुकानि ॥
लज्जालोलैरलसवलितैरुन्मिषत्पंचबाणै
र्गोपस्त्रीणांनयनकुसुमैरंचितःकेशवोनः ॥ १ ॥
संपन्नरमणीशील संपन्नरमणींविना ॥
इत्यूढवान्नरमणी रमणींरुक्मिणींहरिः ॥ २ ॥
भवान्हिभगवानेव गेनाभेदःपरस्परं ॥
महत्यागदयायुक्तः सत्यभामासमन्वितः ॥ ३ ॥
अंवेमव्यापाराकलनमतुरीस्पर्शमचिरा
दनुन्मीलत्तंतुमकरघटनायासमसकृत् ॥
विषीदत्पांचालीविपदपनयैकमणयिनः
पटानांनिर्माणंपतगपतिकेतोरवतुनः ॥ ४ ॥
भ्रमयतिभवेंपित्तंचेत् भजभजनरसूतशेखरंकृष्णं ॥

---

१ लंकेशोरावणः पक्षे कोब्रह्मा, ईशः शिवः २ नविद्यतेआदिर्यस्यसःअनादिः पक्षे आद्यक्षरशून्यः यथा बीशपत्रः गजार्तिहारीइत्यादि. ३ परमेश्वरःशिव, रमेश्वरः विष्णुः ४ द्विजराजश्चंद्रःभूषणंयस्य, पक्षे ब्राह्मणश्रेष्ठः ५ सदारःसस्त्रीकः ६ पुनर्मौंजीबंधनं पक्षे द्वयोर्नयनयोःसमीपवार्तितृतीयंनेत्र. ७ निर्मले ८ स्नानंकुर्वतीनां. ९ शीलसंपन्नरमणींबिना संपत् रमणी नास्ति इति हेतोः १० गकारेणभेदः ११ महतीयागदातयायुक्तः पक्षे महःउत्सवः त्यागोदान दयाकरुणा एतैर्युक्तः १२ सत्यभामया समन्वितः पक्षे सत्यंसूनृतं भाकांतिः मालक्ष्मीः आभिः सम्यग्युक्तः. १३ वेमा प्राकृते 'धोटें' इत्युच्यते तद्व्यापाररहितं १४ तुरी प्रा० 'तुरई' इत्युच्यते तत्स्पर्शबिना. १५ भवःसंसारःसएवपित्तं भ्रमोत्पादकत्वात्. १६ सूतेषुशेखरंश्रेष्ठं. पक्षे सूतशेखरनामानंरसं. पित्तशामकोहिसूतशेखरइतिप्रसिद्धिः १७ कृष्णं कृष्णनामानंदेवं पक्षे वर्णतःकृष्ण.

सैद्धोरसेनसहंसित मनुंनृटिकंसर्वथान्यजसेह ॥ ५ ॥
अंधंतमश्चेदयिबाधतेत्वां सरोजनेत्रंजगदेकसूत्रं ॥
सुधाचरित्रंपरमंपवित्रं कुरुष्वमित्रंवसुदेवपुत्रं ॥ ६ ॥

द्वाविहदृष्टौसृष्टौ दुस्तरसंसृतितरंगिणीतरणे ॥
उडुपकुलपतिःकृष्णः श्रीरामस्तरणिकुलपतिश्चान्यः ॥ ७ ॥

मेधैर्मेदुरमंबरंवनभुवःश्यामास्तमालद्रुमै
र्नक्तंभीरुरयंत्वमेवतदिमंराधेगृहंमापय ॥
इत्थंनंदनिदेशतश्चलितयोःमत्यध्वकुंजद्रुमं
राधामाधवयोर्जयंतियमुनाकूलेरहःकेलयः ॥ ८ ॥

पुंजीभूतमेमगोपांगनानां मूर्तीभूतंभागधेयंयदूनां ॥
एकीभूतंगुप्तंचित्तंश्रुतीनां श्यामीभूतब्रह्ममेसन्निधत्तां ॥ ९ ॥

परमिममुपदेशमाद्रियध्वं निगमवनेषुनितांतखेदखिन्नाः ॥
विचिनुतभवनेषुबल्लवीना मुपनिषदर्थमुलूखलेनिबद्धं ॥ १० ॥

नवनीलमेघरुचिरःपरःपुमा नवनीमवाप्यधृतगोपविग्रहः ॥
नवनीयकीर्तिरमरैरपिस्वयं नवनीतभिक्षुरधुनासचिन्त्यते ॥११॥

निवहसिमुंचशैलं बिभृमोवयमितिवदत्सुशिथिलभुजः ॥
भरभुग्नविनतबाहुषु गोपेषुहसनहरिर्जयति ॥ १२ ॥

दर्पणार्पितमालोक्य मायास्त्रीरूपमात्मनः ॥
आत्मन्येवानुरक्तोवः शिवंदिशतुकेशवः ॥ १३ ॥

त्दयंकौस्तुभोद्भासि हरेःपुष्णातुवःश्रियं ॥
राधाप्रवेशरोधाय दत्तमुद्रमिवश्रिया ॥ १४ ॥

---

१ सतांयागोवर्णितस्यारसोब्रह्मानंदरूपोरसस्तेन. पक्षे सम्यग्गोदुग्धेन. २ हसि-नेनसहितं. पक्षे सशर्करं. ३ अनुक्षणं. पक्षे तृप्तिरेलातयुक्तं. ४ पुत्रधनादिलोभं. पक्षे तैलादिक पित्तजनकत्वात्. ५ अंधंतमः नरकः पक्षे गाढांधकारः ६ उडुपोनक्षत्रनाथः सःकुलपतिर्यस्य, पक्षे उडुपान्यल्पनावःतासांकुलंसमूहस्तत्पतिः ७ तरणिः सूर्यः पक्षे नौः. ८ पृथ्वी. ९ देहः

रामोनामबभूवहुंतदबलासीतेतिहुंतौपितु
र्वाचापंचवटीवनेनिवसतस्तामाहरद्रावणः ॥
कृष्णेनेतिपुरातनींनिजकथामाकर्ण्यमात्रेरितां
सौमित्रेक्वधनुर्धनुर्धनुरितिप्रोक्तागिरःपांतुवः ॥१५॥
पीठेपीठनिषण्णबालकगलेतिष्ठन्सगोपालको
यंत्रांतःस्थितदुग्धभांडमवभिद्याच्छाद्यघंटारवं ॥
वक्त्रोपांतकृतांजलिःकृतशिरःकंपंपिबन्यःपयः
पायादागतगोपिकानयनयोर्गंडूषफूत्कारकृत् ॥ १६ ॥
कस्त्वंकृष्णमवेहिमांकिमिहतेमन्मंदिराशंकया
युक्तंतन्नवनीतभाजनपुटेन्यस्तःकिमर्थंकरः ॥
कर्तुंतत्रपिपीलिकापनयनंसुप्ताःकिमुद्बोधिता
बालावत्सगतिंविवेक्तुमितिसंजल्पन्हरिःपातुवः ॥ १७ ॥
राधापुनातुजगदच्युतदत्तचित्ता मंथानमाकलयतीदधिरिक्तपात्रे ॥
तस्याःस्तनस्तबकचूचुकलोलदृष्टि र्देवोपिदोहनधियावृषभंदुदोह ॥१८

अंगुल्याकःकपाटंप्रहरतिकुटिलेमाधवःकिंवसंतो
नोचक्रीकिंकुलालोनहिधरणिधरःकिंद्विजिव्हःफणींद्रः ॥
नाहंघोराहिमर्दीकिमुतखगपतिर्नोहरिःकिंकपींद्र
इत्येवंसत्यभामाप्रतिवचनजितःपातुवश्चक्रपाणिः ॥१९॥

गौरी

श्री ॥ मत्यासन्नविवाहमंगलविधौदेवार्चनव्यग्रया
दृष्ट्वाग्रेपरिणेतुरेवलिखितांगंगाधरस्याकृतिं ॥
उन्मादस्मितरोषलज्जितधियागौर्याकथंचिच्चिरा
द्वृद्धस्त्रीवचनात्प्रियेविनिहितःपुष्पांजलिःपातुवः ॥ १ ॥

---

१ यथामातास्वपुत्रप्रस्वापनायप्राचीमाःकथाःकथयतितथायशोदाऽपिरामइतिक श्चिद्राजाआसीदितिवदतिस्म तत्श्रुत्वाकृष्णोपिहुंकारंदत्तवान्. २ शिक्यं. ३ मंजूषायां. ४ वसंतोलक्ष्मीपतिश्च ५ कुलालोविष्णुश्च. ६ शेषोविष्णुश्च. ७ सर्पः ८ गरुडः ९ कपींद्रोविष्णुश्च. १० समीपवर्ती ११ भर्तुः १२ चित्तविभ्रमः

वक्षःपीठेनिरीक्ष्यस्फटिकमणिशिलामंडलेस्वच्छभासि
स्वच्छायांसाभ्यसूयात्वमियमितिमुहुःसत्यमाश्वासिताऽपि ॥
वामेमेदक्षिणेस्याःश्रवसिकुवलयंनाहमित्यालपंती
दत्ताऽऽश्लेषासहासंमदनविजयिनापार्वतीवःपुनातु ॥ २ ॥
स्वेदस्तेकथमीदृशःप्रियतमेत्वन्नेत्रवन्हेर्विभो
कस्माद्वेपितमेतदिंदुवदनेभोगींद्रभीतेस्तव ॥
रोमांचःकथमेषदेवभगवन्गंगांभसांसीकरै
रित्थंभर्तरिभावगोपनपरागौरीचिरंपातुवः ॥ ३ ॥
भिक्षुःक्वास्तिबलेर्मखेपशुपतिःकिनास्त्यसौगोकुले
मुग्धेपन्नगभूषणःसखिसदाशेतेचतस्योपरि ॥
आर्येमुंचविषादमाशुकमलेनाहंमकृत्याचला
चेत्थंवैगिरिजासमुद्रसुतयोःसंभाषणंपातुवः ॥ ४ ॥
हरकंठग्रहानंद मीलिताक्षीनमाम्युमां ॥
कालकूटस्यसस्पर्शा ज्जातमूर्छागमामिव ॥ ५
उदारांस्त्वदृतेनान्यान् प्रपश्याम्ययिपार्वति ॥
श्रीरामभक्तिमाणिक्य मदेयमपिदेहिमे ॥ ६ ॥
विद्राणेरुद्रवृंदेसवितरितरलेवज्रिणिध्वस्तवज्रे
जाताशंकेशशांकेविरमतिमरुतित्यक्तवैरेकुबेरे ॥
वैकुंठेकुंठितास्त्रेमहिषमतिरुषंपौरुषोपघ्ननिघ्नं
निर्विघ्नंनिघ्नतीवःशमयतुदुरितंभूरिभावाभवानी ॥ ७ ॥
पार्वतीमोषधीमेका मपर्णामृगयामहे ॥
शूलीहालाहलंपीत्वा ययामृत्युंजयोभवत् ॥ ८ ॥

---

१ स्वप्रतिबिंबं २ सेर्ष्या ३ कर्णे ४ सात्विकाविर्भावसूचकंरोमहर्षणं. ५ स्वाभिप्रायगोपनपरा. ६ स्वेदं पक्षे विषमस्तातिविषादस्तं. ७ चंचला. ८ ओ शिवस्यदारा-गृभार्या. पक्षे उदारान् औदार्यशीलान्. ९ पलायिते. १० पौरुषोपघ्नःपराक्रमाश्रयोम-हिषोनिघ्नआयत्तोयस्मिन्कर्मणि. यद्वा पौरुषोपघ्नानापराक्रमिणानिघ्नआयत्तस्तमिति-महिषविशेषणं. ११ प्रभूतप्रभावा. १२ पर्वतसंबंधिनी. पर्वतपुत्रीच १३ पर्णरहितां. एतन्नाम्नीच. १४ शूलरोगवान् त्रिशूलधारीच १५ मृत्युनाशकः एतन्नाम्ना प्रसिद्धश्च

लक्ष्मीः

श्री ॥ पायात्पयोधिदुहितुः कपोलामलचंद्रमाः ॥
यत्रसंक्रांतबिंबेन हरिणाहरिणायितं ॥ १ ॥

सरस्वती

श्री ॥ शारदाशारदांऽभोज वदनावदनांबुजे ॥
सर्वदासर्वदाऽस्माकं सन्निधिसन्निधिंक्रियात् ॥ १ ॥
करबदरसदृशमखिलं भुवनतलंयत्प्रसादतःकवयः ॥
पश्यंतिसूक्ष्ममतयः साजयतिसरस्वतीदेवी ॥ २ ॥

श्रीरामचंद्र.

श्री ॥ श्रांतोसिचेत्संसृतितीव्रतापतः सीतान्वितंमारुतपोतसेवितं ॥
पलाशिसंघातविवृद्धविक्रमं रामंधृताकारमुपेहिसत्त्वरं ॥ १ ॥
यातायातैःसुचहुभिः श्रांतोसियदिहेसखे ॥
एकंगुरुघनच्छायं सीतारामपदंभज ॥ २ ॥
राकारोच्चारमात्रेण मुखान्निर्यातिपातकं ॥
पुनःप्रवेशसंदेहा न्मकारस्तत्कपाटवत् ॥ ३ ॥
अस्त्रामासतृणंप्रियाद्रुहितृणामासस्मरारेर्धनु
र्दारामासमुनेःशिलाऽपितृवगमासत्वयंपादुका ॥
कुल्यामासमहार्णवोऽपिकपयोयोधांबभूवुस्तदा
पौलस्त्योमशकांबभूवभगवंस्त्वंमानुषामासिथाः ॥ ४ ॥

---

१ हरिणइवाचरितं. २ सर्वदात्री. ३ उत्तमनिधिरूपं ४ कुशाग्रबुद्धय. ५ संसारः ६ जानकीसहितं पक्षेसीतयाल्हांगलपद्धत्यायुक्तं ७ हनुमता सेवितं. पक्षे मंदवायुना सेवितं ८ पलाशिनोराक्षसास्तेषांसंघातेनमारणेनविवृद्धोविक्रमोयस्य. पक्षे पलाशिनोवृक्षास्तेषांसमूहेन ९ गृहीतावतार पक्षे पुनःआकारयेनतं आराममित्यर्थः १० गुरुरेवघनोमेघस्तस्यछायायस्मिन्. पक्षे गुर्वीमहतीघनानिबिडाछायायस्मिन् ११ सीतासहितस्यरामस्यपदं. पक्षे सीतंशीतलंयदारामपदंउपवनस्थानं

नालीकभंगकृदतीवनदीनबंधुर्नक्षत्रपोनवसुधाविभवैकहेतुः ॥
राजाकिमिदुरपिनार्यभिमानहारी राजापरंजयतिराघवसार्वभौमः ॥५॥
कांतंश्रीरघुतिलकं सर्वजगत्पालकंविहायजनः ॥
अनुसरतिनरकांतं नानाकष्टाश्रयंशिवशिवाय ॥ ६ ॥

महाजन प्रशंसा.

श्री ॥ सौजन्याऽमृतसिन्धवःपरहितमारब्धवीरव्रता
वाचालाःपरवर्णनेनिजगुणाऽऽलापेचमौनव्रताः ॥
आपत्स्वप्यविलुप्तवीर्यनिचयाःसंपत्स्वनुत्सेकिनो
माभूवन्खलवक्त्रनिर्गतविषज्वालातताःसज्जनाः ॥१॥
मुखेननोद्गिरत्यूर्ध्वं हृदयान्नाऽऽनयत्यधः ॥
जरयत्यंतरेसाधु दोषंविषमिवेश्वरः ॥ २ ॥
विकृतिनैवगच्छंति संगदोषेणसाधवः ॥
आवेष्टितंमहासर्पैश्चंदनंनविषायते ॥ ३ ॥
सुजनोनयातिवैरं परहितकार्यविनाशकालेऽपि ॥
छेदेऽपिचंदनतरुः सुरभयतिमुखंकुठारस्य ॥ ४ ॥
मग्नाऽपिविपत्पयोधिगहनेनिःशंकधैर्याऽऽवृताः
कुर्वंत्येवपरोपकारमनिशंसंतोयथाशक्तिवै ॥
राहोरुग्रकरालवक्त्रकुहरग्रासाभिभूतोऽप्यलं
चंद्रःकिनजनंकरोतिसुखिनंग्रासावशेषैःकरैः ॥ ५ ॥
धवलयतिसमग्रंचंद्रमाजीवलोकं
किमितिनिजकलंकंनाऽऽत्मसंस्थंप्रमार्ष्टि ॥

---

१ अलीकभगकृत् पक्षे कमलविकासकृत् २ अनाथबंधुः पक्षे नदीनःसमुद्रस्तद्बंधुः ३ क्षत्रियश्रेष्ठः पक्षे नक्षत्रनायकः ४ वसुधैश्वर्यस्यकारणं, पक्षे नवीनायाःसुधायायो-विभवस्तस्यमुख्यकारणं ५ शत्रुमानहारी, पक्षे नारीणांमानहारकः ६ रमणीयं, पक्षे ककारांतं, ७ रमणीयं, पक्षे ककारोनेयस्यतादृशनरनरकमित्यर्थः ८ सुजनतामृत-समुद्राः ९ विपत्तिकालेषु, १० गर्वरहिताः ११ ज्वाला, १२ जीर्णंकरोति, १३ सुगंध-यति, १४ परशोः १५ विपदेवपयोधिःसमुद्रः १६ करालं भयंकर, १७ किरणैः १८ शोधयति, नाशयतीत्यर्थः

भवतिविदितमेतत्प्रायशःसज्जनानां
परहितनिरतानामादरोनाऽऽत्मकार्ये ॥ ६ ॥
अहोमहत्त्वंमहतामपूर्वं विपत्तिकालेऽपिपरोपकारः ॥
यथाऽऽस्यमध्येपतितोऽपिराहोः कलानिधिःपुण्यचयंददाति ॥ ७ ॥
उपकर्तुमियंकर्तुं कर्तुंस्नेहमकृत्रिमं ॥
सज्जनानांस्वभावोऽयं केनेंदुःशीतलीकृतः ॥ ८ ॥
मान्याएवहिमान्यानां मानंकुर्वंतिनेतरे ॥
शंभुर्बिभर्तिमूर्ध्नेंदुं स्वर्भानुस्तंजिघृक्षति ॥ ९ ॥
येजातेव्यसनेनिराकुलधियःसंपत्सुनाऽभ्युन्नताः
प्राप्तेनैवपराङ्मुखाःप्रणयिनिप्राणप्रयोगैरपि ॥
ह्रीमंतःस्वगुणप्रकाशनविधावन्यस्तुतौपंडिता
स्तेभूमंडलमंडनैकतिलकाःसंतःकियंतोजनाः ॥ १० ॥
येदीनेषुदयालवःस्पृशतियानल्पोपिनश्रीमदो
व्यग्रायेचपरोपकारकरणेहृष्यंतियेयाचिताः ॥
स्वस्थाःसंतिचयौवनोन्मदमहाव्याधिप्रकोपेऽपिये
तैःस्तंभैरिवसुस्थिरैःकिलभरक्रांताधराधार्यते ॥ ११ ॥
संपदियस्यनहर्षो विपदिविषादोरणेचधीरत्वं ॥
तंभुवनत्रयतिलकं जनयतिजननीसुतंविरलं ॥ १२ ॥
शरदिनवर्षतिगर्जति वर्षतिवर्षासुनिःस्वनोमेघः ॥
नीचोवदतिनकुरुते वदतिनसाधुःकरोत्येव ॥ १३ ॥
गवादीनांपयोऽन्येद्युः सद्योवाजायतेदधि ॥
क्षीरोदधेस्तुनाद्यापि महतांविकृतिःकुतः ॥ १४ ॥
निर्गुणेष्वपिसत्त्वेषु दयांकुर्वंतिसाधवः ॥
नहिसंहरतेज्योत्स्नां चंद्रश्चांडालवेश्मनि ॥ १५ ॥

---

१ अलौकिकं. २ मुखमध्ये. ३ वृद्धिं. ४ निष्कपटं. ५ राहुः ६ ग्रहीतुमिच्छति. ७ संकटे. ८ अव्यग्रमनसः ९ लज्जावंतः १० हर्षयुक्ताभवंति. ११ पृथ्वी. १२ श्रेष्ठं. १३ शब्दरहितः १४ अन्यस्मिन्दिवसे. १५ विकारः १६ प्राणिषु. १७ चंद्रकांतिं. १८ चांडालगृहे.

सुजनंव्यंजनंमन्ये चारुवंशसमुद्भवं ॥
आत्मानंचपरिभ्राम्य परतापनिवारणं ॥ १६ ॥
इहानेकेसंतःसततमुपकारिण्युपकृतिं
कृतज्ञाःकुर्वंतोजगतिनिवसंतोऽपिसुधियः ॥
कियतस्तेसतःसुकृतपरिपाकप्रणयिनो
विनास्वार्थंयेषांभवतिपरकृत्यव्यसनिता ॥ १७ ॥
अर्थःसुखंकीर्तिरपीहमाभूदनर्थएवाऽस्तुतथाऽपिधीराः ॥
निजप्रतिज्ञामनुरुध्यमाना महोद्यमाःकर्मसमारभंते ॥ १८ ॥
अपकारिषुयःसाधुः ससाधुःसद्भिरुच्यते ॥
उपकारिषुयःसाधुः साधुत्वेतस्यकोगुणः ॥ १९ ॥
आदिमध्यनिधनेषुसौहृदं सज्जनेभवतिनेतरजने ॥
छेदतापननिघर्षताडनै नाऽन्यभावमुपयातिकांचनं ॥ २० ॥
क्षुद्राःसंतिसहस्रशःस्वभरणव्यापारमात्रोद्यताः
स्वार्थोयस्यपरार्थएवसपुमानेकःसतामग्रणीः ॥
दुष्पूरोदरपूरणायपिबतिस्रोतःपतिंवाडवो
जीमूतस्तुनिदाघसंभृतजगत्संतापविच्छित्तये ॥ २१ ॥
नहिभवतिवियोगःस्नेहविच्छेदहेतु
र्जगतिगुणनिधीनांसज्जनानांकदाचित् ॥
घनतिमिरनिबद्धोदूरसंस्थोऽपिचंद्रः
किमुकुमुदवनानांप्रेमभंगंकरोति ॥ २२ ॥
उदधिरवधिरुर्व्यास्तंहनूमांस्ततार
निरवधिगगनंचेद्ब्रह्मांडकोशेविलीनं ॥
इतिपरिमितिमंतोभांतिसर्वेऽपिभावाः
सतुनिरवधिरेकःसज्जनानांविवेकः ॥ २३ ॥
चंद्रःक्षयीप्रकृतिवक्रतनुर्जडात्मा

---

१ विजणाइतिलोके. २ वेणुःकुलंच. ३ वैरं ४ विकृतिं. ५ सुवर्णं. ६ नीचाः ७ अग्रेसरः ८ समुद्रं. ९ वडवाग्निः १० मेघः ११ ग्रीष्मः १२ गाढांधकारः १३ मर्यादा. १४ तीर्णवान् १५ प्रकृत्यास्वभावेनवक्रातनुर्यस्य. १६ जडस्वभावः डलयोः सावर्ण्यात्जलात्माजलरूपः

दोषाऽऽकरःस्फुरतिमित्रविपत्तिकाले ॥
मूर्ध्नातथाऽपिविधृतःपरमेश्वरेण
नैवाऽऽश्रितेषुमहतांगुणदोषशंका ॥ २४ ॥
उदयेसवितारक्तो रक्तश्चाऽस्तमनेतथा ॥
संपत्तौचविपत्तौच महतामेकरूपता ॥ २५ ॥
दृश्यंतेभुविभूरिनिंबतरवःकुत्राऽपितेचंदनाः
पाषाणैःपरिपूरितावसुमतीवज्रोमणिर्दुर्लभः ॥
श्रूयंतेकरटाऽऽरवाःप्रतिदिनंचैत्रेकुहूकूजितं
तन्मध्येखलुसंकुलंजगदिदंद्वित्राःक्षितौसज्जनाः ॥ २६ ॥
इक्षोरग्रात्क्रमशः पर्वणिपर्वणियथारसविशेषः ॥
तद्वत्सज्जनमैत्री विपरीतानांचविपरीता ॥ २७ ॥
आरभंतेऽल्पमेवाज्ञाः कामंव्यग्राभवंतिच ॥
महाऽऽरंभाःकृतधिय स्तिष्ठंतिचनिराकुलाः ॥ २८ ॥
पिबंतिनद्यःस्वयमेवनांऽभः स्वयंनखादंतिफलानिवृक्षाः ॥
नाऽदंतिसस्यंखलुवारिवाहाः परोपकारायसतांविभूतयः २९ ॥
गुणायंतेदोषाःसुजनवदनेदुर्जनमुखे
गुणादोषायंतेतदिदमपिनोविस्मयपदं ॥
महामेघःक्षारंपिबतिकुरुतेवारिमधुरं
फणीक्षीरंपीत्वावमतिगरलंदुःसहतरं ॥ ३० ॥
संपदोमहतामेव महतामेवचाऽऽपदः ॥
वर्धतेक्षीयतेचंद्रो नतुतारागणःक्वचित् ॥ ३१ ॥
किंजन्मनाचमहतापितृपौरुषेण
शक्त्याहियातिनिजयापुरुषःप्रतिष्ठां ॥
कुंभानकूपमपिशोषयितुंसमर्थाः
कुंभोद्भवेनमुनिनाऽंबुधिरेवपीतः ॥ ३२ ॥

---

१ दोषारात्रिस्तस्याःकरः पक्षे दोषाणामाकरःस्थानिरितियावत्. २ मित्रःसूर्यःतस्य-विपत्तिकालःअस्तकालस्तस्मिन्, पक्षे मित्रंसुहृत्तस्यविपत्तिकालः ३ सदाशिवेन, पक्षे केनचित्स्वामिना. ४ हीरकमणिः ५ काकशब्दाः ६ कोकिलशब्दाः ७ धान्यं, ८ मेघाः ९ ऐश्वर्याणि, १० आश्चर्यस्थानं, ११ सर्पः १२ अगस्त्येन

महतांसद्व्ययेनैव विपत्तिरपिशोभते ॥
दंतभंगोहिनागानां श्लाघ्योगिरिविदारणे ॥ २३ ॥
ऐश्वर्यस्यविभूषणंसुजनताशौर्यस्यवाक्संयमो
ज्ञानस्योपशमःकुलस्यविनयोवित्तस्यपात्रेव्ययः ॥
अक्रोधस्तपसःक्षमाबलवतांधर्मस्यनिर्व्याजता
सर्वेषामपिसर्वकारणमिदंशीलंपरंभूषणं ॥ २४ ॥
अनुकुरुतःखलसुजना वग्रिमपाश्चात्यभागयोःसूच्याः ॥
विदधातिरंध्रमेको गुणवानन्यस्तुपिदधाति ॥ २५ ॥
दाक्षिण्यंस्वजनेदयापरजनेशाठ्यंसदादुर्जने
नीतिःसाधुजनेनयोनृपजनेविद्वज्जनेष्वार्जवं ॥
शौर्यंशत्रुजनेक्षमागुरुजनेनारीजनेधूर्तता
येचैवंपुरुषाःकलासुकुशलास्तेष्वेवलोकस्थितिः ॥ २६ ॥
केनांजितानिनयनानिमृगांगनानां
कोवाकरोतिरुचिरांऽगरुहान्मयूरान् ॥
कश्चोत्पलेषुदलसन्निचयंकरोति
कोवाकरोतिविनयंकुलजेषुपुंसु ॥ २७ ॥
आरभ्यतेनखलुविघ्नभयेननीचैः
प्रारभ्यविघ्नविहताविरमंतिमध्याः ॥
विघ्नैःपुनःपुनरपिप्रतिहन्यमानाः
प्रारऽऽभ्यचोत्तमजनानपरित्यजंति ॥ २८ ॥
प्रियान्याय्यावृत्तिर्मलिनमसुभंगेप्यसुकरं
त्वसंतोनाभ्यर्थ्याःसुहृदपिनयाच्यःकृशधनः ॥
विपद्युच्चैःस्थेयंपदमनुविधेयंचमहतां

१ स्तुत्यः २ पर्वतभेदने. ३ वाङ्नियमनं. ४ शांतिः ५ निष्कपटत्वं. ६ सुन्दभावः ७ अनुकरणंकुरुतः ८ सुईइतिलोके. ९ करोति. १० सूत्रयुक्तः पक्षे विद्याविनयादिगुणयुक्तः ११ आच्छादयति. १२ सरलभावः १३ शठत्वं. १४ नीतिः १५ रुचिरकेशान् १६ न्यायानुसारिणी १७ वर्तनं १८ पातकं १९ प्राणव्यये. २० नयाचयितव्याः २१ क्षीणधनः २२ अनुसर्तव्यं

सतांकेनोद्दिष्टंविषममसिधाराव्रतमिदं ॥ ३९ ॥
प्रदानंप्रच्छन्नंगृहमुपगतेसंभ्रमविधिः
प्रियंकृत्वामौनंसदसिकथनंनाप्युपकृतेः ॥
अनुत्सेकोलक्ष्म्यांनिरभिभवसाराःपरकथाः
सतांकेनोद्दिष्टंविषममसिधाराव्रतमिदं ॥ ४० ॥
घृष्टंघृष्टंपुनरपिपुनश्चंदनंचारुगंधं
छिन्नंछिन्नंपुनरपिपुनःस्वादुचैवेक्षुकांडं ॥
दग्धंदग्धंपुनरपिपुनःकांचनंकांतवर्णं
नप्राणांतेप्रकृतिविकृतिर्जायतेचोत्तमानां ॥ ४१ ॥
दुर्जनवचनांगारैर्दग्धोऽपिनविप्रियंवदत्यार्यः ॥
अगुरुरपिविदह्यमानः स्वभावगंधंपरित्यजतिकिंनु ॥४२॥
सत्संगाद्भवतिहिसाधुताखलानां साधूनांनहिखलसंगमात्खलत्वं ॥
आमोदंकुसुमभवंमृदेवधत्ते मृद्गंधंनहिकुसुमानिधारयंति ॥ ४३ ॥
अप्रियवचनदरिद्रैः प्रियवचनाढ्यैःस्वदारपरितुष्टैः ॥
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मंडितावसुधा ॥ ४४ ॥
असाधुःसाधुर्वाभवतिखलुजात्यैवपुरुषो
नसंगाद्दौर्जन्यंनहिसुजनताकस्यचिदपि ॥
प्ररूढेसंसर्गेमणिभुजगयोर्जन्मजनिते
मणिर्नोऽहेर्दोषान्स्पृशतिनहिसर्पोमणिगुणान् ॥ ४५ ॥
वनेऽपिसिंहामृगमांसभक्षिणो बुभुक्षितानैवतृणंचरंति ॥
एवंकुलीनाव्यसनाभिभूता ननीचकर्माणिसमाचरंति ॥ ४६ ॥
कांताकटाक्षविशिखानलुनंतियस्य
चित्तंननिर्दहतिकोपकृशानुतापः ॥
कर्षतिभूरिविषयांश्चनलोभपाशा
लोकत्रयंजयतिकृत्स्नमिदंसधीरः ॥ ४७ ॥

---

१ उपदिष्टं. २ अतिकठिनं. ३ खड्गधारातांडवं. ४ गुप्तं ५ उपकारस्य. ६ अगर्वः. ७ सुगंधं. ८ दूषणं. ९ शोभिता. १० संबंधे. ११ सर्पस्य. १२ संकटव्याप्ताः १३ कटाक्षाएवविशिखाःबाणाः १४ नछिंदंति. १५ कोपःक्रोधःसएवकृशानुरग्निस्तत्तापः १६ संपूर्णं.

पतितोऽपिराहुवदने तरणिर्बोधयतिपद्मखंडानि ॥
भवतिविपद्यपिमहतां अंगीकृतवस्तुनिर्वाहः ॥ ४८ ॥

दातानदापयतिदापयितानदत्ते
योदानदापनपरोमधुरंनवक्ति ॥
दानंचदापनमथोमधुराचवाणी
त्रीण्यप्यमूनिखलुसत्पुरुषेवसंति ॥ ४९ ॥

मलयाचलगंधेन त्विंधनंचंदनायते ॥
तथासज्जनसंगेन दुर्जनःसज्जनायते ॥ ५० ॥

ह्रदयानिसतामेव कठिनानीतिमेमतिः ॥
खलवाग्विशिखैस्तीक्ष्णै र्भिद्यंतेनमनाग्यतः ॥ ५१ ॥

वक्रेवल्गामकर्षःसमरभुवितवप्राणरक्षाऽपिदैवात्
स्वेच्छाचारोनचाऽऽस्तेनहिभवतितथाभारवाहोनितांतं ॥
इत्युक्तोऽश्वःखरेणप्रहसितवदनोमूकएवाऽवतस्थे
तस्माज्जात्यामहांतोऽधमजनविषयेमौनमेवाश्रयंति ॥ ५२ ॥

अंजलिस्थानिपुष्पाणि वासयंतिकरद्वयं ॥
अहोसुमनसांप्रीति र्वामदक्षिणयोःसमा ॥ ५३ ॥

माभूत्सज्जनयोगो यदियोगोमापुनःस्नेहः ॥
स्नेहोयदिविरहोमा यदिविरहोजीविताऽऽशाका ॥ ५४ ॥

प्रेमैवमाऽस्तुयदिचेत्पथिकेनसार्द्धं
तेनाऽपिचेद्गुणवतानसमंकदाचित् ॥
तेनाऽपिचेद्भवतुमाऽस्तुकदापिभंगो
भंगोऽपिचेद्भवतुवश्यमवश्यमायुः ॥ ५५ ॥

कुंभःपरिमितमंभः पिबत्यसौकुंभसंभवोंऽभोधिं ॥
अतिरिच्यतेसुजन्मा कश्चिज्जनकान्निजेनचरितेन ॥ ५६ ॥

तुंगात्मनास्तुंगतराःसमर्था मनोरथान्पूरयितुंननीचाः ॥
धाराधराएवधराधाराणां निदाघदाहंशमितुंनवद्यः ॥ ५७ ॥

विकासयति. २ किंचिदपि. ३ लगामइतिलोके. ४ सप्राणत्वं. ५ सह.
६ विघातः ७ अगस्त्यः ८ अधिकोभवति ९ पितुः १० आचरणेन ११ उच्चासनाः
१२ शमितुंशमयितुमित्यर्थः शमयंतिनान्ये इतिवापाठः

सद्भिस्तुलीलयाप्रोक्तं शिलालिखितमक्षरं ॥
असद्भिःशपथेनापि जलेलिखितमक्षरं ॥ ५८ ॥
मथममवयसिदत्तंतोयमल्पंपिबंतः
शिरसिनिहितभारानारिकेलानराणां ॥
उदकममृतकल्पंदद्युराजीवितांतं
नहिकृतमुपकारंसाधवोविस्मरंति ॥ ५९ ॥
अद्याऽपिनोज्झतिहरःकिलकालकूटं
कूर्मोबिभर्तिधरणींखलुपृष्ठभागे ॥
अंभोनिधिर्वहतिदुःसहवाडवाऽग्नि
मंगीकृतंसुकृतिनःपरिपालयंति ॥ ६० ॥
हरेःपदाहतिःश्लाघ्या नश्लाघ्यंखररोहणं ॥
स्पर्धाऽपिविदुषायुक्ता नयुक्तामूर्खमित्रता ॥ ६१ ॥
विपदिधैर्यमथाऽभ्युदयेक्षमा सदसिवाक्पटुतायुधिविक्रमः ॥
यशसिचाऽभिरुचिर्व्यसनंश्रुतौ प्रकृतिसिद्धमिदंहिमहात्मनां ॥६२॥
यत्रविद्वज्जनोनाऽस्ति श्लाघ्यस्तत्राऽल्पधीरपि ॥
निरस्तपादपेदेश एरंडोऽपिद्रुमायते ॥ ६३॥
गोत्रेस्थितिंनमुंचति सदासन्नतिमाश्रिताः ॥
उदन्वंतश्चसंतश्च महासत्वतयातथा ॥ ६४ ॥
साधोःप्रकोपितस्याऽपि मनोनाऽऽयातिविक्रियां ॥
नहितापयितुंशक्यं सागरांभस्तृणोल्कया ॥ ६५ ॥
नारिकेलसमाऽऽकारा दृश्यंतेऽपिहिसज्जनाः ॥
अन्येबदरिकाऽऽकारा बहिरेवमनोहराः ॥ ६६ ॥
स्नेहच्छेदेऽपिसाधूनां गुणानाऽऽयांतिविक्रियां ॥
भंगेनाऽपिमृणालाना मनुबध्नंतितंतवः ॥ ६७ ॥

---

१ अमृततुल्यं. २ आमरणउत्सर्गे. नत्यजति. ३ सिंहस्यचरणप्रहारः. ४ पादताडनं ५ उदयकाले. ६ वक्तृत्वशक्तिः ७ स्वभावसिद्धं. ८ वृक्षवत्आचरति. ९ कुलमर्यादां. पक्षेपर्वतस्थितिं. १० नम्रमनं. ११ समुद्राः १२ महांतः सत्वाः प्राणिनोयस्मिन्. पक्षेधैर्यं. १३ विकारं १४ कोलीतइतिलोके १५ संबंधंकुर्वंति.

घर्मार्तंनतथासुशीतलजलैःस्नानंनमुक्ताऽऽवलि
र्नश्रीखंडविलेपनंसुखयतिप्रत्यंगमप्यर्पितं ॥
प्रीत्यैसज्जनभाषितंप्रभवतिप्रायोयथाचेतसि
सद्युक्त्याचपुरस्कृतंसुकृतिनामाकृष्टिमंत्रोपमं ॥ ६८ ॥
परोपदेशेपांडित्यं सर्वेषांसुकरंनृणां ॥
धर्मेस्वीयमनुष्ठानं कस्यचित्तुमहात्मनः ॥ ६९ ॥
उपचरितव्याःसंतो यद्यपिकथयंतिनैकमुपदेशं ॥
यास्तेषांस्वैरकथा स्ताएवभवंतिशास्त्राणि ॥ ७० ॥
वांछासज्जनसंगमेपरगुणेप्रीतिर्गुरौनम्रता
विद्यायांव्यसनंस्वयोषितिरतिर्लोकापवादाद्भयं ॥
भक्तिःशूलिनिशक्तिरात्मदमनेसंसर्गमुक्तिःखले
ष्वेतेयेषुवसंतिनिर्मलगुणास्तेभ्योनरेभ्योनमः ॥ ७१ ॥
करेश्लाघ्यस्त्यागःशिरसिगुरुपादप्रणयिता
मुखेसत्यावाणीविजयिभुजयोर्वीर्यमतुलं ॥
हृदिस्वस्थावृत्तिःश्रुतमधिगतैकव्रतफलं
विनाप्यैश्वर्येणप्रकृतिमहतांमंडनमिदं ॥ ७२ ॥
संपत्सुमहतांचित्तं भवत्युत्पलकोमलं ॥
आपत्सुचमहाशैल शिलासंघाँतकर्कशं ॥ ७३ ॥
यःप्रीणयेत्सुचरितैःपितरंसपुत्रो यद्भर्तुरेवहितमिच्छतितत्कलत्रं ॥
तन्मित्रमापदिसुखेचसमक्रियंय देतत्त्रयंजगतिपुण्यकृतोलभंते ॥७४॥
नम्रत्वेनोन्नमंतःपरगुणकथनैःस्वान्गुणान्ख्यापयंतः
स्वार्थान्संपादयंतोविततबहुतराऽऽरंभयत्नाःपरार्थे ॥
क्षांत्यैवाक्षेपरूक्षाऽक्षरमुखरमुखान्दुर्मुखान्दूषयंतः
संतश्चाऽऽश्चर्यचर्याजगतिबहुमताःकस्यनाऽभ्यर्चनीयाः ॥ ७५ ॥
मनसिवचसिकायेपुण्यपीयूषपूर्णा
स्त्रिभुवनमुपकारश्रेणिभिःप्रीणयंतः ॥
परगुणपरमाणून्पर्वतीकृत्यनित्यं

१ मुक्तासरः २ सेव्याः ३ स्वैरालापाः ४ स्वस्त्रियां. ५ संकटे. ६ समीचीने.
७ दानं. ८ निस्तुलं. ९ भूषणं. १० काठिन्य. ११ प्रकटयन्तः १२ अमृतं. १३ पंक्तिभिः

निजान्तद्दिविकलंत:संतिसंत:कियंत: ॥ ७६ ॥

किंतेनहेमगिरिणारजताद्रिणावा यत्राश्रितास्तरवस्तरवस्तएव ॥
मन्यामहेमलयमेवयदाश्रयेण कंकोलनिंबकुटजाअपिचंदना:स्यु: ॥७७॥
अतिकुपिताअपिसुजना योगेनमृदूभवंतिनतुनीचा: ॥
हेम्न:कठिनस्याऽपि द्रवणोपायोऽस्तिनतृणानाम् ॥ ७८ ॥
पातितोपिकराघाते रुत्पतत्येवकंदुक: ॥
प्रायेणसाधुवृत्ताना मस्थायिन्योविपत्तय: ॥ ७९ ॥
छिन्नोऽपिरोहतितरु श्चंद्र:क्षीणोऽपिवर्धतेलोके ॥
इतिविमृशंत:संत: संतप्यंतेनलोकेऽस्मिन् ॥ ८० ॥
इयमुन्नतसत्वशालिनी महतांकाऽपिकठोरचित्तता ॥
उपकृत्यभवंतिदूरत: परत:प्रत्युपकारशंकया ॥ ८१ ॥
नाल्पीयसिनिबध्नंति पदमुन्नतचेतस: ॥
येषांभुवनलाभेऽपि नि:सीमानोमनोरथा: ॥ ८२ ॥
अहोकिमपिचित्राणि चरित्राणिमहात्मनां
लक्ष्मींतृणायमन्यंते तद्भरेणनमंत्यपि ॥ ८३ ॥
आपत्स्वेवहिमहतां शक्तिरभिव्यज्यतेनसंपत्सु ॥
अगुरोस्तथानगंधो प्राणेऽस्तियथाऽग्निपतितस्य ॥ ८४ ॥
वज्रादपिकठोराणि मृदूनिकुसुमादपि ॥
लोकोत्तराणांचेतांसि कोहिविज्ञातुमर्हति ॥ ८५ ॥
तरुमूलादिषुनिहितं जलमाविर्भवतिपल्लवाऽग्रेषु ॥
निभृतंयदुपक्रियते तदपिमहांतोवदंत्युच्चै: ॥ ८६ ॥
अचिंत्या:पंथान:किमपिमहतामंधकरिपो
र्यदक्ष्णोऽभूत्तेजस्तदकृतकथांशेषमदनं ॥
मुनेर्नेत्रादत्रेर्यदजनिपुनर्ज्योतिरहह
मतेनेतेनेदंमदनमयमेवत्रिभुवनं ॥ ८७ ॥
नूनंदुग्धाब्धिमंथोत्था विमौसुजनदुर्जनौ ॥

---

१ त्वचिका: २ शोभमाना ३ उदारचेतस: ४ लक्ष्मीभरेण, ५ व्यक्तामवति, ६ निष्कलंके, एकांतेहत्वर्थ: ७ शंकरस्य, ८ अकरोत्, ९ वार्तावशिष्टोमदनोयस्मिन्नक-थयाविधं, अत्रोत्तरार्थस्यंत्रिभुवनमितिविशेषणंयोजनीय १० अत्रे:

किंत्वदोःसोदरःपूर्वैः कालकूटस्यचेतरः ॥ ८८ ॥
उदयतियदिभानुःपश्चिमेदिग्विभागे
प्रचलतियदिमेरुःशीततांयातिवह्निः ॥
विकसतियदिपद्मंपर्वताऽग्रेशिलायां
नभवतिपुनरुक्तंभाषितंसज्जनानां ॥ ८९ ॥
किमत्रचित्रंयत्संतः पराऽनुग्रहतत्पराः॥
नहिस्वदेहशैत्याय जायंतेचंदनद्रुमाः ॥ ९० ॥
प्राज्ञोहिजल्पतांपुंसां श्रुत्वावाचःशुभाऽशुभाः ॥
गुणवद्वाक्यमादत्ते हंसःक्षीरमिवांऽभसः ॥ ९१ ॥
रिपुःपौलस्त्याख्यश्चरणचरितव्योजलनिधि
र्विजेतव्यालंकारणभुविसहायाश्चकपयः ॥
तथाऽप्येकोरामःसकलमवधीद्राक्षसकुलं
क्रियासिद्धिःसत्वेभवतिमहतांनोपकरणे ॥ ९२ ॥
रथस्यैकंचक्रंभुजगयमिताःसप्ततुरगा
निरालंबोमार्गश्चरणरहितःसारथिरपि ॥
रवियांत्येवांऽतंप्रतिदिनमपारस्यनभसः क्रिया० ॥ ९३ ॥
धनुःपौष्पंमौर्वीमधुकरमयीचंचलदृशां
दृशांकोणोबाणःसुहृदविजितात्माहिमकरः ॥
तथाप्येकोनंगस्त्रिभुवनमपिव्याकुलयति क्रि० ॥ ९४ ॥
अपेक्षंतेनचस्नेहं नपात्रंनदशांतरं ॥
सदालोकहितासक्ता रत्नदीपाइवोत्तमाः ॥ ९५ ॥
किमधुनाकिंविधुना किंसुधयाकिंचवसुधयाऽखिलया ॥
यदिन्हृदयहारिचरितः पुरुषःपुनरेतिनयनयोरयनं ॥ ९६ ॥
काकैःसहप्रवृद्धस्य कोकिलस्यकलागिरः ॥
खलसंगेऽपिनैष्ठुर्यं कल्याणप्रकृतेःकुतः ॥ ९७ ॥
अंबरमनुल्लंघ्यं वसुंधरासाऽपिवामनैकपदा ॥

---

१ रावणः २ अमूरुः ३ पुष्पमयं. ४ ज्या. ५ भ्रमररूपा. ६ मैत्री. घृतादिच. ७ सोमकला. मांडच. ८ अवस्थांतरं. सूत्रवार्तीश्च. ९ लोकानांहितंतस्मिन्आसक्ताः पक्षे-आलोकःप्रकाशः तदेवाहितंतास्मिन्नासक्ताः १० अमृतेन. ११ स्थानं. १२ अब्धकमधुरः

अब्धिस्तपिपीतेऽब्धः सखांमनःकेनतुल्यंस्यात् ॥ ९८ ॥
आपद्गतःखलुमहाशयचक्रवर्ती विस्तारयत्यकृतपूर्वमुदारभावम् ॥
कालागुरुर्दहनमध्यगतःसमंता ल्लोकोत्तरंपरिमलंप्रकटीकरोति ॥९९॥
विश्वाऽभिरामगुणगौरवगुंफितानां
रोषोऽपिनिर्मलधियांरमणीयएव ॥
लोकप्रियैःपरिमलैःपरिपूरितस्य
काश्मीरजस्यकटुतापिनितांतरम्या ॥ १०० ॥
शून्येऽपिचगुणवत्ता मातन्वानःस्वकीयगुणजालैः ॥
विवराणिमुद्रयन्द्रा गूर्णायुरिवसज्जनोजयति ॥ १०१ ॥
प्रदानंप्रच्छन्नंगृहमुपगतेसंभ्रमविधि
र्निरुत्सेकोलक्ष्म्यामनभिभवगंधाःपरकथाः ॥
प्रियंकृत्वामौनंसदसिकथनंचाऽप्युपकृतेः
श्रुतेऽत्यंतासक्तिःपुरुषमभिजातंकथयति ॥ १०२ ॥
प्रियप्रायावृत्तिर्विनयमधुरोवाचिनियमः
प्रकृत्याकल्याणीमतिरनवगीतःपरिचयः ॥
पुरोवापश्चाद्वातदिदमविपर्यासितरसं
रहस्यसाधूनामनुपधिविशुद्धंविजयते ॥ १०३ ॥
येपापंशमयंतिसंगतिभृतांयेदानशृंगारिणो
येषांचित्तमतीवनिर्मलतरंयेषांनमर्मव्रतं ॥
येसर्वान्सुखयंतिह्यितिदिनंतेसाधवोदुर्लभा
गंगावद्गजगंडवद्गगनवद्गांगेयवद्वेयवत् ॥ १०४ ॥
यथाचित्तंतथावाचो यथावाचस्तथाक्रियाः ॥
चित्तेवाचिक्रियायांच साधूनामेकरूपता ॥ १०५ ॥
विवेकःसहसंपत्त्या विनयोविद्ययासह ॥
प्रभुत्वंप्रश्रयोपेतं चिन्हमेतन्महात्मनां ॥ १०६ ॥

---

१ तरणिः नौकेसियावत् २ सुंदर. ३ केसरस्य. ४ कोळीतिलोके. लूता. ५ सत्कुकसमूर्तं. ६ आनंदात्मिका. ७ विनयः

दुर्जननिंदा

श्रीगणेशंवंदे ॥ दुर्जनःपरिहर्तव्यो विद्ययाऽलंकृतोऽपिसन् ॥
मणिनाभूषितःसर्पः किमसौनभयंकरः ॥ १ ॥
अहमेवगुरुःसुदारुणाना मितिहालाहलमास्मतातदर्प्यः॥
ननुसंतिभवादृशानिभूयो भुवनेऽस्मिन्वचनानिदुर्जनानां ॥ २ ॥
अपूर्वरसनाव्यालाः खलाननबिलेशयाः ॥
कर्णमूलेस्पृशंत्यन्यं हरंत्यन्यस्यजीवितं ॥ ३ ॥
नदुर्जनःसज्जनतामुपैति बहुप्रकारैरपिसेव्यमानः ॥
भूयोऽपिसिक्तःपयसाघृतेन नर्निबवृक्षोमधुरत्वमेति ॥ ४ ॥
खलःसर्षपमात्राणि पराच्छिद्राणिपश्यति ॥
आत्मनोबिल्वमात्राणि पश्यन्नपिनपश्यति ॥ ५ ॥
खलानांकंटकानांच द्विविधैवप्रतिक्रिया ॥
उपानन्मुखभंगोवा दूरतोवाविसर्जनं ॥ ६ ॥
नविनापरवादेन रमतेदुर्जनोजनः ॥
काकःसर्वरसान्भुंक्ते विनाऽमेध्यंनतृप्यति ॥ ७ ॥
पोतोदुस्तरवारिराशितरणेदीपोऽधकारागमे
निर्वातेव्यजनंमदांधकरिणांदर्पोपशांतौसृणिः ॥
इत्येतद्भुविनाऽस्तियस्यविधिनानोपायचिंताकृता
मन्येदुर्जनचित्तवृत्तिहरणेधाताऽपिभग्नोद्यमः ॥ ८ ॥
कर्पूरधूलीरचिताऽऽलवालैः कस्तूरिकाकुंकुमलिप्तदेहः ॥
सुवर्णकुंभैःपरिषिच्यमानो निजंगुणंमुंचतिकिंपलांडुः ॥ ९ ॥
सर्पःक्रूरःखलःक्रूरः सर्पात्क्रूरतरःखलः ॥
मंत्रेणशाम्यतेसर्पो नखलःशाम्यतेकदा ॥ १० ॥
विषधरतोप्यतिविषमः खलइतिनमृषावदंतिविद्वांसः ॥

---

१ गर्वोत्थतोमाभव २ जिव्हाः ३ सर्पाः ४ प्रतीकारः ५ उपानहाचर्मपादुकया- णामुखभंगः ६ विष्ठादिअशुचि, ७ नौका, ८ अंकुशः ९ ममप्रयत्नः १० आलवालः ११ कंदर्पः कांदाइतिप्र०

यदर्शनकुंभ्लेषी दुकुल्वेणीपुन पिशुनः ॥ ११ ॥
सर्वास्तुंब्यःसमकटुरसास्तुंबिनक्षीनसक्ता
स्ताःसंबन्धाअपिकतिपंथाडुल्तरंतारयंति ॥
शंब्दार्थतिसरसमपराःशुष्ककाष्ठेनिषण्णा
स्तन्मध्येऽग्न्याज्वलितहृदयाःरीणितंसंवहंति ॥ १२ ॥
धातस्तावतवैवदूषणमिदंयन्नामकस्तूरिका
कांतारांतरचारिणांतृणभुजांयन्नाभिमूलेकृता ॥
यद्येवंपिशुनस्यहंतरसनामूलेऽकरिष्यस्तदा
माऽऽयासेनविनाऽभविष्यदतुलाकीर्तिश्चनिर्दोषता ॥ १३ ॥
कस्तूरिकांतृणभुजामटवीचराणां
निक्षिप्यनाभिषुचकारचतान्वधार्हान् ॥
मूढोविधिःसकलदुर्जनलोलजिव्हा
मूलेस्मनिक्षिपतिचेत्सकलोपकारः ॥ १४ ॥
तेवैसत्पुरुषाःपरार्थघटकाःस्वार्थंपरित्यज्यये
सामान्यास्तुपरोपकारनिरताःस्वर्थाऽविरोधेनये ॥
तेऽमीमानुषराक्षसाःपरहितंस्वार्थायनिघ्नंतिये
येतुघ्नंतिनिरर्थकंपरहितंतेकेनजानीमहे ॥ १५ ॥
यत्रात्मीयोजनोनाऽस्ति भेदस्तत्रनविद्यते ॥
कुंठारैर्दंडनिर्मुक्तै भिद्यंतेतरवःकथं ॥ १६ ॥
दुर्जनंप्रथमंवंदे सज्जनंतदनंतरं ॥
मुखप्रक्षालनात्पूर्वं गुदप्रक्षालनंयथा ॥ १७ ॥
दह्यमानाःसुतीक्ष्णेन नीचाःपरयशोऽग्निना ॥
अशक्तास्तत्पदंगंतुं ततोनिंदांप्रकुर्वते ॥ १८ ॥
दुर्जनदूषितमनसां पुंसांसुजनेऽप्यविश्वासः ॥
बालःपायसदग्धो दध्यपिफूत्कृत्यभक्षयति ॥ १९ ॥
नौश्चदुर्जनजिव्हाच प्रतिकूलविसर्पिणी ॥

---

१ मुंमुखइतिलोके २ तुंबीफलानि. ३ शब्दंकुर्वंति. ४ रक्तं. ५ दुर्गममार्गसंचारि-णां. ६ सूचकस्य. ७ जिव्हामूले. ८ प्रकृष्टेनयत्नेन. ९ वनं. १० [illegible]
११ फूत्कारंकृत्वा. १२ प्रतितीरं. पक्षे विरुद्धं

पेस्मेतारकायैव दारुणाकिंननिर्मिता ॥ २० ॥
दुर्जनंसुजनंकर्तुं नोपकारशतैरपि ॥
अपानंमृत्सहस्रेण धौतंचास्यंकथंभवेत् ॥ २१ ॥
यथैकुंभशकलेनवैमलं बालकस्यजननीव्यपोहति ॥
तद्वदोषवदनेनदुर्जनो मातृतःशतगुणाऽधिकोभवेत् ॥ २२ ॥
अप्यात्मनोविनाशं गणयतिनखलःपरव्यसनहृष्टः ॥
प्रायोमस्तकनाशे समरमुखेनृत्यतिकबंधः ॥ २३ ॥
जलनिधौजननंधवलंवपु र्मुररिपोरपिपाणितलेस्थितिः ॥
इतिसमस्तगुणान्वितशंखभो कुटिलताहृदयेननिवारिता ॥ २४ ॥
दुर्जनस्यविशिष्टत्वं परोपद्रवकारिणां ॥
व्याघ्रस्यचोपवासेन पारणंपशुमारणं ॥ २५ ॥
किंशुकेशुकमातिष्ठ चिरकालफलेच्छया ॥
बाह्यरंगप्रसंगेन केकेनाऽनेनवंचिताः ॥ २६ ॥
सुमुखोऽपिसुवृत्तोपि सन्मार्गेपतितोऽपिच ॥
महतांपादलग्नो पिव्यथयत्येवकंटकः ॥२७ ॥
रविरपिनदहतिताद्दक् याद्दक्दहतिवालुकानिकरः ॥
अन्यस्माल्लब्धपदो नीचःप्रायेणदुःसहोभवति ॥ २८ ॥
त्यक्तापिनिजप्राणान परहितविघ्नंखलःकरोत्येव ॥
कवलेपतितासद्यो वमयतिमक्षिकाऽन्नभोक्तारं ॥ २९ ॥
सत्यज्यशूर्पवद्दोषान् गुणान्गृण्हातिपंडितः ॥
दोषग्राहीगुणत्यागी पल्लोलीवहिदुर्जनः ॥ ३० ॥
नलिकागतमपिकुटिलं नभवतिसरलंशुनःपुच्छं ॥
तद्वत्खलजनहृदयं बोधितमपिनैवयातिमाधुर्यं ॥ ३१ ॥
भिक्षोकंथाश्लथातेनहिशफरिवधेजालमश्नासिमत्स्यां
स्तेवैमद्योपदंशाःपिबसिमधुसमंवेश्ययायासिवेश्यां ॥
दत्वाऽंघ्रिमूर्ध्न्यरीणांतवकिमुरिपवोभित्तिभेत्ताऽसिचौरो

---

१ परिवारमकर्षणतारण. पक्षे बंधनं. २ दारुणाभयकरा. पक्षे दारुणाकाष्ठेन. ३ अ-कोपि शक्नोतीतिशेषः ४ भिन्नशरावखंडेन. ५ अशिरस्ककलेवरं. ६ कौटिल्यं. ७ पल्ला-समूले. ८ वालुकासमूहः ९ वांतिकरोति. १० चालनीतिलोके.

चोरोऽसिद्यूतहेतोस्त्वयिसकलमिदंनाऽस्तिनष्टेविचारः ॥२२॥
विद्याविवादायधनंमदाय शक्तिःपरेषांपरपीडनाय ॥
खलस्यसाधोर्विपरीतमेत ज्ज्ञानायदानायचरक्षणाय ॥ २३ ॥
सद्वंशजातंगुणकोटियुक्तं धनुःकथंपार्थिववामहस्ते ॥
शरःपरमाणविहारदक्षः सपक्षपातोऽप्यधमोगरीयान् ॥ २४ ॥
अकस्मादेवकुप्यंति प्रसीदंत्यनिमित्ततः ॥
शीलमेतदसाधूनां मभ्रंपारिप्लवयथा ॥ २५ ॥
संवर्धितोपिभुजगःपयसानवश्य
स्तत्पालकानपिनिहंतिचलेनसिंहः ॥
दुष्टःपरैरुपकृतस्तदनिष्टकारी
विश्वासलेशइहनैवबुधैर्विधेयः ॥ २६ ॥
अशक्ताःशक्तिमात्मीयां श्लाघयंतेचदुर्जनाः ॥
तेभवंत्युपहासाय महतामेवसन्निधौ ॥ २७ ॥
एवंस्निग्धतमाइति मामाक्षुद्रेषुयातविश्वासं ॥
सिद्धार्थानामेषां स्नेहोऽप्यश्रूणिपातयति ॥ २८ ॥
गुणिनांगुणेषुसत्स्वपि पिशुनजनोदोषमात्रमादत्ते ॥
पुष्पेफलेविरागी क्रमेलकःकंटकौघमिव ॥ २९ ॥
सुजनानामपिहृदयं पिशुनपरिष्वंगमलिनमिहभवति ॥
पवनःपरागवाही रथ्यासुवहन्रजस्वलोभवति ॥ ४० ॥
विद्ययाविमलयाऽप्यलंकृतो दुर्जनःसदसिमाऽस्तुकश्चन ॥
साक्षराहिविपरीततांगताः केवलंजगतितेऽपिराक्षसाः ॥ ४१ ॥
अहोदुर्जनसंसर्गा न्मानहानिःपदेपदे ॥
पावकोलोहसंगेन मुद्गरैरभिहन्यते ॥ ४२ ॥
परिपूर्णेऽपितटाके काकःकुंभोदकंपिबति ॥
अनुकूलेऽपिकलत्रे नीचःपरदारलंपटोभवति॥ ४४ ॥

---

१ वेणुः कुलंच. २ मौर्वीविद्याविनयादिश्च. ३ अय, संख्याविशेषश्च. ४ पंचलं ५ श्लाघांकुर्वंति. ६ शिरीषाणां. पक्षेसिद्धः अर्थः कार्यं येषां. ७ तैलं, स्नेहभावश्च, ८ नेत्रोदकं. ९ उष्ट्रः १० वीथीषु ११ रजोयुक्तः १२ सभायां.

सर्वलोकपरितोषकारिणि स्वर्धुनीविमलवारिणिस्थिते ॥
पूतिगंधवतिपल्वलोदके सूकरःसुखमतीवमन्यते ॥ ४५ ॥

उपकारिणिविश्रब्धे शुद्धमतौयःसमाचरतिपापं ॥
तंजनमसत्यसंधं भगवतिवसुधेकथंवहसि ॥ ४६ ॥

दुर्जनेनसमंसख्यं प्रीतिंचाऽपिनकारयेत् ॥
उष्णोदहतिचांऽगारः शीतःकृष्णायतेकरं ॥ ४७ ॥

दुर्जनःप्रियवादीच नैतद्विश्वासकारणं ॥
मधुतिष्ठतिजिव्हाऽग्रे हृदिहालाहलंविषं ॥ ४८ ॥

प्राक्पादयोःपततिखादतिपृष्ठमांसं
कर्णेकलंकिमपिरौतिशनैर्विचित्रं ॥
छिद्रंनिरूप्यसहसाप्रविशत्यशंकः
सर्वंखलस्यचरितंमशकःकरोति ॥ ४९ ॥

मृद्घटवत्सुखभेद्यो दुःसंधानश्चदुर्जनोभवति ॥
सुजनस्तुकनकघटव दुर्भेद्यश्चाशुसंधेयः ॥ ५० ॥

मनस्यन्यद्वचस्यन्य त्कार्येचाऽन्यद्दुरात्मनां ॥
मनस्येकंवचस्येकं कर्मण्येकंमहात्मनां ॥ ५१ ॥

दूरादुच्छ्रितपाणिरार्द्रनयनःप्रोत्सारिताऽर्धासनो
गाढाऽऽलिंगनतत्परःप्रियकथाप्रश्नेषुदत्ताऽऽदरः ॥
अंतर्भूतविषोबहिर्मधुमयश्चाऽतीवमायापटुः
कोनामाऽयमपूर्वनाटकविधिर्यःशिक्षितोदुर्जनैः ॥५२॥

अकरुणत्वमकारणविग्रहः परधनेपरयोषितिचस्पृहा ॥
सुजनबंधुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदंहिदुरात्मनां ॥५३॥

जाड्यंह्रीमतिगण्यतेव्रतरुचौदंभःशुचौकैतवं
शूरेनिर्घृणतामुनौविमतितादैन्यंप्रियालापिनि ॥

---

१ दुर्गंधवति. २ अल्पजलाशयोदके. ३ असत्यप्रतिज्ञं. ४ शब्दंकरोति. ५ मत्सरहितोके. ६ दुःखेनसंधातुमशक्यः ७ कपटपटुः ८ निरर्थकविरोधः ९ इच्छा. १० असहनशीलता. ११ स्वभावसिद्धं. १२ लज्जावति. १३ व्रतेषुरुचिःप्रीतिर्यस्यतस्मिन्. १४ शाठ्य. १५ निर्दयता. १६ मननशीले. १७ दीनत्वं

तेजस्विन्यवलिप्ततामुखरतावकर्यशक्तिःस्थिरे
तत्कोनामगुणोभवेत्सुगुणिनांयोदुर्जनैर्नांऽकितः ॥ ५४ ॥
उद्भासिताखिलखलस्यविशृंखलस्य
प्राग्जातविस्मृतनिजाऽधमकर्मवृत्तेः ॥
दैवादवाप्तविभवस्यगुणद्विषोऽस्य
नीचस्यगोचरगतैःसुखमाप्यतेकैः ॥ ५५ ॥
मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनां ॥
लुंब्धकधीवरपिशुना निष्कारणवैरिणोजगति ॥ ५६ ॥
अतिमलिनेकर्तव्ये भवतिखलानामतीवनिपुणाधीः ॥
तिमिरेहिकौशिकानां रूपंप्रतिपद्यतेदृष्टिः ॥ ५८ ॥
परवादेदशवदनः पररंध्रनिरीक्षणेसहस्राक्षः ॥
सद्वृत्तवित्तहरणे बाहुसहस्रार्जुनोनीचः ॥ ५९ ॥
विशिखव्यालयोरंत्यं वर्णाभ्यांयोविनिर्मितः ॥
परस्यहरतिप्राणान् नैतच्चित्रंकुलोचितं ॥ ६० ॥
विषमामलिनात्मानो द्विजिह्वाजिह्मगाइव ॥
जगत्प्राणहरानित्यं कस्यनोद्वेजकाःखलाः ॥ ६१ ॥
परिशुद्धामपिवृत्तिं समाश्रितोदुर्जनःपरान्व्यथते ॥
पवनाशिनोपिभुजगाः परपरितापंनमुंचंति ॥ ६२ ॥
जीवनेग्रहणेनम्रा गृहीत्वापुनरुन्नताः ॥
किंकनिष्ठाःकिमुज्येष्ठा घटीयंत्रस्यदुर्जनाः ॥६३॥
अपूर्वःकोपिकोपाऽग्निः सज्जनस्यखलस्यच ॥
एकस्यशाम्यतिस्नेहा द्वर्धतेऽन्यस्यवारितः ॥ ६४ ॥
पादाऽऽहतोऽपिदृढदंडसमाऽऽहतोऽपि
यंदंष्ट्रयास्पृशतितंकिलहंतिसर्पः ॥

---

१ सगर्वता. २ वाचालत्वं. गर्हंवाक्त्वमितियावत् ३ आविष्कृतसकलदुष्टस्य. ४ अमर्यादस्य. ५ पारधीतिलोके. ६ निष्कारणशत्रवः ७ अत्यंतमलदूषिते. ८ पूर्णा. ९ तमसि. १० घूकानां. घुबडइतिलो० ११ बाणः १२ सर्पः १३ अंत्यवर्णौ खलइति. १४ वक्राः १५ दुष्टस्वभावाः १६ सर्पाइव. १७ व्यथाकरोति. १८ वायुभक्षकाअपि. १९ उदकंप्राणश्च.

ईर्षादिदोषपिशुनोऽयमनुष्यधर्मा
कर्णेपरस्यवदतिह्यपरस्यमूलं ॥ ६५ ॥
यस्मिनवंशेसमुत्पन्नस्तमेवनिजचेष्टितैः ॥
दूषयत्यचिरेणैव घुणकीटइवाऽधमः ॥ ६६ ॥
भेरयतिपरमनार्यः शक्तिविहीनोऽपिजगदभिद्रोहे ॥
तेजयतिशस्त्रधारां स्वयमसमर्थःशिलांछेत्तुं ॥ ६७ ॥
स्वभावकठिनस्याऽस्य कृत्रिमांबिभ्रतोनैतिं ॥
गुणोऽपिपरहिंसायै चापस्यचखलस्यच ॥ ६८ ॥
अयःपिंडइवोत्तप्ते खलानांत्हृदयेक्षणात ॥
पतिताएवनश्यंति गुणास्तोयकणाइव ॥ ६९ ॥
वक्रतांबिभ्रतोयस्य गुह्यमेवप्रकाशते ॥
कथंचनसमानःस्या त्पुच्छेनपिशुनःशुनः ॥ ७० ॥
शिरसिविधृतोऽपिनित्यं यत्नादपिसेवितोर्बहुस्नेहैः ॥
तरुणीकचइवनीचः कौटिल्यंनैवविजहाति ॥ ७१ ॥
यथायथैवस्नेहेन भूयिष्ठमुपचर्यते ॥
धत्तेतथातथातापं महावैश्वानरःखलः ॥ ७२ ॥
स्तोकेनोन्नतिमायाति स्तोकेनाऽऽयात्यधोगतिं ॥
अहोनुसदृशीवृत्ति स्तुलायष्टेःखलस्यच ॥ ७३ ॥
दुर्जनःकृतशिक्षोऽपि सज्जनोनैवजायते ॥
अपिगंगाजलस्नाना दधःकेशःकुशायते ॥ ७५ ॥
खलःसत्क्रियमाणोऽपि ददातिकलहंसतां ॥
दुग्धधौतोऽपिकिंयाति वायसःकलहंसतां ॥ ७६ ॥
बिभ्राणागरलंकंठे भुजंगपरिवेष्टिता ॥
शांभवीवतनुःकस्य नवंद्यादौर्जनीसभा ॥ ७७॥

---

१ वेणौ. कुलेच. २ स्वकर्मभिः ३ घाळवीति लोके. ४ क्रियपानिर्वृत्ता. कपटयुक्ताच. ५ नम्रत्व ६ मौर्वी. विनयादिश्च. ७ धनुषः ८ बहुप्रकारैःस्नेहैःसुगंधतैलादिभिः ९ बाहुल्येन. १० पूज्यते. ११ तुलायष्टेःदांडीतिप्रसिद्धायाः १२ कलि. १३ साधूनां १४ काकः १५ राजहंसत्वं. १६ सर्पैः परिवेष्टिता. पक्षे जारैः परिवेष्टिता. १७ दुर्जनसंबंधिनी.

अक्षमालापवृत्तिज्ञा कुशासनपरिग्रहा ॥
आजीवदौर्जनीसंस इंदनीयासमेखला ॥ ७८ ॥
पात्रमपात्रीकुरुते दहतिगुणांस्नेहमाशुनाशयति ॥
अमलेमलंनियच्छति दीपज्वालेवखलमैत्री ॥ ७९ ॥
दुर्वृत्तसंगतिरनर्थपरंपराया हेतुःसतांभवतिकिंवचनीयमेतत् ॥
लंकेश्वरोहरतिदाशरथेःकलत्रं प्राप्नोतिबंधमथदक्षिणसिंधुराजः॥८०॥
खलःकरोतिदुर्वृत्तं नूनंफलतिसाधुषु ॥
दशाननोऽहरत्सीतां बंधनंचमहोदधेः ॥ ८१ ॥
करोतिस्वमुखेनैव बहुधान्यस्यखंडनं ॥
नमःपतनशीलाय मुसलायखलायच ॥ ८२ ॥
नदेवायनधर्माय नासिंधुभ्योनचार्थिने ॥
दुर्जनस्याऽर्जितंवित्तं भुज्यतेराजतस्करैः ॥ ८३ ॥
मुखंपद्मदलाकारं वाचाचंदनशीतला ॥
हृदयंक्रोधसंयुक्तं त्रिविधंधूर्तलक्षणं ॥ ८४ ॥
कृतमपिमहोपकारं पयइवपीत्वानिरातंकः ॥
प्रत्युतहंतुंयतते काकोदरसोदरःखलोजयति ॥ ८५ ॥
वहतिविषधरान्पटीरजन्मा शिरसिमषीपटलंदधातिदीपः ॥
विधुरपिभजतेतरांकलंकं पिशुनजनंखलुबिभ्रतिक्षितींद्राः ॥८७॥
रेखलतवखलुचरितं विदुषामग्रेविविच्यवक्ष्यामि ॥
अथवाऽलंपापात्म न्कृतयाकथयाऽपितेहतया ॥ ८८ ॥
आनंदमृगदावाऽग्निः शीलशाखिमदद्विपः ॥
ज्ञानदीपमहावायु रयंखलसमागमः ॥ ८९ ॥

---

१ अक्षमाः ये आलापास्तेषांवृत्तिज्ञा. पक्षे अक्षमालाजपमालातस्याअपवृत्तिःभ्रमणंजानातीति. २ कुत्सितंयत्शासनंशिक्षातस्यपरिग्रहोऽवलंबोयस्याःसा. पक्षेकुशासनंदर्भासनंतत्परिग्रहःस्वीकारोयस्याः ३ समेसाधौस्खला. पक्षे मेखलयासहिता. ४ अयोग्यं. ५ सूत्रं विनयादिश्च. ६ तैलं, प्रीतिश्च ७ मषीं दोषंच. ८ बहुधाअन्यस्यपरस्य पक्षे पुष्कलधान्यस्यखंडनंचूर्णं. ९ निःशंकः १० वैपरीत्ये. ११ सर्पबंधुः १२ सर्पान् १३ चंदनः १४ आनंदएवमृगस्तस्यदावाग्निरिवदाहकत्वात्. १५ शीलमेवशाखीवृक्षस्तस्यमदद्विपइव उन्मूलकत्वात्. १६ ज्ञानमेवदीपस्तस्यमहावातः निर्वाणकरत्वात्.

निष्णातोऽपिचवेदानि साधुत्वंनैतिदुर्जनः ॥
चिरमग्नोजलनिधौ मैनाकइवमार्दवम् ॥ ९० ॥
खलःसज्जनकार्पास रक्षणैकहुताशनः ॥
परदुःखाऽग्निशमन मारुतःकेनवर्ण्यताम् ॥ ९१ ॥
पर्शःसौरभ्यलशुनः शांतिशैत्यहुताशनः ॥
कारुण्यकुसुमाऽऽकाशः खलःसज्जनदुःखदः ॥९२ ॥
खलास्तुकुशलाःसाधु हितप्रत्यूहकर्मणि ॥
निपुणाःफणिनःप्राणा नपहर्तुंनिरागसां ॥ ९४ ॥
वदनेविनिवेशिताभुजंगी पिशुनानांरसनामिषेणधात्रा ॥
अनयाकथमन्यथाऽवलीढा नहिजीवतिजनामनागमंत्राः९५
उन्नतंपदमवाप्ययोलघु र्हेलयैवसपतेदितिब्रुवन् ॥
शैलशेखरगतःपृषद्गणं श्चारुमारुतधुतःपतत्यधः ॥ ९६ ॥
नन्वाश्रयस्थितिरियंतवकालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ॥
प्रागर्णवस्यहृदयेवृषलक्ष्मणोऽथ
कंठेऽधुनावससिवाचिपुनःखलानां ॥ ९७ ॥
अंतर्मलिनदेहेन बहिराल्हादकारिणा ॥
महाकालफलेनेव केखलेननवंचिताः ॥ ९८ ॥
अंतर्वाणिमन्यमानःखलोऽयं पौरोभाग्यंसूक्तिमुक्तासुधत्ते ॥
सर्वाऽऽनंदिन्यंगकेकामिनीना मीर्मीमांगन्येषवैवंभरालिः ॥ ९९ ॥
अपिवेत्तिषडक्षराणिचे दुपदेष्टुंशितिकंठमिच्छति ॥
वसनाऽशनमात्रमस्तिचे द्धनदादप्यतिरिच्यतेखलः ॥ १०० ॥

---

१ धक्षणंदहनं. २ कीर्तिरेवसौगंध्यंतत्राशकत्वाल्लशुनइव, लशुनोहिकस्तूर्यादेःसौगं-ध्यंनाशयतीतिप्रसिद्धिः ३ शांतिरेवशैत्यंतत्राशकत्वादग्निरिव. ४ कारुण्यमेवकुसुमंत-स्याकाशः आकाशस्ययथापुष्पंकदापिनोपलभ्यतेतद्वत्खलेकारुण्यंकदापिनोपलभ्यतइत्यर्थः ५ विघ्नः ६ निरपराधानां. ७ जिव्हाछलेन. ८ अंबुकणसमुदायः ९ कंपितः १० आ-श्रयोनिवासस्तत्रस्थितिः ११ सदाशिवस्य. १२ तालफलेन. १३ अंतर्वाणिस्तुशास्त्र-वित्. १४ दोषैकदृक्त्व. १५ सूक्तयएवमुक्ताःमुक्ताफलानितासु. १६ सर्वेषामाल्हादके १७ अर्णं, १८ शोधयति. १९ मक्षिका. २० शिवं. २१ कुबेरात्.

अर्थग्रहणेनतथा दुनोतिकटुकूजितैर्यथापिशुनः ॥
रुधिराऽऽदानादधिकं दुनोतिकर्णेकणन्मशकः ॥ १०१ ॥
विध्वस्तपरगुणानां भवतिखलानामतीवमलिनत्वं ॥
अंतरितशशिरुचामपि सलिलमुचांमलिनिमाऽभ्यधिकः ॥१०२॥
परगुह्यगुप्तिनिपुणं गुणमयमखिलैःसमीहितंनितरां ॥
ललितांऽबरमिवसज्जन माखवइवदूषयंतिखलाः ॥ १०३ ॥
त्यजतिचगुणान्सुदूरं तनुमपिदोषंनिरीक्ष्यगृण्हाति ॥
मुक्ताऽलंकृतकेशान् यूकामिववानरःपिशुनः ॥ १०४ ॥
कस्त्वंभद्रखलेश्वरोहमिहकिंघोरेवनेस्थीयते
शार्दूलादिभिरेवहिंस्रपशुभिःखाद्योहमित्याशया ॥
कस्मात्कष्टमिदंत्वयाव्यवसितंमद्देहमांसाशिनः
प्रत्युत्पन्ननृमांसभक्षणधियस्तेघ्नंतुसर्वान्नरान् ॥ १०५ ॥

दुर्जननिंदा.

अहोमेकृतिसादृश्यं श्लेष्मणोदुर्जनस्यच ॥
मधुरैःकोपमायाति कटुकेनैवशाम्यति ॥ १ ॥
ईषल्लब्धप्रवेशोऽपि स्नेहविच्छेदकारकः ॥
कृतक्षोभोनेरीनर्ति खलोमंथनदंडवत् ॥ २ ॥
विवृण्वतीपुरस्तैक्ष्ण्यं पृष्ठतःकुर्वतीगुणं ॥
कर्णान्विध्यतिलोकस्य सूचीवत्सूचकस्यवाक् ॥ ३ ॥
दोषैऽऽलोकननिपुणाः परुषगिरोदुर्जनाश्चकाकाश्च ॥
दर्शनमपिभयजननं येषामनिमित्तपिशुनानां ॥ ४ ॥
पिशुनत्वमेवविद्या परदूषणमेवभूषणंयेषां ॥
परदुःखमेवसौख्यं शिवशिवतेकेनवेधसासृष्टाः ॥ ५ ॥

---

१ संतापयति. २ गुणगुणइतिशब्दंकुर्वन्. ३ नाशिताः ४ मेघानां. ५ मालिन्यं. ६ गुह्यगोपनेनिपुणं. ७ तंतुप्रचुरं पक्षे दयादाक्षिण्यादिप्रचुरं. ८ सूक्ष्मं ९ उ इतिलोके. १० खलराजः ११ व्याघ्रादिभिः १२ घातकपशुभिः १३ भक्षणीयः १४ स्वभावसाम्यं. १५ कफस्य. १६ स्वादुद्रव्यैःवचनैश्च. १७ अतिशयेनपुनःपुनर्वानृत्यति. १८ घूकपक्षे-दोषारात्रिः

विद्वत्प्रशंसा.

श्रीगणेशंवंदे ॥ रोहणंसूक्तिरत्नानां वंदेवृंदंविपश्चितां ॥
यन्मध्यपतितोनीचः काचोप्युच्चैर्महीयते ॥ १ ॥
शास्त्रोपस्कृतशब्दसुंदरगिरःशिष्यप्रदेयाऽऽगमा
विख्याताःकवयोवसंतिविषयेयस्यप्रभोर्निर्धनाः ॥
तज्जाड्यंवसुधाधिपस्यकवयोह्यर्थंविनापीश्वराः
कुत्स्याःस्युःकुपरीक्षकानमणयोयैरर्घतःपातिताः ॥ २ ॥
विद्वानेवविजानाति विद्वज्जनपरिश्रमं ॥
नहिवंध्याविजानाति गुर्वींप्रसववेदनाम् ॥ ३ ॥
हर्तुर्यातिनगोचरंकिमपिशंपुष्णातियत्सर्वदा
ह्यर्थिभ्यःप्रतिपाद्यमानमनिशंप्राप्नोतिवृद्धिपरां ॥
कल्पांतेष्वपिनप्रयातिनिधनंविद्याख्यमंतर्धनं
येषांतान्प्रतिमानमुज्झतनृपाःकस्तैःसहस्पर्धते ॥ ४ ॥
अधिगतपरमार्थान्पंडितान्माऽवमंस्था
स्तृणमिवलघुलक्ष्मीर्नैवतान्संरुणद्धि ॥
अभिनवमदलेखाश्यामगंडस्थलानां
नभवतिबिसतंतुर्वारणंवारणानाम ॥ ५ ॥
विद्वत्त्वंचनृपत्वंच नैवतुल्यंकदाचन ॥
स्वदेशेपूज्यतेराजा विद्वान्सर्वत्रपूज्यते ॥ ६ ॥
हयतुरगशतैःप्रयांतिमूर्खा धनरहिताश्चबुधाःप्रयांतिपद्भ्यां ॥
गिरिशिखरगताऽपिकाकपंक्तिः पुलिनगतैर्नसमत्वमेतिहंसैः ॥ ७ ॥
अलंकरोतियःश्लोकं शुकएवनमध्यमः ॥
अलंकरोतियःश्लोकं शुकंएवनमध्यमः ॥ ८ ॥

---

१ पूज्यते. मर्णायतइतिपाठेमणिरिवगण्यतइत्यर्थः २ शास्त्रसंस्कारेणशुद्धाःशब्दास्तैःसुंदरा:गिरोयेषांते. ३ पण्डिताः ४ देशे. ५ मौर्ख्ये. ६ मूल्यतः ७ महतीं. ८ प्रसवकाले या वेदना (वेणा) तां. ९ अचिंत्यं. १० सुखं. ११ दीयमानं. १२ निरंतरं. १३ त्यजत. १४ स्पर्धांकरोति. १५ अवमानमाकुरु. १६ रोधनकुरुते. १७ गजानां. १८ सैकतगतैः १९ पर्यासंकरोति. निषेधति तिरस्करोतीतिवाक्यादितिवा. २० [illegible] शुकः नकारोमध्येयस्यएवंविधःशुनकःश्वाइत्यर्थः

उदीरितोऽर्थःपशुनाऽपिगृह्यते हयाश्चनागाश्चवहंतिचोदिताः ॥
अनुक्तमप्यूहतिपंडितोजनः परेंगितज्ञानफलाहिबुद्धयः ॥ ९ ॥

पंडितेहिगुणाःसर्वे मूर्खेदोषाश्चकेवलाः ॥
तस्मान्मूर्खसहस्रेषु प्राज्ञएकोनलभ्यते ॥ १० ॥
सदोषमपिनिर्दोषं भवत्यग्रेविपश्चितः ॥
रोमस्येवार्जुनवपुः कवेश्चसरसंवचः ॥ ११ ॥
अभ्यार्जगद्धितमयीमनसःप्रवृत्ति
रम्यैककाऽपिरचनावचनाऽऽवलीनाम् ॥
लोकोत्तराचकलिराकृतिरंगतश्च
विद्यावतांसकलमेवगिरांदवीयः ॥ १२ ॥

गुणदोषौबुधोगृण्हन्निंदुक्ष्वेडाविवेश्वरः ॥
शिरसाश्लाघतेपूर्वं परंकंठेनियच्छति ॥ १३ ॥
स्थिराशैलीगुणवतां खलबुध्यानबाधते ॥
रत्नदीपस्यहिशिखा वात्ययापिननाश्यते ॥ १४ ॥
यदिसंतिगुणाःपुंसां विकसंत्येवकेवलं ॥
नहिकस्तूरिकाऽऽमोदः शपथेनविभाव्यते ॥ १५ ॥
मंदोऽप्यमंदतामेति संसर्गेणविपश्चितः ॥
पंकच्छिदःफलस्येव निकषेणाऽऽविलंपयः ॥ १६ ॥
अर्थाहरणकौशल्यं किंस्तुमःशास्त्रवादिनां ॥
अव्ययेभ्योऽपियेषाऽर्थान् निष्कर्षंतिसहस्रशः ॥ १७ ॥
केलावतःसैवकला ययाऽर्थःक्रियतेभवे ॥
बह्वीभिश्चकलाभिःकिं यामि रंकःस्फुटीकृतः ॥ १८ ॥

---

१ उच्चारितः २ प्रेरिताः ३ तर्कयति ४ अभिप्रायः ५ दोषसहितं पक्षेदोषाहस्त वस्तसहितं ६ परशुरामस्य. ७ सहस्रार्जुनशरीरं. ८ लोकहितमधुरा. ९ अतिदूरं. १० गरले. ११ रीतिः १२ वावटलइतिलोके. १३ कतकफलस्येव. १४ कलुषं (गढूळइतिलो०) १५ वहुकं १६ अव्ययेभ्यः अव्ययानामनेकार्थत्वात्. पक्षेव्ययरहितेभ्यः कृपणेभ्यइतिवा-च्यं. १७ पंडुरत्न. पक्षेविदुषः १८ अर्थोभावे क्रियते. पक्षेनिरलिक्रियते. १९ शिवः ... सारस्य. २० कलंकः दोषश्च. २१ स्पष्टीकृतः

१४

मूर्ख वर्णनं.

श्रीगणेशंवंदे ॥ अज्ञःसुखमाराध्यः सुखतरमाराध्यतेविशेषज्ञः ॥

ज्ञानलवदुर्विदग्धं ब्रह्माऽपितंनरंनरंजयति ॥ १ ॥

प्रसह्यमणिमुद्धरेन्मकरवक्त्रदंष्ट्रांऽकुरा

त्समुद्रमपिसंतरेत्प्रचलदूर्मिमालाऽऽकुलं ॥

भुजंगमपिकोपितंशिरसिपुष्पवद्धारये

न्नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ २ ॥

लभेतसिकतासुतैलमपियत्नतःपीडयन्

पिबेच्चमृगतृष्णिकासुसलिलंपिपासार्दितः॥

कदाचिदपिपर्यटन्शशविषाणमासादये

न्नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ३ ॥

व्यालंबालमृणालतंतुभिरसौरोद्धुंसमुज्जृंभते

छेत्तुंवज्रमणीन्शिरीषकुसुमप्रांतेनसन्नह्यते ॥

माधुर्यंमधुबिंदुनारचयितुंक्षारांबुधेरीहते

नेतुंवांछतियःखलान्पथिसतांसूक्तैःसुधास्यंदिभिः ॥४॥

यदाकिंचिज्ज्ञोऽहंद्विपइवमदांऽधःसमभवं

तदासर्वज्ञोऽस्मीत्यभवदवलिप्तंममनः ॥

यदाकिंचित्किंचिद्बुधजनसकाशादवगतं

तदामूर्खोऽस्मीतिज्वरइवमदोमेव्यपगतः ॥ ५ ॥

कृमिकुलचितंलालाक्लिन्नंविगंधिजुगुप्सितं

निरुपमरसंप्रीत्याखादन्नराऽस्थिनिरामिषं ॥

सुरपतिमपिश्वापार्श्वस्थंविलोक्यनशंकते

---

१ विकृतिभावंगतं २ रंजयितुमसमर्थोभवति. ३ बलात्कारंकृत्वा. ४ ज्ञानलेशगु- णत्वेनविपरीतार्थग्राही. ५ वालुकासु. ६ मरीचिकासु. ७ शशशृंगं. ८ सर्पं. ९ शिरसि. १० हीरकादीन्. ११ सर्षपपुष्प. १२ सन्नद्धोभवति. १३ इच्छति. १४ अमृतस्राविभिः १५ गजइव. १६ सगर्वं. १७ संतापः यद्वाज्वरइवेतिछेदः ज्वरेयथामदोगच्छतितथेत्यर्थः १८ कीटकसमूहैर्व्याप्तं. १९ लालयाक्लिन्नमार्द्रं. २० आमगंधि. २१ गर्हितं. २२ निर्मांसं. २३ इंद्रं.

नहिगणयतिक्षुद्रोजंतुःपरिग्रहफल्गुतां ॥ ६ ॥
शिरःशार्वंस्वर्गात्पशुपतिशिरस्तःक्षितिधरं
महीध्रादुत्तुंगादवनिमवनेश्चाऽपिजलधिं ॥
अधोऽधोगंगेयंपदमुपगतास्तोकमधुना
विवेकभ्रष्टानांभवतिविनिपातःशतमुखः ॥ ७ ॥
शक्योवारयितुंजलेनहुतभुक्छत्रेणसूर्याऽऽतपो
नागेंद्रोनिशितांकुशेनसमदोदंडेनगोगर्दभौ ॥
व्याधिर्भेषजसंग्रहैश्चविविधैर्मंत्रःप्रयोगैर्विषं
सर्वस्यौषधमस्तिशास्त्रविहितंमूर्खस्यनाऽस्त्यौषधं ॥८॥
सौहित्यसंगीतकलाविहीनः साक्षात्पशुःपुच्छविषाणहीनः ॥
तृणंनखादन्नपिजीवमान स्तद्भागधेयंपरमंपशूनाम् ॥ ९ ॥
येषांनविद्यानतपोनदानं ज्ञानंनशीलंनगुणोनधर्मः ॥
तेमृत्युलोकेभुविभारभूता मनुष्यरूपेणमृगाश्चरंति ॥ १० ॥
वरंपर्वतदुर्गेषु भ्रांतंवनचरैःसह ॥
नमूर्खजनसंपर्कः सुरेंद्रभवनेष्वपि ॥ ११ ॥
यस्यनाऽस्तिस्वयंप्रज्ञा शास्त्रंतस्यकरोतिकिं ॥
लोचनाभ्यांविहीनस्य दर्पणःकिंकरिष्यति ॥ १२ ॥
मूर्खोऽपिमूर्खंदृष्ट्वाच चंदनादतिशीतलः ॥
यदिपश्यतिविद्वांसं मन्यतेपितृघातक ॥ १३ ॥
गुणिगणगणनाऽऽरंभे नपततिकठिनीसुसंभ्रमाद्यस्य ॥
तेनाऽम्बायदिसुतिनी वदवंध्याकीदृशीभवति ॥ १४ ॥
अंतःसारविहीनस्य सहायःकिंकरिष्यति ॥
मलयेऽपिस्थितोवेणु र्वेणुरेवनचंदनः ॥ १५ ॥
मुक्ताफलैःकिंमृगपक्षिणांच मिष्टान्नपानंकिमुगर्दभाणां ॥
अंधस्यदीपोबधिरस्यगीतं मूर्खस्यकिंधर्मकथाप्रसंगः ॥ १६ ॥

---

१ तुच्छकत्वं. २ शर्वसंबंधि. ३ मस्तकात्. ४ तीक्ष्णः ५ साहित्यशास्त्रं. ६ गायनं. ७ शृंगं. ८ दैवं. ९ सुरेंद्राणांभवनेषु स्वर्गादिलोकेष्वपीत्यर्थः १० लेखनी. तस्स्थानी वा कनिष्ठिकांगुलिर्वा. ११ पुत्रिणी. १२ मज्जास्थिरांशोबलवा.

व्यासादीन्कविपुंगवान्नृपचितैर्वाक्यैःसतींकृत
न्नुच्चैर्जल्पनिमील्यलोचनयुगंश्लोकान्समर्थेपठ ॥
काव्यंपिकुकवत्परैर्विरचितंस्वंर्थसारंबुधे
यंयःश्यर्थयसेश्रुतेनरहितःपांडित्यमाप्नुवन्नात ॥ १७ ॥
येसंसत्सुविवादिनःपरयशःशल्येनशूलाऽऽकुलाः
कुर्वंतिस्वगुणस्तवेनगुणिनांयत्नाद्गुणाच्छादनं ॥
तेषांरोषकषायितोदरदृशांकोपोष्णनिश्वासिनां
दीमारल्नशिखेवकृष्णफणिनांविद्याजनोद्वेगिनी ॥ १८ ॥
धीवास्तंभृतःपरोन्नतिकथामात्रेपिरश्शूलिनः
सोद्वेगभ्रमणमलापविपुलक्षोभाभिभूतस्थितेः ॥
अंतर्द्वेषविषप्रवेशविषमक्रोधोष्णनिश्वासिनः
कष्टानूनमपंडितस्यविकृतिर्भीमज्वरारंभभूः ॥ १९ ॥
पितैरतिगुरुःमाद्वेविद्यांयथैवतथाजडे
नतुखलुतयोर्ज्ञानेशक्तिकरोत्युपहंतिवा ॥
भवतिचपुनर्भूयान्भेदःफलंप्रतितद्यथा
मभवतिमणौबिंबग्राहेमणिर्नमृदांचयः ॥ २० ॥
मूर्खत्वंसुलभंभजस्वकुमतेमूर्खस्यचाऽष्टौगुणा
निश्चितोबहुभोजकोऽतिमुखरोरात्रिदिवंस्वप्नभाक् ॥
कार्याकार्यविचारणांधबधिरोमानापमानेसमः
प्रायेणामयवर्जितोदृढवपुर्मूर्खःसुखंजीवति ॥ २१ ॥
मूर्खचिन्हानिषडिति गर्वोदुर्वचनंमुखे ॥
विरोधीविषवादीच कृत्याऽकृत्यंनमन्यते ॥ २२ ॥
मूर्खोहिजल्पतांपुंसां श्रुत्वावाचःशुभाऽशुभाः ॥
अशुभंवाक्यमादत्ते पुरीषमिवसूकरः ॥ २३ ॥
उपदेशोहिमूर्खाणां प्रकोपायनशांतये ॥

---

१ कविश्रेष्ठान्. २ अयोग्यैः ३ रोषेणकषायितंताम्रंउदरंगर्भोयस्या एवंविधादृक्चेष्टा. ४ कृष्णसर्पाणां ५ त्रासदात्री. ६ धीधार्ष्ट्यंभंधारयतः ७ परोत्कर्षः ८ मूर्खस्य. ९ विकारः १० दारुणज्वरारंभकभूमिः ११ ददाति. १२ मूर्खे. १३ नाशयति. १४ महान्. १५ बिंबग्रहणे. १६ मृत्पिंडः १७ रोगवर्जितः १८ सुखम्.

पयःपानंभुजंगानां केवलंविषवर्धनं ॥ २४ ॥
अरण्यरुदितंकृतंशवशरीरमुद्वर्तितं
स्थलेऽब्जमवरोपितंसुचिरमूषरेवर्षितं ॥
श्वपुच्छमवनामितंबधिरकर्णजापःकृतो
धृतोऽन्धमुखदर्पणोयदबुधोजनःसेवितः ॥ २५ ॥

सद्‌उपदेशः

श्री० ॥ तृष्णांछिंधिभजक्षमांजहिमदंपापेरतिंमाकृथाः
सत्यंब्रूह्यनुयाहिसाधुपदवींसेवस्वविद्वज्जनान् ॥
मान्यान्मानयविद्विषोऽप्यनुनयह्याच्छादयस्वान्गुणान्
कीर्तिंपालयदुःखितेकुरुदयामेतत्सतांलक्षणं ॥ १ ॥
यावत्स्वस्थमिदंशरीरमरुजंयावज्जरादूरतो
यावच्चेंद्रियशक्तिरप्रतिहतायावत्क्षयोनायुषः ॥
आत्मश्रेयसितावदेवविदुषाकार्यःप्रयत्नोमहान्
संदीप्तेभवनेतुकूपखननंप्रत्युद्यमःकीदृशः ॥ २ ॥
मूढजहीहिधनागमतृष्णां कुरुतनुबुद्धेमनसिवितृष्णां ॥
यल्लभसेनिजकर्मोपात्तं वित्तंतेनविनोदयचित्तं ॥ ३ ॥
अर्थमनर्थंभावयनित्यं नास्तिततःसुखलेशःसत्यं ॥
पुत्रादपिधनभाजांभीतिः सर्वत्रैषाविहितारीतिः ॥ ४ ॥
कातवकांताकस्तेपुत्रः संसारोऽयमतीवविचित्रः ॥
कस्यत्वंवाकुतआयात स्तत्त्वंचिंतयतदिदंभ्रातः ॥ ५ ॥
माकुरुधनजनयौवनगर्वं हरतिनिमेषात्कालःसर्वं ॥
मायामयमिदमखिलंहित्वा ब्रह्मपदंप्रविशाऽऽशुविदित्वा ॥ ६ ॥
नलिनीदलगतजलवत्तरलं तद्वज्जीवनमतिशयचपलं ॥

---

१ प्रेतशरीरं. २ उद्वर्तनेनसुगंधितं. ३ पाषाणादिप्रचुरप्रदेशे. ४ कर्णमंत्रः ५ नाशय. ६ पालय. ७ प्रीतिं. ८ साधुमार्गं. ९ विद्विषांकोपापनयनंकुर्वित्यर्थः १० रुजारहितं. ११ प्रतीकारार्थमुद्योगः १२ त्यज. १३ अल्पबुद्धे. १४ धनवतां. १५ विलक्षणः १६ [illegible]. १७ विचारंकुरु. १८ निमेषमात्रेण. १९ अविद्यारूपं. २० पुरोवर्तिजगत्. २१ त्यक्त्वा. २२ शीघ्रं २३ ज्ञात्वा.

क्षणमपिसज्जनसंगतिरेका भवतिभवार्णवतरणेनौका ॥ ७ ॥

यावद्वित्तोपार्जनशक्त स्तावन्निजपरिवारोरक्तः ॥
तदनुचजरयाजर्जरदेहे वार्ताकोऽपिनपृच्छतिगेहे ॥ ८ ॥
कामंक्रोधंलोभंमोहं त्यक्त्वाऽऽत्मानंपश्यहिकोऽहं ॥
आत्मज्ञानविहीनामूढा स्तेपच्यंतेनरकनिगूढाः ॥ ९ ॥

बालस्तावत्क्रीडाऽऽसक्त स्तरुणस्तावत्तरुणीरक्तः ॥
वृद्धस्तावच्चिंतामग्नः परेब्रह्मणिकोऽपिनलग्नः ॥ १० ॥
शत्रौमित्रेपुत्रेबंधौ माकुरुयत्नंविग्रहसंधौ ॥
भवसमचित्तःसर्वत्रत्वं वांछस्यचिराद्यदिसत्वं ॥ ११ ॥

महतापुण्यपण्येन क्रीतेयंकायनौस्त्वया ॥
पारंदुःखोदधेर्गंतुं तरयावन्नभिद्यते ॥ १२ ॥

दधतितावदमीविषयाःसुखं स्पृशतितावदियंत्वदिमूढता ॥
मनसितत्त्वविदांचविवेचके क्वविषयाःक्वसुखंक्वपरिग्रहः ॥१२॥

मन्निदयायदिजनःपरितोषमेति
नन्वयमयत्नसुलभोऽयमनुग्रहोमे ॥
श्रेयोऽर्थिनोऽपिपुरुषाःपरतुष्टिहेतो
र्दुःखार्जितान्यपिधनानिपरित्यजंति ॥ १३ ॥

धैर्यंयस्यपिताक्षमाचजननीशांतिश्चिरंगेहिनी
सत्यंसूनुरयंदयाचभगिनीभ्रातामनःसंयमः ॥
शय्याभूमितलंदिशोऽपिवसनंज्ञानामृतंभोजन
मेतेयस्यकुटुंबिनोवदसखेकस्माद्भयंयोगिनः ॥ १४ ॥
क्लेशंत्यागकृतेऽर्पितेनकरणव्यूहेनदेहेनच
स्वोऽनर्थेवतजंतुरार्जयतिचेन्मंतुंनियंतुःकुतः ॥

---

१ अनुरक्तः २ आत्मस्वरूपं. ३ विरोधः ४ सख्यं. ५ सर्वभूतेषुसमानबुद्धिः ६ शीघ्रं. ७ सद्वस्तु. ८ पुण्यमेवपण्यंद्रव्यं. ९ कायएवनौर्नौका. १० दुःखसमुद्रस्य. ११ तरुणजाइतिलोके. १२ अज्ञानं. १३ संतोषं. १४ प्रसादः १५ कल्याणेच्छवः १६ अन्यसंतोषः १७ गृहस्थापत्नी. १८ पुत्रः १९ मनोनिग्रहः २० वस्त्रं. २१ क्लेशनाशाय. २२ इंद्रियसमूहेन. २३ स्वकीयानिष्टं. २४ इतिखेदे. २५ संपादयति. २६ अपरधः

शस्त्रेशत्रुजयायनैजगुरुणादत्तेऽथतेनैवचे
त्पुत्रोहंतिनिजंवपुःकथयरेतत्राऽपराधीतुकः ॥ १५ ॥

सत्कविः

श्रीग० ॥ जयंतितेसुकृतिनो रससिध्दाःकवीश्वराः ॥
नास्तितेषांयशःकाये जरामरणजंभयं ॥ १ ॥
काव्यप्रपंचचंचू रचयतिकाव्यंनसारविद्भवति ॥
तरवःफलानिसुवते विंदतिसारंमतंगसमुदायः ॥ २ ॥
अनंतपदविन्यास रचनासरसाकवेः ॥
बुधोयदिसमीपस्थो नकुंजन्मापुरोयदि ॥ ३ ॥
कविरहिताःकविलापा जायंतेकंठशोषणायैव ॥
संमुखगतःकविश्चेत् भवतिकुलपिताऽपिकविकुलपितैव ॥ ४ ॥
नूनंनिसर्गतःकवि रूढमलप्रशमनेहिसरसानां ॥
प्रतिकूलतापिनभवे दनर्थकृत्कतकवत्कदाचिदपि ॥ ५ ॥
विद्वत्कवयःकवयः केवलकवयस्तुकेवलंकपयः ॥
कुलजायासाजाया केवलजायातुकेवलंमाया ॥ ६ ॥
कविःकरोतिपद्यानि लालयत्युत्तमोजनः ॥
तरुःप्रसूतेपुष्पाणि मरुद्वहतिसौरभं ॥ ७ ॥
कतिपयनिमेषवर्तिनि जन्मजरामरणविव्हलेजगति ॥
कल्पांतकोटिबंधुः स्फुरतिकवीनांयशःप्रसरः ॥ ८ ॥
कवयःपरितुष्यंति नेतरेकविसूक्तिभिः
नह्यकूपारवत्कूपा वर्धंतेविधुकांतिभिः ॥ ९ ॥
किंकवेस्तस्यकाव्येन किंकांडेनधनुष्मतः
परस्यहृदयेलग्नं नघूर्णयतियच्छिरः ॥ १० ॥

---

१ स्वगुरुणा. २ कीर्तिशरीरे ३ विस· ४ अनेकपदानि, पक्षे अनंतपदं विष्णुपदं आकाशमित्यर्थः ५ कवयितुः पक्षेशुक्रस्य. ६ पंडितः पक्षेबुधग्रहः ७ नीचः पक्षेकुः पृथ्वीतस्याःजन्मयस्यमंगलस्येत्यर्थः ८ कविनारहिताःकवेर्लापाउक्तयः पक्षे ककारेणरहिताःकविलापा विलापाइत्यर्थः ९ कुत्सितंलपितायकापि, कविशब्दःपृष्ठलोपुकश्चेत्कुलपितापिकविकुलपितैवभवतिइतिकाविन्हृदयं, १० सौगंध्यं, ११ कीर्तिप्रकाशः १२ समुद्रवत्.

उत्फुल्लगल्लैरालापाः क्रियंतेदुर्मुखैःसुखं ॥
जानातिहिपुनःसम्यक् कविरेवकवेःश्रमं ॥ ११ ॥
अर्थान्केचिदुपासतेकृपणवत्केचित्त्वलंकुर्वते
वेश्यावत्खलुधातुवादिनइवोद्बध्नंतिकेचिद्रसान् ॥
अर्थाऽलंकृतिसद्रसद्रवमुचांवाचांप्रशस्तिस्पृशां
कर्तारःकवयोभवंतिकतिचित्पुण्यैरगण्यैरिह ॥ १२ ॥
मदुक्तिश्चेदंतर्मदयतिसुधीभूयसुधियः
किमस्यानामस्यादरसपुरुषाऽनादरभरैः ॥
यथायूनस्तद्वत्परमरमणीयाऽपिरमणी
कुमाराणामंतःकरणहरणंनैवकुरुते ॥ १३ ॥
लौकिकानांहिसाधूना मर्थंवागनुवर्तते ॥
ऋषीणांपुनराद्यानां वाचमर्थोऽनुधावति ॥ १४ ॥
माघश्चोरोमयूरोमुररिपुरपरोभारविःसारविद्यः
श्रीहर्षःकालिदासःकविरथभवभूत्याह्वयोभोजराजः ॥
श्रीदंडींडिंडिमाख्यःश्रुतिमुकुटगुरुर्भल्लटोभट्टबाणः
ख्याताश्चाऽन्येसुबंध्वादयइहकृतिभिर्विश्वमाल्हादयंति ॥१५॥
काव्यंकरोतिसुकविः सत्हृदयएवव्यनक्तितत्तत्त्वं ॥
रत्नंखनिःप्रसूते रचयतिशिल्पीतुतत्सुषमां ॥ १६ ॥
मंदंनिक्षिपतेपदानिपरितःशब्दंसमुद्वीक्षते
नानाऽर्थाऽऽहरणंचकांक्षतिमुदाऽलंकारमाकर्षति ॥
आदत्तेसकलंसुवर्णनिचयंधत्तेरसांऽतर्गतं
दोषाऽन्वेषणतत्परोविजयतेचोरोपमःसत्कविः ॥ २७ ॥

---

१ वाल्मीक्यादीनां. २ सरसत्हृदयः ३ प्रकाशयति. ४ शोभां. ५ सुपुतिङंता-दीनि. अन्यत्रपादविक्षेपेचरणान्. ६ शब्दःशुत्योवापशब्दोवेतिसम्यग्विचारयति. पक्षे. ध्वनिं. ७ श्लेषेणध्वनिनावाअनेकार्थानांसंपादनं. पक्षेसुवर्णरूप्यादीनांहरणंइच्छति. ८ उपमाद्यलंकारं. पक्षेकंकणादिभूषणं. ९ सुसुवर्णानांसंचयं. पक्षेहेमसंचयं. १० शृंगारादिरसमिश्रं. पक्षेरसापृथ्वीतदंतर्गतं. ११ दोषा.काव्यदोषास्तेषामन्वेषणंगवेषणंतस्मिंस्तत्परआसक्तः. पक्षेदोषारात्रिस्तस्यामन्वेषणं.

कुकविनिंदा.

श्री ॥ गणयंतिनाऽपशब्दं नवृत्तभंगंक्षयंनचाऽर्थस्य ॥
रसिकत्वेनाऽऽकुलिता वेश्यापतयःकुकवयश्च ॥ १ ॥
अप्रगल्भाःपदन्यासे जननीरागहेतवः ॥
संत्येकेबहुलालापाः कवयोबालकाइव ॥ २ ॥
द्राघीयसाधाष्टर्यगुणेनयुक्ताः कैःकैरपूर्वैःपरकाव्यखंडैः ॥
आडंबरंयेवचसांवहंति तेकेचिदार्याःकवयोजयंति ॥ ३ ॥
कविभिर्नृपसेवासु वित्ताऽलंकारहारिणी ॥
वाणीवेश्येवलोभेन परोपकरणीकृता ॥ ४ ॥
अन्यैर्वर्णपरावृत्त्या बंधचिन्हनिगूहनैः ॥
अनाख्यातःसतांमध्ये कविश्चोरोविभाव्यते ॥ ५ ॥

कविता.

श्री ॥ समलंकरोतिकाव्यं सुकविःकुकविश्चतदुभयंकाव्यं ॥
अनलंकरोतिचित्ते सद्यःस्वश्रवणमात्रेण ॥ २ ॥
अविदितगुणापिसुकवे र्भणितिःकर्णेषुकिरतिमधुधारां ॥
अनधिगतपरिमलाऽपिहि हरतिदृशंमालतीमाला ॥ ४ ॥
कान्पृच्छामःसुधास्वर्गे निवसामोवयंभुवि ॥
किंवाकाव्यरसःस्वादुः किंवास्वादीयसीसुधा ॥ ५ ॥
सद्भिर्भाव्येहितेकाव्ये वृथादुर्जनगर्जनं ॥

---

१ दुःशब्दं २ वृत्तानिमहर्पिर्णामालिनीवंशस्थादीनितेषांभंगं. पक्षेशीलभंगं. ३ वाच्यस्य पक्षेद्रव्यस्य. ४ जाराः ५ पदनिवेशने पदंसुपुतिङंतं,पक्षेअंघ्रिः ६ जनानां-नीरागोविरसतातस्यहेतवः पक्षे जनन्याःमातुःरागहेतवःप्रीतिहेतुभूताः ७ बहुलाःआ-लापायेषां, पक्षे बह्वीयालालातांबिभ्रतिने, ८ अतिदीर्घेण. ९ प्रागल्भ्यं. १० वर्णा-तरपरिवर्तने. ११ गोपनैः १२ सम्यगलंकरोति पक्षे सदोषं. १३ अलंभावाभावं, पक्षे अनलंकरोति. १४ उक्तिः १५ वर्षति.

चंडीशांऽगीकृतेचंद्रे ऽकंतुदर्शकविधुंतुदः ॥ ७ ॥
कविःपितापोषयति पाल्कोरसिकःपतिः ॥
कवितायुवतेर्नूनं सोदरास्तुविवेकिनः ॥ ८ ॥
तएवपदविन्यासा स्तएवाऽर्थविभूतयः ॥
तथाऽपिनव्यंभवति काव्यंग्रथनकौशलात् ॥ ९ ॥
सरसाऽपिकवेर्वाणी हरिनामांकितायदि ॥
साऽऽदरंगृह्यतेतज्ज्ञैः शुक्तिर्मुक्ताऽन्वितायथा ॥ १० ॥
कृतमंदपदन्यासा विकचश्रीश्चारुशब्दभंगवती ॥
कस्यनकंपयतेकं जरेवजीर्णस्यसत्कवेर्वाणी ॥ ११ ॥
सरसासाऽलंकारा सुपदन्यासासुवर्णमयमूर्तिः ॥
आर्यातथैवभार्या नलभ्यतेपुण्यहीनेन ॥ १२ ॥
अतिरमणीयेकाव्ये पिशुनोऽन्वेषयतिदूषणान्येव ॥
अतिरमणीयेवपुषि व्रणमिवहिमक्षिकानिकरः ॥ १६ ॥
कर्णाऽमृतसूक्तिरसंविमुच्य दोषेषुयत्नःसुमहान्खलस्य ॥
अवेक्षतेकेलिवनंप्रविष्टः क्रमेलकःकंटकजालमेव ॥ १६ ॥

विद्याप्रशंसा.

श्री० ॥ विद्यानामनरस्यरूपमधिकंप्रच्छन्नगुप्तंधनं
विद्याभोगकरीयशःसुखकरीविद्यागुरूणांगुरुः ॥
विद्याबंधुजनोविदेशगमनेविद्यापरंदैवतं
विद्याराजसुपूज्यतेनहिधनंविद्याविहीनःपशुः ॥ १ ॥
सद्विद्यायदिकाचिंता वेराकोदरपूरणे ॥
शुकोऽप्यशनमाप्नोति हरेरामइतिब्रुवन् ॥ २ ॥
मातेवरक्षतिपितेवहितेनियुंक्ते कांतेवचाऽपिरमयत्यपनीयखेदं ॥

---

१ मर्मस्पृक्. २ सुप्तिङंतादि. पक्षे चरणः ३ प्रफुल्लशोभा, पक्षे [illegible] कशोभायस्याः ४ चारवःयेशब्दभंगाःरचनाविशेषास्तद्वती. पक्षे [illegible] ५ शिरः ६ उष्ट्रः ७ महादंडाकंटकारिकादिकंटकसमूह. ८ अंतर्हितं. ९ [illegible] १० नियोजयति.

लक्ष्मींतनोतिवितनोतिचदिक्षुकीर्तिं किंकिंनसाधयतिकल्पलतेवविद्या॥३

नचोरहार्यंनचराजहार्यं नभ्रातृभाज्यंनचभारकारि ॥
व्ययेकृतेवर्धतएवनित्यं विद्याधनंसर्वधनप्रधानं ॥ ४ ॥

विद्ययाविनयाऽवाप्तिः साचेदविनयावहा ॥
किंकुर्मःकंप्रतिब्रूमो गरदायांस्वमातरि ॥ ५ ॥

सर्वद्रव्येषुविद्यैव द्रव्यमाहुरनुत्तमं ॥
अहार्यत्वादनर्घ्यत्वा दक्षयत्वाच्चसर्वदा ॥ ६ ॥

किंकुलेनविशालेन विद्याहीनस्यदेहिनः ॥
अकुलीनोऽपिविद्यावान् दैवैरपिसपूज्यते ॥ ७ ॥

वीणेवश्रोत्रहीनस्य लोलाऽक्षीवविचक्षुषः ॥
व्यसोःकुसुममालेव विद्यास्तब्धस्यनिष्फला ॥ ८ ॥

गतेऽपिवयसिग्राह्या विद्यासर्वात्मनाबुधैः ॥
यद्यपिस्यान्नफलदा सुलभासाऽन्यजन्मनि ॥ ९ ॥

शुनःपुच्छमिवव्यर्थं जीवितंविद्ययाविना ॥
नगुह्यगोपनेशक्तं नचदंशनिवारणे ॥ १० ॥

धनिधनयोर्निंदा.

श्रीगणेशंवंदे ॥ वरंहालाहलंपीतं सद्यःप्राणहरंविषं ॥
नद्रष्टव्यंधनाढ्यस्य भ्रूभंगकुटिलंमुखं ॥ १ ॥

लिंगिताश्चपरैर्यांति प्रस्खलंतिसमेपथि ॥
अव्यक्तानिचभाषंते धनिनोमद्यपाइव ॥ २ ॥

भक्तद्वेषोजडेप्रीतिः सुरुचिर्गुरुलंघने ॥
मुखेकटुकतानित्यं धनिनांज्वरिणामिव ॥ ३ ॥

---

१ विपद्दायिन्यां. २ नास्त्युत्तमयस्मात् ३ विस्तीर्णेन. ४ चंचलाक्षीमृगनयने-तियावत्. ५ अंधस्य. ६ प्राणरहितस्यप्रेतस्येतियावत्. ७ वृद्धत्वेपि. ८ वनमक्षिका. ९ मनाकूपियं. १० भ्रुकुटिमोटनेनवक्रं. ११ अविषमे. १२ भक्ताःसेवकास्तेषांद्वेषः पक्षे भक्तमन्नंतत्द्वेषः १३ जडेषुमूर्खेषुप्रीतिः पक्षे डलयोःसावर्ण्याज्जलेरुचिः १४ गुरू-णांपित्रादीनामुल्लंघने पक्षे गुरुवन्नलंघनमुपवासस्तस्मिन्नतिप्रीतिः १५ कटुभाषित्वं पक्षे कटुत्वं.

वाक्चपलु:श्रोत्रलयं लक्ष्मी:कुरुतेनरस्यकोदोषः ॥
गरलसहोदरजाता नमारयतियच्चतच्चित्रं ॥ ४ ॥
लक्ष्मीवंतोनजानंति प्रायेणपरवेदनां ॥
शेषधराभरक्रांते शेतेनारायण:सुखं ॥ ५ ॥
यस्याऽस्तिवित्तंसनर:कुलीनः सपंडित:सश्रुतवान्गुणज्ञः ॥
सएववक्तासचदर्शनीयः सर्वेगुणा:कांचनमाश्रयंति ॥ ६ ॥
यस्याऽर्थास्तस्यमित्राणि यस्याऽर्थास्तस्यबांधवाः ॥
यस्याऽर्थ:सपुमांल्लोके यस्याऽर्थ:सचपंडितः ॥ ७ ॥
वयोवृद्धास्तपोवृद्धा ज्ञानवृद्धास्तथापरे ॥
तेसर्वेधनवृद्धस्य द्वारितिष्ठंतिकिंकराः ॥ ८ ॥
जातिर्यातुरसातलंगुणगणस्तस्याऽप्यधोगच्छतु
शीलंशैलतटात्पतत्वभिजन:संदह्यतांवन्हिना ॥
शौर्येवैरिणिवज्रमाशुनिपतत्वर्थोऽस्तुनःकेवलं
येनैकेनविनागुणास्तृणलवप्राया:समस्ताइमे ॥ ९ ॥
धिगस्त्वेतांविद्यांधिगपिकवितांधिक्सुजनतां
वयोरूपंधिक्धिक्धिगपिचयशोनिर्धनवतः ॥
असौजीयादेक:सकलगुणहीनोऽपिधनवान्
बहिर्यस्यद्वारेतृणलवनिभा:संतिगुणिनः ॥ १० ॥
धनमर्जयकाकुत्स्थ धनमूलमिदंजगत् ॥
अंतरंनैवपश्यामि निर्धनस्यमृतस्यच ॥ ११ ॥
ब्रह्मघ्नोऽपिनर:पूज्यो यस्याऽस्तिविपुलंधनं ॥
शशिनातुल्यवंशोऽपि निर्धन:परिहीयते ॥ १२ ॥
विभवोहियथालोके नशरीराणिदेहिनां ॥
चांडालोऽपिनर:पूज्यो यस्याऽस्तिविपुलंधनं ॥ १३ ॥
नविद्ययानैवकुलेनगौरवं जनाऽनुरागोधनिकेषुसर्वदा ॥
कपालिनामौलिधृताऽपिजान्हवी प्रयातिरत्नाऽऽकरमेवसत्वरं १४
त्यजंतिमित्राणिधनैर्विहीनं पुत्राश्चदाराश्चसुहृज्जनाश्च ॥

---

१ शास्त्रज्ञः २ प्रेक्षणीयः ३ प्राणानुधारयतु. ४ परिभवंप्राप्नोति. ५ [illegible],
६ मस्तकः

तमर्थवंतंपुनराश्रयंति स्वर्थोहिलोकेपुरुषस्यबंधुः ॥ १५ ॥
प्रायेणधनिनामेव धनलोभोनिरंतरं ॥
पश्यकोटिद्वयोपेतं लक्षंमार्थयतेधनुः ॥ १६ ॥
कुतआगत्यघटते विघट्यक्कनुयातिच ॥
नलक्ष्यतेगतिःसम्यक् धनस्यचधनस्यच ॥ १७ ॥
वित्तार्थयतसेभृशंयदनिशंशंसार्थमप्यात्मनो
ऽप्यर्थंतन्ममभित्रतत्रभवतोनाऽऽत्यंतिकंस्यात्सुखं ॥
गुर्वाराधनतत्परेणमनसाकुर्वात्मशंसांधनं
कितस्मिन्नुपलभ्यतेनहिधनंनोवाऽऽत्मनःशंसनं ॥ १८ ॥
कुतःश्रियेत्वंयतसेनिकामं श्रीरामदासोभवमानवत्वं ॥
श्रीरामदासस्यपराङ्मुखस्य सदानपायिन्युपतिष्ठतेश्रीः ॥१९॥
गंगांचधारयतिमूर्ध्निसदाकपाली सातस्यचुंबतिमुखनकदाचिदेव
रत्नाकरंप्रतिचुचुंबसहस्रवक्त्रै गंगादयोयुवतयःसधनानुकूलाः ॥२०॥
तानींद्रियाण्यविकलानिमनस्तदेव
साबुद्धिरप्रतिहतावचनंतदेव ॥
अर्थोष्मणाविरहितःपुरुषःसएव
ह्यन्यःक्षणेनभवतीतिविचित्रमेतत् ॥ २१ ॥
अहोकनकमाहात्म्यं वक्तुंकेनाऽपिशक्यते ॥
नामसाम्यादहोचित्रं धत्तूरोऽपिमदमदः ॥ २३ ॥
वेधाद्वेधाभ्रमंचक्रे कांतासुकनकेषुच ॥
तासुतेष्वप्यनासक्तः साक्षाद्भर्गोनराकृतिः ॥ २४ ॥
दायादाःस्पृहयंतितस्करगणामुष्णंतिभूमीभुजो
दूरेणच्छलमाकलय्यहुतभुग्भस्मीकरोतिक्षणात् ॥
अंभःप्लावयतेक्षितौविनिहितंयक्षाहरतिध्रुवं
दुर्वृत्तास्तनयानयंतिनिधनं धिग्धिग्धनंतद्बहु ॥२५॥

---

१ निरंतरं. २ स्तुतिः ३ आत्मसुखं. ४ उपायः पक्षे आत्मशंसा, धनं, इत्युपलभ्यते. ५ यत्नंकरोषि. ६ अत्यतं. ७ श्रीरामदासशब्दोविलोमःकृतश्चेत्सदाअमराअनपायिनीश्रीरितिभवति. ८ वैकल्यरहितानि. ९ असंहिता. १० द्रव्यरूपोष्णतया. ११ हरंति. १२ कपटं. १३ अग्निः १४ दुराचरणाः १५ नाशं.

वाणीदरिद्रस्यशुभाहिताऽपि ह्यर्थेनशब्देनचसंप्रयुक्ता ॥
नशोभतेवित्तवतःसमीपे भेरीनिनादोपहतेववीणा ॥२६ ॥
हेतुप्रमाणयुक्तं वाक्यंनश्रूयतेदरिद्रस्य ॥
अप्यतिपरुषमसत्यं पूज्यंवाक्यंसमृद्धस्य ॥ २७ ॥
नवित्तंदर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो ॥
मुनेरपिवनस्थस्य मनश्चलतिदर्शनात् ॥ २८ ॥
लक्ष्म्यापरिपूर्णोऽहं नभयंमेऽस्तीतिमोहनिद्रैषा ॥
परिपूर्णस्यैवेंदोः भवतिभयंसिंहिकासूनोः ॥ २९ ॥
पतंतिखड्गधारासु विशंतिमकरालयं ॥
किंनकुर्वंतिसुभग कष्टमर्थाऽर्थिनोजनाः ॥ ३० ॥
नसाविद्यानतच्छीलं नतद्दानंनसाकला ॥
अर्थार्थिभिर्नतच्छौर्यं धनिनांयन्नकीर्त्यते ॥ ३१ ॥
बधिरयतिकर्णविवरं वाचंमूकयतिनयनमंधयति ॥
विकृतयतिगात्रयष्टिं संपद्रोगोऽयमद्भुतोराजन् ॥ ३२ ॥
दैववशादुत्पन्ने सतिविभवेयस्यनाऽस्तिभोगेच्छा ॥
नचपरलोकसमीहा सभवतिधनपालकोमूर्खः ॥ ३३ ॥
दुंदुभिस्तुसुतरामचेतन स्तन्मुखादपिधनंधनंधनं ॥
इत्थमेवनिनदःप्रवर्तते किंपुनर्यदिजनःसचेतनः ॥ ३४ ॥
अर्जनीयतियदर्जनेजनो वर्जनीयजनतर्जनादिभिः ॥
मंक्षुनश्यतिचिरायसंचिता वंचिताजगतिकेनसंपदा ॥ ३५ ॥
आपद्गतंहससिकिंद्रविणांधमूढ
लक्ष्मीःस्थिरानभवतीतिकिमत्रचित्रं ॥
एतान्प्रपश्यसिघटान्जलयंत्रचक्रे
रिक्ताभवंतिभरिताभरिताश्चरिक्ताः ॥ ३६ ॥

---

१ कल्याणी. २ दुंदुभिध्वनिलुवेव. ३ अतिकठोरं. ४ राहोः ५ समुद्रं. ६ विलक्षणः ७ इच्छा. ८ धनंधनंधनमित्यनुकरणशब्दः ९ चपलोभवति, १० अपमानादिभिः ११ झटिति, १२ विपद्ग्रस्तं, १३ राहादइतिलोके.

लभेयदयुतंधनंतदधनंधनंयद्यपि
लभेतनियुतंधनंनिधनमेवतज्जायते ॥
तथाधनंपरार्धकंतदपिभावहीनात्मकं
यदक्षरपदद्वयांतरगतंधनंतद्धनं ॥ २७ ॥
अनुभवतददतवित्तं मान्यान्मानयतसज्जनान्भजत ॥
अतिपरुषपवनविलुलित दीपशिखाचंचलालक्ष्मीः ॥ २८ ॥

मनस्विप्रशंसा.

श्लो ॥ कोमंभियानपिप्राणान् विमुंचंतिमनस्विनः ॥
इच्छंतिनत्वमित्रेभ्यो महतीमपिसत्क्रियां ॥ १ ॥
पुण्येग्रामेवनेवामहतिसितपटच्छन्नपालींकपाली
मादायन्यायगर्भद्विजवरहुतभुग्धूमधूम्रोपकंठे ॥
द्वारंद्वारंमनूत्तोवरमुदरदरीपूरणायमवृत्तो
मानीमाणीत्वदेशेनपुनरनुदिनंतुल्यकुल्येषुदीनः ॥ २ ॥
वरमहिमुखेक्रोधांऽऽध्मानेकरोविनिवेशितो
विषमपिवरंपीत्वासुप्तंकृतांतनिवेशने ॥
गिरिवरतटीमुक्तश्चाऽऽत्मावरंशतधाकृतो
नतुखलजनाऽवाप्तैरर्थैःकृतंहितमात्मनः ॥ ३ ॥
ब्रह्मांडंकियदस्तुतत्रवसुधापिंडंकिमाचक्ष्महे
तत्राऽप्येकतरंतुखंडममितास्तस्मिन्नृपाःकेचन ॥
तेभ्योदैन्यशतोपनीतविभवास्ताऽनुकंपास्तुते
धिङ्मूढाःस्पृहयंतिहंतकिमपिस्वाऽर्थोनतेभ्योऽपिये ॥ ४ ॥

---

१ दशसहस्रं अथच अकारेणयुतंधनंअधनमित्यर्थः २ लक्षसंख्याक अथच निशब्देनयुतंधनंनिधनमित्यर्थः ३ धनस्यपरार्धसंख्याविशेषः अथच धनशब्दसंबंधिपरमर्धनइतिधनभावहीनात्मकंअभावबोधकमित्यर्थः ४ अक्षरःपरमात्मातच्चरणद्वयांतरेगतंप्राप्तंयद्धनंमोक्षरूपंधनंतदेवधनं अथच अक्षराणांमध्येपकारदकारात्मकद्वयमध्यवर्तिधनइत्येतदक्षरद्वयरूपंधनमित्यर्थः ५ यथेच्छं. ६ शुभवस्त्रेणपिहितापालीयस्याः ७ भिक्षापात्रं. ८ सर्पमुखे. ९ क्रोधपूर्णे. १० कालगृहे.

एकःसएवजीवति स्वहृदयविहीनोऽपिसल्हृदयोराहुः ॥
यःसकललघिमकारण मुदरंनबिभर्तिदुष्पूरं ॥ ५ ॥
प्रत्युपकुर्वन्बव्हपि नभवतिपूर्वोपकारिणातुल्यः ॥
एकोऽनुकरोतिकृतं निष्कारणमेवपरःकुरुते ॥ ६ ॥
प्रतिदिनप्रयत्नसुलभे भिक्षुकजननिमाधुजनकल्पलते ॥
नृपनमननरकतारिणि भगवतिभिक्षेनमस्तुभ्यं ॥ ७ ॥
ब्रह्मांडमंडलीमात्रं किंलोभायमनस्विनः ॥
शफरीस्फुरितेनाब्धेः क्षुब्धताजातुजायते ॥ ८ ॥
कुसुमस्तबकस्येव द्वयीवृत्तिर्मनस्विनः ॥
सर्वेषांमूर्ध्निवातिष्ठे द्विशीर्यदथवावने ॥ ९ ॥
पादाहतसमुत्थाय मूर्धानमधिरोहति ॥
स्वस्थादेवावमानेऽपि देहिनस्तद्वरंरजः ॥ १० ॥
माजीवन्यःपरावज्ञा दुःखदग्धोऽपिजीवति ॥
तस्याजननेनिवाऽस्तु जननीक्लेशकारिणः ॥ ११ ॥
समूलघातमघ्नंतः परान्नोद्यंतिमानिनः ॥
विध्वंसितांधतमस स्तत्रोदाहरणंरविः ॥ १२ ॥

दातृ प्रशंसा.

त्वयिसतिशिवदातर्यस्मदभ्यर्थितानां
मितरमनुसरतोदर्शयंतोऽर्थिमुद्रां ॥
चरमचरणपातैर्दुर्ग्रहंदोग्धुकामाः
करभमनुसरामःकामधेनौस्थितायां ॥ १ ॥

१ लघुत्वकारणं. २ नधारयति. ३ दुःखेनपूरयितुमशक्यं. ४ प्रत्युपकारंकुर्वन्. ५ अनुकरणकरोति. ६ मत्सीस्फुरणेन. ७ कदाचित्. ८ गुच्छः ९ गर्हितंजीवतीतिमाजीवन् १० परैःकृतायाअवज्ञातदेवदुःखंतेनदग्धःखिन्नः ११ अनुत्पत्तिः १२ याचितानां. १३ पाश्चात्यचरणपातैः १४ उष्ट्रं.

४९

तेजस्वि प्रशंसा.

बालस्याऽपिरवेःपादाः[1] पतंत्युपरिभूभृतां[2] ॥
तेजसासहजातानां वयःकुत्रोपयुज्यते ॥ १ ॥
सिंहःशिशुरपिनिपतति मदमलिनकपोल[3]भित्तिषुगजेषु ॥
प्रकृतिरियंसत्ववतां[4] नखलुवयस्तेजसोहेतुः ॥ २ ॥
एकःसएवतेजस्वी सैंहिकेयः[5]सुरद्विषां ॥
शिरोमात्राऽवशेषेण जीयंतेयेनशत्रवः ॥ ३ ॥
तुल्येऽपराधेस्वर्भानु[6] र्भानुमंतंचिरेणयत् ॥
हिमांशु[7]माशुग्रसते तन्म्रदिम्नः[8]स्फुटंफलं ॥ ४ ॥
तेजस्विनिक्षमासारे नाऽतिकार्कश्यमाचरेत् ॥
निःशंकोहिजनोधत्ते पदंभस्मन्यनूष्मणि[9] ॥ ५ ॥
यदचेतनोऽपिपादैः स्पृष्टःप्रज्वलतिसवितुरविकांतः[10] ॥
तत्तेजस्वीपुरुषः परकृतविकृतिं[11]कथंसहते ॥ ६ ॥
हस्तीस्थूलतनुःसचांऽकुशवशःकिंहस्तिमात्रोंऽकुशो
वज्रेणाऽभिहताःपतंतिगिरयःकिंशैलमात्रःपविः[12] ॥
दीपेप्रज्वलितेविनश्यतितमःकिंदीपमात्रंतम
स्तेजोयस्यविराजतेसबलवान्स्थूलेषुकःप्रत्ययः[13] ॥ ७ ॥
नतेजस्तेजस्वीप्रसृतं[14]मपरेषांप्रसहते
सतस्यस्वोभावःप्रकृति[15]नियतत्वादकृतकः[16] ॥
मयूखैरश्रांतं[17][18]तपतियदिदेवोदिनकरः
किमाग्नेयग्रावा[19]निकृतइव[20]तेजांसिवमति ॥ ८ ॥

---

१ किरणाः चरणाश्च २ पर्वतानां पक्षे राज्ञां. ३ प्रशस्तकपोलेषु. ४ बलवतां. ५ विधुंतुदः ६ राहुः ७ चंद्रं ८ मार्दवस्य. ९ ऊष्मरहिते. १० अविकांतःसूर्यकांत-मणिः ११ विकारं. १२ वज्रं. १३ विश्वासः. १४ विस्तृतं. १५ स्वभावाधीनत्वात्. १६ अकृत्रिमः १७ किरणैः १८ संततं १९ सूर्यकांतः २० धिकृतइव

एकचक्रोरथोयंता विकलोविषमाहयाः ॥
आक्रमत्येवतेजस्वी तथाप्यर्कोनभस्तलं ॥ ९ ॥

उदारप्रशंसा.

अयंनिजःपरोवेति गणनालघुचेतसां ॥
उदारचरितानांतु वसुधैवकुटुंबकं ॥ १ ॥
युध्यंतेपक्षिपशवः पठंतिशुकसारिकाः ॥
दातुंशक्रोतियोवित्तं सशूरःसचपंडितः ॥ २ ॥
एकेनतिष्ठताऽधस्ता दन्येनोपरितिष्ठता ॥
दातृयाचकयोर्भेदः कराभ्यामेवसूचितः ॥ ३ ॥
सैवपरंनविनश्यति तनुरपियाश्रीर्निवेशितासत्सु ॥
अवशिष्यतेहिमांशोः सैवकलायास्थिराशंभौ ॥ ४ ॥
यद्ददासिविशिष्टेभ्यो यच्चाऽश्नासिदिनेदिने ॥
तत्तेवित्तमहंमन्ये शेषंकस्याऽपिरक्षसि ॥ ५ ॥
किंतयाक्रियतेलक्ष्म्या यावधूरिवकेवला ॥
यानवेश्येवसामान्या पथिकैरपिभुज्यते ॥ ६ ॥
दातानीचोऽपिसेव्यःस्या न्निष्फलोनमहानपि ॥
जलाऽर्थीवारिधिंत्यक्त्वा पश्यकूपंनिषेवते ॥ ७ ॥
कर्णस्त्वचंशिबिर्मांसं जीवंजीमूतवाहनः ॥
ददौदधीचिरस्थीनि नास्त्यदेयंमहात्मनां ॥ ८ ॥

धीरप्रशंसा.

सहपरिजनेनविलसति धीरोर्गहनानितरतिपुनरेकः
विषमेकेननिपीतं त्रिपुरजितासहसुरैरमृतं ॥ १ ॥
निंदंतुनीतिनिपुणायदिवास्तुवंतु
लक्ष्मीःसमाविशतुगच्छतुवायथेष्टं ॥

---

१ सारथिः २ अनूरुः ३ तुरंगाः ४ स्वकीयः ५ अल्पा. ६ अनेकोपभोग्या. ७ समुद्रं. ८ दुस्तराणि. ९ शंकरेण.

अथैववा[illegible]तेवा
न्याय्यात्पथःप्रविचलंतिपदंनधीराः ॥ २ ॥
श्लाघ्यामहतामुन्नति रद्भुतमभ्यवसितंचधीराणां ॥
कनकगिरिरनभिलंघ्यो रविरनिशमनुष्ठिताऽऽरंभः ॥ ३ ॥
कदर्थितस्याऽपिहिधैर्यवृत्ते र्नशक्यतेधैर्यगुणःप्रमार्ष्टुं ॥
अधोमुखस्याऽपितनूनपातो नाऽधःशिखायातिकदाचिदेव ॥४॥
अर्थंसुखंकीर्तिरपीहमाभू दनर्थएवाऽस्तुतथाऽपिधीराः ॥
निजमतिज्ञामधिरूढमाना महोद्यमाःकर्मसमारभंते ॥ ५ ॥
अंगनवेदीवसुधा कुल्याजलधिःस्थलीचपातालं ॥
वल्मीकश्चसुमेरुः कृतमतिज्ञस्यधीरस्य ॥ ६ ॥

वीरः

कोवीरस्यमनस्विनःस्वविषयःकोवाविदेशस्तथा
यंदेशंश्रयतेतमेवकुरुतेबाहुप्रतापाऽर्जितं ॥
यद्दंष्ट्रानखलांगुलप्रहरणःसिंहोवनंगाहते
तस्मिन्नेवहतद्विपेंद्ररुधिरैस्तृष्णांछिनत्त्यात्मनः ॥ १ ॥
विनाप्यर्थैर्वीरःस्पृशतिबहुमानोन्नतिपदं
समायुक्तोप्यर्थैःपरिभवपदंयातिकृपणः ॥
स्वभावादुद्भूतांगुणसमुदयाऽवाप्तिविषयां
द्युतिंसैंहींकिंश्वाधृतकनकमालोऽपिलभते ॥ २ ॥
एकेनाऽपिहिशूरेण पदाऽऽक्रांतंमहीतलं ॥
क्रियतेभास्करस्येव स्फारस्फुरिततेजसा ॥ ३ ॥
पल्लवतःकल्पतरो रेषविशेषःकरस्यतेवीर ॥
भूषयतिकर्णमेकः परस्तुकर्णंतिरस्कुरुते ॥ ४ ॥

---

१ न्यायादनपेतात् २ मार्गात् ३ व्यापारः ४ दरिद्रस्य. ५ शोधयितुं. ६ अग्नेः ७ अजिरं. ८ कृत्रिमसरित्. ९ वाल्मीकमितिलोके. १० परदेशः ११ दंष्ट्रा (दाढा इतिलो०) नखःपुनर्नखः लांगुलं पुच्छं तान्येवप्रहरणानिआयुधानियस्यसः १२ प्रविशति. १३ गजश्रेष्ठानां,. १४ कांतिं. १५ सिंहसंबंधिनीं १६ धृताकनकस्यसुवर्णस्यमालायेन. १७ किसलयात्. १८ श्रोत्रं. १९ अंगराजं.

गुणप्रशंसा.

श्री ॥ गुणाः कुर्वंतिदूतत्वं दूरेऽपिवसतांसतां ॥
केतकीगंधमाघ्राय स्वयंगच्छंतिषट्पदाः ॥ १ ॥

गुणवज्जनसंसर्गा द्यातिसर्वोऽपिगौरवं ॥
पुष्पमालाप्रसंगेन सूत्रंशिरसिधार्यते ॥ २ ॥

गुणाःसर्वत्रपूज्यंते पितृवंशोनिरर्थकः ॥
वसुदेवंपरित्यज्य वासुदेवंनमेज्जनः ॥ ३ ॥

यदिसंतिगुणाःपुंसां विकसंत्येवतेस्वयं ॥
नहिकस्तूरिकाऽऽमोदः शपथेननिवार्यते ॥ ४ ॥

गुणिनिगुणज्ञोरमते नाऽगुणशीलस्यगुणिनिपरितोषः ॥
अलिरेतिवनात्पद्मं नदर्दुरस्त्वेकवासोऽपि ॥ ५ ॥

गुणैःसर्वज्ञकल्पोऽपि सीदंत्येकोनिराश्रयः ॥
अनर्घ्यमपिमाणिक्यं हेमाऽऽश्रयमपेक्षते ॥ ६ ॥

गुणैर्गौरवमायाति नमहत्याऽपिसंपदा ॥
पूर्णेंदुर्नतथावंद्यो निष्कलंकोयथाकृशः ॥ ७ ॥

गुणवंतःक्लिश्यंते प्रायेणभवंतिनिर्गुणाःसुखिनः ॥
बंधनमायांतिशुका यथेष्टसंचारिणःकाकाः ॥ ८ ॥

गुणयुक्तोऽप्यधोयाति रिक्तःकूपेयथाघटः ॥
निर्गुणोऽपिमृतःपश्य जनैःशिरसिधार्यते ॥ ९ ॥

कौशेयंकृमिजंसुवर्णमुपलाद्दूर्वाऽपिगोरोमतः
पंकात्तामरसंशशांकउदधेर्गोपित्ततोरोचनं ॥
काष्ठादग्निरहेःफणादपिमणिर्दूर्वाऽपिगोरोमतः
प्राकाश्यंस्वगुणोदयेनगुणिनोयांतिकिंजन्मना ॥१०॥

गुणैरुत्तुंगतांयाति नोच्चैरासनसंस्थितः ॥
प्रासादशिखरारूढः काकःकिंगरुडायते ॥ ११ ॥

---

१ भ्रमराः २ भ्रमरः ३ भेकः ४ शिवतुल्यः ५ दुःखंप्राप्नोति. ६ अमूल्यं. ७ [illegible] ८ रज्जुयुक्तः अन्यत्रविनयादिगुणसंपन्नः ९ रिताइतिलो० [illegible] १० पटोब, पीतांबर इतिलो० ११ पाषाणात्. १२ कमलं, १३ [illegible] १४ [illegible] १५ गोरोचनं. १६ राजभवनं देवालयोवा.

गुणेषुक्रियतांयत्नः किमाटोपैःप्रयोजनं ॥
विक्रीयंतेनघंटाभि र्गावःक्षीरविवर्जिताः ॥ १२ ॥
जात्युत्कृष्टस्यहिमणे र्नोचितंशोणघर्षणं ॥
आदर्शेचित्रकारैःकिं लिख्यतेप्रतिबिंबितं ॥ १३ ॥
अनवसरेगुणवानपि त्वदयादवतार्यतेहारः ॥
पथ्यशलाकाऽवसरे तृणायभूपैःप्रसार्यतेरत्नकरः ॥ १४ ॥
गुणिनोऽपिहिसीदंति गुणग्राहीनचेदिह ॥
सगुणःपूर्णकुंभोऽपि कूपएवनिमज्जति ॥ १५ ॥

संतोषप्रशंसा.

श्री० ॥ अकृत्वापरसंताप मगत्वाखलनम्रतां ॥
अनुत्सृज्यसतांवर्त्म यत्स्वल्पमपितद्बहु ॥ १ ॥
वयमिहपरितुष्टावल्कलैस्त्वंचलक्ष्म्या
समइहपरितोषोनिर्विशेषोविशेषः ॥
सहिभवतिदरिद्रोयस्यतृष्णाविशाला
मनसिचपरितुष्टेकोऽर्थवान्कोदरिद्रः ॥ २ ॥
दरिद्रस्यपरामूर्ति स्तृष्णानद्रविणाल्पता ॥
जरद्गवधनःशंभु स्तथाऽपिपरमेश्वरः ॥ ३ ॥
संतोषाऽमृततृप्तानां यत्सुखंशांतचेतसां ॥
कुतस्तद्धनलुब्धाना मितश्चेतश्चधावतां ॥ ४ ॥
योमेगर्भगतस्याऽपि वृत्तिंकल्पितवान्विभुः ॥
शेषवृत्तिविधानाय सकिंसुप्तोऽथवामृतः ॥ ५ ॥
पंचमेहनिषष्ठेवा शाकंपचतिस्वेगृहे ॥
अनृणीचाऽप्रवासीच सवारिचरमोदते ॥ ६ ॥
अप्रार्थितानिदुःखानि यथैवाऽऽयांतिदेहिनां ॥
सुखान्यपितथाऽऽयांति दैन्यमत्राऽतिरिच्यते ॥ ७ ॥

---

१ आडंबरैः २ माहात्म्यइतिलोके. ३ मार्गे ४ वृद्धवृषभःसएवधनंयस्यसः ५ जीवनोपायं ६ विशिष्यते.

आत्माऽऽधीनशरीराणां स्वपतांनिद्रयास्वथा ॥
कदन्नमपिमर्त्यानां मधुत्वायकल्पते ॥ ८ ॥
सर्वाःसंपत्तयस्तस्य संतुष्टंयस्यमानसं ॥
उपानद्गूढपादस्य ननुचर्माऽऽवृतैवभूः ॥ ९ ॥
आरोग्यंविद्वत्ता सज्जनमैत्रीमहाकुलेजन्म ॥
स्वाऽऽधीनताचपुंसां महदैश्वर्यंविनाऽप्यर्थं ॥ १० ॥

सर्पाःपिबंतिपवनंनचदुर्बलास्ते
शुष्कैस्तृणैर्वनगजाबलिनोभवंति ॥
कंदैःफलैर्मुनिवराःक्षपयंतिकालं
संतोषएवपुरुषस्यपरंनिधानं ॥ ११ ॥

अर्थीकरोतिदैन्यं लब्धाऽर्थोगर्वपरितोषं ॥
नष्टधनश्चसशोकः सुखमास्तेनिस्पृहःपुरुषः ॥ १२ ॥
तन्मूलंगुरुतायाः स्तत्सौख्यंतद्यशस्तदौर्जित्यं ॥
तत्सौभाग्यंपुंसां यदेतदप्रार्थनंनाम ॥ १३ ॥

मित्रं.

यस्यमित्रेणसंभाषा यस्यमित्रेणसंस्थितिः
मित्रेणसहयोभुंक्ते ततोनास्तीहपुण्यवान् ॥ १ ॥
परोक्षेकार्यहंतारं प्रत्यक्षेप्रियवादिनं ॥
वर्जयेत्तादृशंमित्रं विषकुंभंपयोमुखं ॥ २ ॥
शुचित्वंत्यागिताशौर्यं सामान्यंसुखदुःखयोः ॥
दाक्षिण्यंचानुरक्तिश्च सत्यताचसुहृद्गुणाः ॥ ३ ॥
रहस्यभेदोयाच्ञाच नैष्ठुर्यंचलचित्तता ॥
क्रोधोनिःसत्यताद्यूत मेतन्मित्रस्यदूषणं ॥ ४ ॥
अन्यथैवहिसौहार्दं भवेत्स्वच्छांऽतरात्मनः ॥
प्रवर्ततेऽन्यथावाणी शाठ्योपहतचेतसः ॥ ५ ॥

---

१ कुत्सितमन्नं २ उपानद्भ्यांगूढौपिहितौ पादौ यस्य. ३ गौरवस्य. ४ उत्साहशीलत्वं. ५ अयाचनं. ६ मिथोभाषणं ७ तस्मात्पुरुषात्. ८ निर्मलचित्तत्वं. ९ दानशीलत्वं. १० समानस्यभावःसामान्यंसमतामित्यर्थः ११ सरलत्वं. १२ प्रीतिः १३ गुह्यप्रकाशनं १४ प्रार्थनं.

तत्रमित्रनवस्तव्यं यत्रनाऽस्तिचतुष्टयं ॥
ऋणदाताचवैद्यश्च श्रोत्रियःसजलानदी ॥ ६ ॥
स्वाभाविकंतुयन्मित्रं भाग्येनैवाऽभिजायते ॥
तदकृत्रिमसौहार्दं मापत्स्वपिनमुंचति ॥ ७ ॥
नमातरिनदारेषु नसोदर्येनचाऽऽत्मनि ॥
विश्वासस्तादृशःपुंसां यावान्मित्रेस्वभावजे ॥ ८ ॥
शोकाऽरातिभयत्राणं प्रीतिविश्रंभभाजनं ॥
केनरत्नमिदंसृष्टं मित्रमित्यक्षरद्वयं ॥ ९ ॥
मित्रंप्रीतिरसायनंनयनयोरानंदनंचेतसः
पात्रंयत्सुखदुःखयोःसहभवेन्मित्रेणतद्दुर्लभं ॥
येचाऽन्येसुहृदःसमृद्धिसमयेद्रव्याभिलाषाऽऽकुला
स्तेसर्वत्रमिलंतितत्त्वनिकषग्रावातुतेषांविपत् ॥ १० ॥
क्षीरेणाऽऽत्मगतोदकायहिगुणादत्ताःपुरातेऽखिलाः
क्षीरेतापमवेक्ष्यतेनपयसाह्यात्माकृशानौहुतः ॥
गंतुंपावकमुन्मनस्तदभवद्दृष्ट्वातुमित्राऽऽपदं
युक्तंतेनजलेनशाम्यतिसतांमैत्रीपुनस्त्वीदृशी ॥ ११ ॥
उदयन्नेवसविता पद्मेष्वर्पयतिश्रियं ॥
विभावयन्समृद्धीनां फलंसुहृदनुग्रहं ॥ १२ ॥
नहिबुद्धिगुणेनैव सुहृदामर्थदर्शनं ॥
कार्यसिद्धिपथःसूक्ष्मः स्नेहेनाऽप्युपलभ्यते ॥ १३ ॥

दारिद्र्यवर्णनं.

श्री० ॥ हेदारिद्र्यनमस्तेऽस्तु धन्योऽहंत्वत्प्रसादतः ॥
लोकान्पश्याम्यहंसर्वान् नमांपश्यतिकश्चन ॥ १ ॥
दारिद्र्यशोचामिभवंतमेव मस्मच्छरीरेसुहृदित्युषित्वा ॥
विपन्नदेहेमयिमंदभाग्ये ममेतिचिंताक्कगमिष्यसित्वं ॥ २ ॥

---

१ अकपटमित्रता. २ शत्रुः ३ विश्वासः ४ प्रीतेःरसायनमिवरसायनंप्रीतिवर्धकमित्यर्थः ५ कसोटीतिलो० ६ अग्नौ. ७ मित्रविपत्तिं. ८ सुहृदस्तुअनुग्रहःप्रसादस्तं. ९ स्थित्वा. १० विनष्टशरीरे. ११ हतभाग्ये.

दग्धंखांडवमर्जुनेनबलिनादिव्यैर्द्रुमैःसेवितं
दग्धावायुसुतेनरावणपुरीलंकापुनःस्वर्णभूः ॥
दग्धःपंचशरःपिनाकपतिनातेनाऽप्ययुक्तंकृतं
दारिद्र्यंजनतापकारकमिदंकेनाऽपिदग्धंनहि ॥ ३ ॥
द्वाविमावंभसिक्षेप्यौ गाढंबध्वागलेशिलां ॥
धनिनंचाऽप्रदातारं दरिद्रंचाऽतपस्विनं ॥ ४ ॥
अर्थानसंतिनचमुंचतिमांदुराशा दातानसंकुचितदुर्ललितंमनोमे ॥
याच्ञाहिलाघवकरीस्ववधेचपापं प्राणःस्वयंव्रजतुकिंप्रविलंबितेन ॥५॥
उत्तिष्ठक्षणमेकमुद्वहसखेदारिद्र्यभारंगुरुं
श्रांतस्तावदहंचिरंमरणभोसेवेत्वदीयंसुखं ॥
इत्युक्त्वाधनवर्जितेनसहसागत्वाश्मशानेशवं
दारिद्र्यान्मरणंवरंवरमितिज्ञात्वैवतूष्णींस्थितं ॥ ६ ॥
पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनंदेव ॥
विलसत्करेणुगहनं सम्प्रतिसममावयोःसदनं ॥ ७ ॥
योगंगामतरत्तथैवयमुनांयोनर्मदांशर्मदां
कावार्तासरिदंबुलंघनविधौयश्चार्णवांस्तीर्णवान् ॥
सोऽस्माकंचिरमास्थितोऽपिसहसादारिद्र्यनामासखा
त्वद्दानांऽबुसरित्प्रवाहलहरीमग्नोनसंभाव्यते ॥ ८ ॥
दारिद्र्यान्मरणाद्वा मरणंसंरोचतेनदारिद्र्यं ॥
अल्पक्लेशंमरणं दारिद्र्यमनंतकंदुःखं ॥ ९ ॥
अत्यंतविमुखेदैवे व्यर्थेयत्नेचपौरुषे ॥
मनस्विनोदरिद्रस्य वनादन्यत्कुतःसुखं ॥ १० ॥
दारिद्र्याद्ध्रियमेतिह्रीपरिगतःसत्वात्परिभ्रश्यते

---

१ मदनः २ लघुत्वकारिणी. ३ प्रविलंबितेनकालदैर्घ्येणेतियावत्. ४ धारय. ५ पृथूनिकार्तस्वरस्यसुवर्णस्यपात्राणियस्मिंस्तत्. पक्षे पृथुकानांबालानामार्तस्वरारुदितशब्दास्तेषांपात्रंभाजनं ६ भूषिताअलंकृतानिःशेषाःपरिजनायस्मिन्. पक्षे भुविस्थितानिःशेषपरिजनायस्मिन्. ७ विलसंत्यःशोभमानाःकरेणवोहस्तिन्यस्ताभिर्गहनंनिबिडं; पक्षे बवयोःसावर्ण्यात्बिलेसंतएवसत्काबिलवर्तिनोयेरेणवोधूलयस्तैर्गहनंव्याप्तं. ८ गृहं. ९. सुखदायी १० नष्टश्यते. ११ पराङ्मुखे. १२ लज्जांप्राप्नोति. १३ पराभितः

निःसत्त्वःपरिभूयतेपरिभवान्निर्वेदमापद्यते ॥
निर्विण्णःशुचमेतिशोकविहतोबुद्ध्यापरित्यज्यते
निर्बुद्धिःक्षयमेत्यहोनिधनतासर्वापदामास्पदं ॥ ११ ॥

इहलोकेऽपिधनिनां परोऽपिस्वजनायते ॥
स्वजनोऽपिदरिद्राणां तत्क्षणाद्दुर्जनायते ॥ १२ ॥

परीक्ष्यसत्कुलंविद्यां शीलंशौर्यंसुरूपतां ॥
विधिर्ददातिनिपुणः कन्यामिवदरिद्रतां ॥ १३ ॥

मारोदीश्चिरमेहिवत्सरुदतोदृष्ट्वाऽद्यबालानिमा
नायातस्तववत्सदास्यतिपिताग्रैवेयकंवाससी ॥
श्रुत्वैवंगृहिणीवचांसिनिकटेकुड्यस्यनिष्किंचनो
निःश्वस्याऽश्रुजलप्लवप्लुततनुःपांथःपुनःप्रस्थितः ॥ १४ ॥

अयेलाजानुच्चैःपथिवचनमाकर्ण्यगृहिणी
शिशोःकर्णौयत्नात्सुपिहितवतीदीनवदना ॥
मयिक्षीणोपायेयदकृतदशावश्रुशबले
तदंतःशल्यंमेत्वमिवपुनरुद्धर्तुमुचितः ॥ १५ ॥

कथाखंडमिदंमयच्छयादवात्वांऽकगृहाणाऽर्भकं
रिक्तभूतलमत्रनाथभवतःपृष्ठपलालोच्चयः ॥
दंपत्योरितिजल्पतोर्निशियदाचोरःप्रविष्टस्तदा
लब्धंकर्पटमन्यतस्तदुपरिक्षिप्त्वारुदन्निर्गतः ॥ १६ ॥

वृद्धोनःपतिरेषमंचकगतःस्थूणाऽवशेषंगृहं
कालोऽभ्यर्णजलागमःकुशलिनीवत्सस्यवार्ताऽपिनो ॥
यत्नात्संचिततैलबिंदुघटिकाभग्नेतिपर्याकुला
दृष्ट्वागर्भभराऽऽकुलांनिजवधूंश्वश्रूश्चिरंरोदिति ॥ १७ ॥

अंबातुष्यतिनमया नस्नुषयासाऽपिनांबयानमया ॥
अहमपिनतयानतया वदराजन्कस्यदोषोयं ॥ १८ ॥

---

१ खेदं. २ स्थान. ३ रोदनमाकुरु. ४ कंठभूषणं. ५ वस्त्रे. ६ भित्तेः ७ दरिद्रः ८ छादितवती. ९ गोदडीतिलो० १० तृणसंचयः ११ जीर्णवस्त्रखंडं. १२ शय्या. लाखइतिलो १३ मेढीइतिलो. १४ समीपः १५ व्याकुला. १६ स्नुषा.

चांडालश्चदरिद्रश्च द्वावेतौसदृशाविह ॥
चांडालोऽपिदरिद्रोऽपि सर्वकर्मसुनिंदितः ॥ १९ ॥

नोसेवाविहितागुरोरपिचनोनोवाकृतंपूजनं
देवानांविधिवन्नवाशिवशिवाल्लब्धादयःसेविताः ॥
किंतुत्वच्चरणौसरस्वतिरसादाजन्मनःसेवितौ
तस्मान्मांविजहातिसाभगवतीशंकेसपत्नीतव ॥ २० ॥

दूयेकांताकरंवीक्ष्य मणिकंकणवर्जितं ॥
अतःपरंपरंदूये मणिकंकणवर्जितं ॥ २१ ॥

एकोहिदोषोगुणसन्निपाते निमज्जतींदोरितियोबभाषे ॥
नतेनदृष्टंकविनासमस्तं दारिद्र्यमेकंगुणकोटिहारि ॥ २२ ॥

रात्रौजानुर्दिवाभानुः कृशानुःसंध्ययोर्द्वयोः ॥
पश्यशीतंमयानीतं जानुभानुकृशानुभिः ॥ २३ ॥

क्षुत्क्षामाःशिशवःशवाइवभृशंमंदाऽऽशयाबांधवा
लिप्ताजर्जरकर्करीजतुलवैर्नोमांतथाबाधते ॥
गेहिन्यात्रुटितांऽशुकघटयितुंकृत्वासकाकुस्मितं
कुप्यंतीप्रतिवेशिलोकगृहिणीसूचींयथायाचिता ॥ २४ ॥

दारिद्र्यभोत्वंपरमंविवेकि गुणाऽधिकेपुंसिसदानुरक्तं ॥
विद्याविहीनेगुणवर्जितेच मुहूर्तमात्रंनरतिंकरोषि ॥ २५ ॥

भद्रेवाणिममाऽऽननेकुरुदयांवर्णाऽनुपूर्व्याचिरं
चेतःस्वास्थ्यमुपैहियाहिकरुणेमज्जेस्थिरत्वंव्रज ॥
लज्जेतिष्ठपराङ्मुखीक्षणमहोतृष्णेपुरःस्थीयतां
पापोयावदहंब्रवीमिधनिनांदेहीतिदीनंवचः ॥ २६ ॥

अयंपटोमेपितुरंगभूषणं पितामहाद्यैरुपभुक्तयौवनः ॥
अलंकरिष्यत्यथपुत्रपौत्रकान् मयाऽधुनापुष्पवदेवधार्यते ॥ २७ ॥

---

१ सवतइतिलो॰ २ खेदंप्राप्नोमि. ३ मणियुक्तंयत्कंकणंतेनवर्जितं. ४ अत्यंतं ५ मृन्मयभाजनं मडकेंतिलो. ६ धान्यकणरहितं. ७ गुणसमुदाये. ८ कोटिगुणनाशकमितिभावः ९ अग्निः १० चालनीसदृशःसच्छिद्रःकुंभः ११ लाक्षाखंडैः १२ स्तवसहितस्मित १३ विचारशीलं. १४ प्रीतिं.

याचकनिंदा.

श्री ॥ तृणादपिलघुस्तूलं स्तूलादपिचयाचकः ॥
वायुनाकिननीतोऽसौ मामयंयाचयेदिति ॥ १ ॥
वेपथुर्मलिनंवक्त्रं दीनावाग्गद्गदःस्वरः ॥
मरणेयानिचिन्हानि तानिचिन्हानियाचके ॥ २ ॥
तावत्सर्वगुणालयःपटुमतिःसाधुःसतांवल्लभः
शूरःसच्चरितःकलंकरहितोमानीकृतज्ञःकविः ॥
दक्षोधर्मरतःसुशीलगुणवांस्तावत्प्रतिष्ठाऽन्वितो
यावन्निष्ठुरवज्रपातसदृशंदेहीतिनोभाषते ॥ ३ ॥
दक्षिणाशाप्रवृत्तस्य प्रसारितकरस्यच ॥
तेजस्तेजस्विनोऽर्कस्य न्हियतेऽन्यस्यकाकथा ॥ ४ ॥
काकआव्हयतेकाकान् याचकोनतुयाचकान् ॥
काकयाचकयोर्मध्ये वरंकाकोनयाचकः ॥ ५ ॥
याचनायांप्रवृत्तस्य काकानामनदुर्दशा ॥
चेतश्चेत्क्रियतेतस्यां यातनैवोपतिष्ठते ॥ ६ ॥
तावन्महतांमहती यावत्किमपिहिनयाच्यतेलोकं ॥
बलिमनुयाचनसमये श्रीपतिरपिवामनोजातः ॥ ७ ॥
संतापिनानांमधुरैर्वचोभि र्मिथ्योपचारैश्चवशीकृतानां ॥
आशावतांश्रद्दधतांचलोके किमर्थिनांवंचयितव्यमस्ति ॥ ८ ॥
सेवेवमानमखिलं ज्योत्स्नेवतमोजरेवलावण्यं ॥
हरिहरकथेवदुरितं गुणशतमप्यर्थिताहरति ॥ ९ ॥
भ्रातर्धातरशेषयाचकजनैर्वैरायसेसर्वथा
यस्माद्विक्रमशालिवाहनमहीभृन्मुंजभोजादयः ॥
अत्यंतंचिरजीविनोनविहितास्तेविश्वजीवातवो

---

१ कार्पासः २ कंपः ३ दक्षिणदिशायांप्रवर्तमानस्य. पक्षे दक्षिणायाःआशातयाप्रवृत्तस्य. ४ प्रसारिताःविस्तारिताःकराःकिरणाःयेन, पक्षे प्रसारितःकरोहस्तोयेन. ५ न्हासंप्राप्नोति. ६ अंतःकरणं, पक्षे याचनाशब्दस्थचकारेतकारःक्रियतेचेद्यातनैवजायते. ७ लक्ष्मीपतिरपि, ८ न्हस्वः पक्षे लघुः ९ चंद्रकांतिः १० याचकत्वं,

मार्केडध्रुवलोमशप्रमृतयःसृष्टाःप्रभूताऽऽयुषः ॥ १० ॥
विद्यावतःकुलीनस्य धनंयाचितुमिच्छतः ॥
कंठेपारावतस्येव वाक्करोतिगताऽगतं ॥ ११ ॥
उड्डीनागुणपत्रिणःसुखफलान्यारादिकीर्णान्यधः
पर्यस्ताःपरितोयशःस्तबकिताःसंपल्लतापल्लवाः ॥
प्रागेवाऽपसृतप्रमोदहरिणच्छायाकथाऽतंगता
दैन्येऽरण्यमतंगजेनसहसाभग्नेऽभिमानद्रुमे ॥ १२ ॥
गुरुतामुपयातियन्मृतः पुरुषस्तद्विदितंमयाऽधुना ॥
ननुलाघवहेतुरर्थिता नमृतेतिष्ठतिसार्थनागपि ॥ १३
साधुरेवाऽर्थिभिर्याच्यः क्षीणवित्तोऽपिसर्वदा ॥
शुष्कोऽपिहिनदीमार्गः खन्यतेसलिलाऽर्थिभिः ॥ १४ ॥
देहीतिवचनंश्रुत्वा हृदिस्था.पंचदेवताः ॥
मुखान्निर्गत्यगच्छंति श्रीर्ह्रीधीधृतिकीर्तयः ॥ १५ ॥
नवीनदीनभावस्य याचकस्याऽतिमानिनः ॥
वचोजीवितयोरासी त्पुरोनिःसरणेरणः ॥ १६ ॥
वदनाच्चबहिर्यांति प्राणायाच्ञाक्षरैःसह ॥
ददामीत्यक्षरैर्दातुः पुनःकर्णाद्विशंतिहि ॥ १७ ॥
द्वाग्द्वारिपरेषामविरलमटनिद्वारपालैःकराले
र्दृष्टोयोऽप्याहतःसन्नरणतिगणयतिस्वाऽपमानंनुनैव ॥
क्षत्तुंशक्नोतिनाऽन्यंस्वसदृशमितराऽगारमप्याश्रयंतं
श्वाप्यस्यात्मोदरार्थंकथमहहशुनानोसमोयाचकःस्यात् ॥ १८ ॥
जनस्थानेभ्रांतंविषयमृगतृष्णाऽऽकुलतया
वचोवैदेहीतिप्रतिपदमुदश्रुप्रलपितं ॥

१ गुणाएवपत्रिणः २ समीपे. ३ दैन्यमेवअरण्यगजः ४ किंचिदपि. ५ अह-महमिकयाअयत्नोनिःसरणे. ६ किंकरैः ७ जनानांस्थानानिनगरपत्तनादीनितेषुभ्रमणंकृ-तं. रामपक्षेजनस्थानेनासिकेपरिभ्रमणंकृतं. ८ विषयाएवमृगास्तेषांतृष्णातयाऽव्याप्तत्वेन. ९ वैदेहीतिपदच्छेदः देहीतिप्रलपितं. पक्षे वैदेहीजानकीतिप्रलपितं.

कृता[1]लंकाभर्तुर्वदनपरिपाटीषुरचना
मयाऽऽमेरामस्वं[2]कुशलवसुतानत्वधिगता ॥ १९ ॥
तीक्ष्णधारेणखड्गेन वरंजिह्वाद्विधाकृता ॥
नतुमानंपरित्यज्य देहिदेहीतिभाषितं ॥ २० ॥
याचकवीरोधन्यः [3]करदानग्राहकःस्वदातृभ्यः ॥
कुरुतेपराङ्मुखंवा हतिनभ्रंवाहरत्यसौपुण्यं ॥ २१ ॥
पुरतःप्रेरयत्याशा लज्जापृष्ठाऽवलंबिनी ॥
ततोलज्जाऽऽशयोर्मध्ये दोलायत्यर्थिनांमनः ॥ २२ ॥
शूराःकेऽपिपुरःस्थितांरिपुनर[4]भेणिसहंतेसुखं
धीराःकेचनपंचबाणसदृशंकांतादृगंताऽऽहतिं ॥
केचित्क्रूररवांश्चपंचे[5]वदनान्दंती[6]चपेटानभटा
नैवाऽर्थिप्रकरंप्रसारितकरंकश्चिद्विसोढुंक्षमः ॥ २३ ॥
याचनाहिपुरुषस्यमहत्त्वं नाशयत्यखिलमेवतथाहि ॥
सद्यएवभगवानपिविष्णु र्वामनोभवतियाचितुमिच्छन् ॥ २४ ॥

कृपणनिंदा.

श्लो० ॥कृपणेनसमोदाता नभूतोनभविष्यति ॥
अस्पृशन्नेववित्तानि यःपरेभ्यःप्रयच्छति ॥ १ ॥
कृपणोधनलोभेन स्वांभार्यांनाभिगच्छति ॥
अस्यांयोजायतेपुत्रः समेवित्तंहरेदिति ॥ २ ॥
प्राप्तानपिनोलभते भोगानभोक्तुंस्वकर्मभिःकृपणः ॥
द्राक्षाफलपाकसमये मुखपाको[7]भवतिकाकानां ॥ ३ ॥
यदधोऽधःक्षितौवित्तं निचखानमितंपचः ॥
तदधोनिलयंगंतुं चक्रेपंथानमग्रतः[8] ॥ ४ ॥

---

१ काभर्तुःकुत्सितस्वामिनः वदनपरिपाटीषुरचनाअलंअत्यर्थंकृता. पक्षे. लंकाभर्तुः रावणस्यवदनपरिपाटीषुरचनाबाणरचनाकृता. २ कुशलंयद्रूप्यंतद्भावोनसंपादितः पक्षे. कुशलवौसुतौयस्याःसावैदेही. ३ करात्हस्तात्दानस्यग्राहकः पक्षे करः खंडणीतिलोके दानंसमर्पणंतद्ग्राहकः ४ कानाकडाल्लवेधं, ५ सिंहान्. ६ मसरोगः ७ आरोपयामास, ८ पाताल.

निजसौख्यंनिरुंधानो योधनाऽर्जनमिच्छति ॥
परार्थभारवाहीव क्लेशस्यैवहिभाजनं ॥ ५ ॥
दानोपभोगहीनेन धनेनधनिनोयदि ॥
भवामःकिनतेनैव धनेनधनिनोवयं ॥ ६ ॥
असंभोगेनसामान्यं कृपणस्यधनंपरैः ॥
अस्येदमितिसंबंधो हानौदुःखेनगम्यते ॥ ७ ॥
यद्ददातियदश्नाति तदेवधनिनोधनं ॥
अन्येमृतस्यक्रीडंति दारैरपिधनैरपि ॥ ८ ॥
फलंस्वेच्छालभ्यंप्रतिवनमखेदंक्षितिरुहां
पयःस्थानेस्थानेशिशिरमधुरंपुण्यसरितां ॥
मृदुस्पर्शाशय्यासुललितलतापल्लवमयी
सहंतेसंतापंतदपिधनिनांद्वारिकृपणाः ॥ ९ ॥
यदर्ज्यतेपरिक्लेशै रर्जितंयन्नभुज्यते ॥
विभज्यतेयदंतेऽन्यैः कस्यचिन्माऽस्तुतद्धनं ॥ १० ॥
यत्करोत्यरतिंक्लेशं तृष्णांमोहंप्रजागरं ॥
नतत्धनंकदर्याणां त्दृदयेव्याधिरेवसः ॥ ११ ॥
मृत्युःशरीरगोप्तारं धनरक्षंवसुंधरा ॥
दुश्चारिणीवहसति स्वपतिंपुत्रवत्सलं ॥ १२ ॥
दृढतरनिबद्धमुष्टेः कोशनिषण्णस्यसहजमलिनस्य ॥
कृपणस्यकृपाणस्यच केवलमाकारतोभेदः ॥ १३ ॥
कृपणस्यसमृद्धीनां भोक्तारःसंतिकेचिदतिनिपुणाः ॥
जलसंपदोऽम्बुराशे र्यांतिवशंशश्वदौर्वाग्नेः ॥ १४ ॥
योनददातिनभुंक्ते सतिविभवेनैवतस्यतद्द्रव्यं ॥

---

१ क्लेशरहितं. २ वृक्षाणां. ३ संपाद्यते. ४ अवसाने. ५ अस्वस्थत्वं. ६ विचाराशंकि. ७ कृपणानां ८ पीडैव. ९ दृढतरंअतिनिबिडंनिबद्धामुष्टिर्येन. पक्षे दृढतरंनिबद्धामुष्टिःत्सरुर्यस्य. १० कोशागारेनिषण्णस्यस्थितस्य. प० कोशेखड्गपिधानेस्थितस्य. ११ सहजमलिनस्येतिउभयत्रापिसमं. १२ आकारतःआकृत्याभेदः प० कृपणशब्दे अकारोवर्तते कृपाणशब्देआकारोवर्ततेएतावतैवभेदःभिन्नत्वं. कृपाणःखड्गः तरवारइतिलोके. १३ समुद्रस्य. १४ वाडवाग्नेः

तृणमयकृत्रिमपुरुषो रक्षतिसस्यंपरस्यार्थे ॥ १६ ॥
यदिभवतिधनेनधनी क्षितितलनिहितेनभोगरहितेन ॥
तस्माद्वयमपिधनिन स्तिष्ठतिनःकांचनोमेरुः ॥ १७ ॥
कृपणेनशवेनैव मृतेनापिनदीयते ॥
मांसंवर्धयतातेन काकस्योपकृतिःकृता ॥ १८ ॥
उदारचरितस्त्यागी याचितःकृपणोऽधिकः ॥
एकोधनंततःप्राणा नन्यःप्राणांस्ततोधनं ॥ १९ ॥
देहीतिवक्तुकामस्य यद्दुःखमुपजायते ॥
दाताचेत्तद्विजानीया द्द्यात्स्वपिशितान्यपि ॥ २० ॥
जहातिसहसाऽऽसनंझटितिपृच्छतिस्वागतं
नमस्यतिमुहुर्मुहुःश्रुतिमनोहरंभाषते ॥
ददातिकुसुमंफलंशिथिलयत्यभीष्टांक्रिया
महोनपरिचीयतेकृपणवंचनाचातुरी ॥ २१ ॥
अर्थिनिकवयतिकेवयति पठतिचपठतिस्तवोद्यतंस्तौति ॥
पश्चाद्यामीत्युक्ते कृपणःप्रणतोऽजलिकुरुते ॥ २२ ॥

दानप्रशंसा.

श्री० ॥ अनुकूलेविधौदेयं यतःपूरयिताहरिः ॥
प्रतिकूलेविधौदेयं यतःसर्वंहरिष्यति ॥ १ ॥
दातव्यंभोक्तव्यं सतिविभवेसंग्रहोनकर्तव्यः ॥
पश्यामिमधुकरीणां संचितमर्थंहरंत्यन्ये ॥ ३ ॥
दानंभोगोनाश स्तिस्रोगतयोभवंतिवित्तस्य ॥
योनददातिनभुंक्ते तस्यतृतीयागतिर्भवति ॥ ४ ॥

---

१ तृणकृतकपटपुरुषः सस्यरक्षणार्थंउच्चप्रदेशेश्वापदभयहेतुस्तृणादिभिःपुरुषःक्रियतेइतिप्रसिद्धं. २ भूम्यंतर्गतेन. ३ उपभोगहीनेन. ४ कस्यकाउपकृतिरुपकारःकृता-अपितुनकस्यापिकापीत्यर्थः अथचकाकस्यपक्षिणः ५ त्यजतीतिशेषः ६ मांसानि. ७ सत्वरं ८ कर्णमधुरं. ९ याचके १० कवितांकरोति. ११ नम्रः १२ दैवे. १३ पूरणकर्ता. १४ ऐश्वर्ये १५ भ्रमरीणां. १६ नाशइत्यर्थः

कलिमहिमा.

श्री० ॥ नदेवैर्देवत्वंकपटपटवस्तापसजना
जनोमिथ्यावादीविरलतनुवृष्टिर्जलधरः ॥
प्रसंगोनीचानामवनिपतयोदुष्टमनसो
जनाभ्रष्टानष्टा अहहकलिकालःप्रभवति ॥ १ ॥
निर्वीर्यापृथिवीनिगोषधिरसानीचामहत्वंगता
भूपालानिजकर्मधर्मरहिताविप्राःकुमार्गेरताः ॥
भार्याभर्तृविरोधिनीपररतापुत्राःपितुर्द्वेषिणो
हाकष्टंखलुवर्तनेकलियुगेधन्यानराःसज्जनाः ॥ २ ॥
सीदंतिसंतोविलसंत्यसतः पुत्राम्रियंतेजनकश्चिरायुः ॥
परेषुमैत्रीस्वजनेषुवैरं पश्यंतुलोकाःकलिकौतुकानि ॥ ३ ॥
दूरार्दथिनमाकलय्यभजतेसद्योविरुपाक्षतां
संगेकिंचविरोचनत्वमथसंस्थानेनृसिंहाऽकृतिं ॥
पांडित्योक्तिषुवक्रतुंडरचनांदानेत्वपर्णात्मता
मेकःपंचसुरात्मकःप्रभुरहोभाग्यैःकलौलभ्यते ॥ ४ ॥
कुशलाःशब्दवार्तायां वृत्तिहीनाःसुरागिणः ॥
कलौवेदांतिनोभांति फाल्गुनेबालकाइव ॥ ५ ॥
धर्मःप्रव्रजितस्तपःप्रचलितंसत्यंचदूरेगतं
पृथ्वीमंदफलानृपाश्चकुटिलालौल्यंगताब्राह्मणाः ॥
लोकाःस्त्रीषुरताःस्त्रियश्चचपलाःपुत्राःपितुर्द्वेषिणः
साधुःसिदतीदुर्जनःप्रभवतिमामेकलौदुयुगे ॥ ६ ॥
संतःक्वाऽपिनसंतिसंतियदिवादुःखेनजीवंतिते
विद्वांसोऽपिनसंतिसंतियदिवामात्सर्ययुक्ताश्चते ॥

---

१ विरलाक्वाचित्कीतथापिअल्पावृष्टिर्यस्यसः विरलतरवृष्टिरितिवापाठः २ राजानः ३ विकृतनेत्रत्वं पक्षे शिवता, ४ रुधिराहित्यं, पक्षे बलिपितृत्वं, ५ नृसिंहवत्क्रूराकृति, पक्षे नृसिंहस्याकृतिं, ६ वक्रायातुंडस्यरचनातोः मुखवक्रत्वमित्यर्थं पक्षे वक्रतुंडस्यगणपतेरिवयारचनातां गणेशरूपत्वमित्यर्थः ७ नविद्यतेपर्णान्यपियस्यतत्तामकिंचनत्वमित्यर्थः पक्षे अपर्णापार्वतीतद्रूपता, ८ लोलुपत्व.

राजानोऽपिनसंतिसंतिमविवानूध्यायमधाहिणी
दातारोऽपिनसंतिसंतियदिवाकीनाऽनुकूलाःकलौ ॥ ७ ॥
हर्म्येहर्म्यानमधर्मकर्मविरतेर्द्रुमाण समोऽऽसनं
शास्त्रस्तोमकलाऽपूर्णिपिस्यःशांतिःसर्वानामपि ॥
सर्वान्नोयवनसमापनदिनंसंस्थासदृर्वाविधे
रर्थाऽऽशाजनिभूरभूदिहमहाऽमर्यावहोऽयंकलिः ॥ ८ ॥
सीदंतिचाग्निहोत्राणि गुरुपूजामनश्यति ॥
कुमार्यश्चप्रसूयंते मामेकलियुगेसदा ॥ ९ ॥
परामेनमुखंदग्धं हस्तौदग्धौमतिग्रहात् ॥
परस्त्रीभिर्मनोदग्धं कुतःशापःकलौयुगे ॥ १० ॥
राक्षसाःकलिमाश्रित्य जायंतेब्रह्मयोनिषु ॥
ब्राह्मणानेवबाधंते तत्राऽपिश्रोत्रियान्कृशान् ॥ ११ ॥
प्रातर्हंतकलाऽऽक्षैवोऽपिरजकस्पृष्टान्जडोरासभै
रुढान्धारयतेपदाननुदिनंधृत्वाबहिर्गच्छति ॥
गत्वाम्लेच्छमुखाऽशुचीन्स्पृशतिचस्पृष्ट्वाऽपिनस्नात्यहो
नस्नातोऽप्यथभुंक्तएवचपलोभुक्त्वाऽपिनव्रीडेति ॥ १२ ॥
शस्त्रैर्जीवतिशास्त्रमुद्दलतिपरंशूद्राऽऽत्ततैरंबुभिः
स्नात्वाऽऽचामतिदेवताःस्नपयतिस्वैरंपचत्योदनं ॥
उच्छिष्टान्नबिभेतियातियवनैरुच्चावचैःसंगति
मातंगान्निकटंगतानगणयन्मार्गेष्वमुष्मिन्हते ॥ १३ ॥
नीचैर्दुर्यवनैःशुनोभिरपिवानिःशंकमालोकितं
भुंक्तेपंक्तिविदूषकैःसहनरैरज्ञातवेदाऽक्षरैः ॥
मयाऽऽस्वादनमत्तचित्तजनतामोहायमीहाश्रित
कर्माण्यारभतेश्रुतिस्मृतिवचोदूराण्यसारैरण्यहो ॥ १४ ॥
कन्यांकामप्युदूरामविजहदुर्दर्पयौवनामक्षणतां

---

१ यज्ञानां, २ वेदबाह्यसा, ३ स्नानं ४ गर्दभैः ५ मलजले. ६ अन्नं, ७ उच्चनीचैः अनेकभेदभिन्नैः ८ मार्गेष्वतिलोके. ९ मधिशति, १० दुष्टयवनैः ११ कुत्सितैः १२ [illegible] १३ [illegible] १४ संजातयौवनां.

दृष्ट्वाऽऽशापाशकष्टोभ्रमतिचिरतरंहंतदेशांतरेषु ॥
अन्योन्याऽऽश्लेषवांछाविगलितवयसोरात्तमालिन्यमत्यो
र्दंपत्योर्व्यर्थकृतैवंहतविधिरुभयोर्लोकयोःशोकयोगं ॥ १५ ॥
नाधीतेऽत्रजनोयदि कश्चिदधीतेशतेसहस्रेवा ॥
दुस्तर्केषुभ्राम्यति दूरीकुरुतेश्रुतिस्मृतिसुतर्कान् ॥ १६ ॥

एतादृशेकलियुगेऽपिशतेषुकश्चि
जाताऽऽदरोजगतियःश्रुतिमार्गएव ॥
यंकंचिदाचरतिपात्रमसौस्तुतीनां
श्लाघ्यंमिताऽपममापिकिनमेरौसरस्मेन् ॥ १७ ॥

विद्वत्तावसुधातलेविगलितापांडित्यधर्मोगतः
श्रोतॄणांत्द्दयेष्ववुद्धिरधिकाज्ञानंगतंधारणे ॥
गाथागीतविनोदवाक्यरचनायुक्त्याजगद्रंजितं
ज्योतिर्वैद्यकशास्त्रसारमखिलंलुप्तेषुजातंकलौ ॥ १८ ॥

तृष्णानिंदा

श्री० ॥ तृष्णेदेविनमस्तुभ्यं धैर्यविप्लवकारिणि ॥
विष्णुस्त्रैलोक्यपूज्योऽपि यस्त्वयावामनीकृतः ॥ १ ॥
आशायायेदासा स्तेदासाःसर्वलोकस्य ॥
आशायेषांदासी तेषांदासायतेविश्वं ॥ २॥
भ्रांतंदेशमनेकदुर्गविषमंप्राप्तंनकिंचित्फलं
त्यक्ताजातिकुलाऽभिमानमुचितंसेवाकृतानिष्फला ॥
भुक्तंमानविवर्जितंपरगृहेष्वाशंकयाकाकवत्
तृष्णेजृंभसिपापकर्मनिरतेनाऽद्याऽपिसंतुष्यसि ॥ ३ ॥
उत्खातंनिधिशंकयाक्षितितलंध्माताागिरेर्धातवो
निस्तीर्णःसरितांपतिर्नृपतयोयत्नेनसंतोषिताः ॥
मंत्राऽऽराधनतत्परेणमनसानीताःश्मशानेनिशाः
प्राप्तःकाणवराटकोऽपिनमया तृष्णेऽधुनामुंचमां ॥ ४ ॥

---

१ अध्ययनंनकरोति. २ स्वल्पजल. ३ मरुदेशे. ४ नटादौ. ५ नीचेषु. ६ विलयं.
७ न्हस्वीकृतः ८ निक्षेपः ९ सच्छिद्रकपर्दिका. फुटकीकवडीतिलोके.

अपिमेरूपमंप्राज्ञ मपिशूरमपिस्थिरं ॥
तृणीकरोतितृष्णैका निमेषणनरोत्तमं ॥ ५ ॥
वलिभिर्मुखमाक्रांतं पलितैरंकितंशिरः ॥
गात्राणिशिथिलायंते तृष्णैकातरुणायते ॥ ६ ॥
निवृत्ताभोगेच्छाबहुपुरुषमानोविगलितः
समानाःस्वर्याताःसपदिसुन्हदोजीवितसमाः ॥
शनैर्यष्ट्युत्थानंघनतिमिररुद्धेचनयने
अहोदुष्टःकायस्तदपिमरणाऽपायचकितः ॥ ७ ॥
आशानामनदीमनोरथजलातृष्णातरंगाऽऽकुला
रागग्राहवतीवितर्कविहगाधैर्यद्रुमध्वंसिनी ॥
मोहाऽऽवर्तसुदुस्तराऽतिगहनाप्रोत्तुंगचिंतातटी
तस्याःपारगताविशुद्धमनसानंदंतियोगीश्वराः ॥ ८ ॥
खलोल्लापाःसोढाःकथमपितदाराधनपरै
र्निगृह्यांतर्बाष्पंहसितमपिशून्येनमनसा ॥
कृतश्चित्तस्तंभःप्रतिहतधियामंजलिरपि
त्वमाशेमोघाऽऽशेकिमुपरमितोनर्तयसिमां ॥ ९ ॥
अमीषांप्राणानांतुलितबिसिनीपत्रपयसां
कृतेकिंनाऽस्माभिर्विगलितविवेकैर्व्यवसितं ॥
यदाढ्यानामग्रेद्रविणमदनिस्संज्ञमनसां
कृतंम्लानव्रीडैर्निजगुणकथापातकमपि ॥ १० ॥
अंगंगलितंपलितंमुंडं दशनविहीनंजातंतुंडं ॥
वृद्धोयातिगृहीत्वादंडं तदपिनमुंचत्याशापिंडं ॥ ११ ॥
तेनाऽधीतंश्रुतंतेन तेनसर्वमनुष्ठितं ॥
येनाशाःपृष्ठतःकृत्वा नैराश्यमवलंबितं ॥ १२ ॥
निःस्वोऽप्येकशतंशतीदशशतंसोऽपीहलक्षंशतं
लक्षेशःक्षितिराजतांक्षितिपतिश्चक्रेशतांवांछति ॥
चक्रेशःसुरराजतांसुरपतिर्ब्रह्माऽऽस्पदंवांछति

१ मेरुसदृशं २ तृणवल्लघूकरोति. ३ मारुतेबलत्याहति. ४ नक्रः ५ भोवरेइतिलोके. ६ धनिकानां. ७ शून्यमनसा ८ शिरः ९ दंतः १० मुखं.

ब्रह्माविष्णुपुरंदरहरिःशिवपदंतृष्णाऽवधिकोगतः ॥ १३ ॥
आशाबद्धवनीराजन् विपरीताहिशृंखला ॥
यथाबद्धाःप्रधावंति मुक्तास्तिष्ठंतिपंगुवत् ॥ १४ ॥
नास्त्यन्यातृष्णयातुल्या काचिदस्तिनितंबिनी ॥
याप्राणानपितृष्णांतो भवत्येवाऽधिकांबया ॥ १५ ॥
च्युतादंताःसिताःकेशा दृग्निरोधःपदेपदे ॥
पातसज्जमिमंदेहं तृष्णासाध्वीनमुंचति ॥ १६ ॥
तृष्णेत्वमसितृष्णाऽधा त्रिषुस्थानेषुदृश्यसे ॥
व्याधितेष्वनपत्येषु जरापरिणतेषुच ॥ १७ ॥
तृष्णेदेविनमस्तुभ्यं यात्वसर्वन्यसर्वदा ॥
उत्पादयस्ययत्नेन गोष्पदंसागरभ्रम ॥ १८ ॥
गिरिर्महानगिरेरब्धि र्महानब्धेर्नभोमहत् ॥
नभसोऽपिमहद्ब्रह्म ततोऽप्याशागरीयसी ॥ १९ ॥
मानेनेच्छतिवारयत्युपशमेक्ष्मामालिखंत्यांन्हियां
स्वातंत्र्येपरिवृत्यतिष्ठतिकरोत्याधूयधैर्येगते ॥
तृष्णेत्वामनुबध्नताफलमियत्प्राप्तंजनेनाऽमुना
यःस्पृष्टोनपदामपत्रचरणौस्प्रष्टुंनसंमन्यते ॥ २० ॥
दंतैरुच्चलितंधियानगलितंपाण्यंध्रिणाकंपितं
दृग्भ्यांकुड्मलितंबलेनगलितंरूपश्रियाप्रोषितं ॥
प्राप्तायांयमभूपतेरिहमहाधाट्यांधरायामियं
तृष्णाकेवलमेकिकैवसुभटीधीरापुरोनृत्यति ॥ २१ ॥
धनेषुजीवितव्येषु स्त्रीषुचाऽऽहारकर्मसु ॥
अतृप्ताःप्राणिनःसर्वे याताःयास्यंतियांतिच ॥ २२ ॥
आशैवराक्षसीपुंसा माशैवविषमंजरी ॥
आशैवजीर्णमदिरा धिगाशासर्वदोषभूः ॥ २३ ॥
तेधन्याःपुण्यभाजस्ते तैस्तीर्णःक्लेशसागरः ॥
जगत्संमोहजननी यैराशाऽऽशीविषीजिता ॥ २४ ॥

१ वेहोहनिलांके, २ स्त्रा ३ हर्त्ता ४ बाधंकर्य ५ पर्वतः आस्मिनुश्लोकेसारा-लंकारः. ६ पृथ्वी. ७ नयनकर्णनकवनोत्पथ्य ८ मुकलित. ९ सर्पिणी.

शांतेर्मातुर्विवेकात्पितुरपिकृपणंमंक्षुकन्यापृथक्त्वा
माशायोषात्वंतंवाप्रजतिपरगृहान्सर्वदावीतलज्जा ॥
संपत्तेमत्कृशत्वंमयमनियमौभ्रातरौभर्त्सयंती
पुष्टाचैवात्मबंधूंस्तदपिपुनरहोहंतबंध्याऽभयाम: ॥ २५ ॥
आशाऽवलंबोपचितानकस्य तृष्णालताऽनर्थफलंमसूते ॥
दिनेदिनेलब्धरुचिर्विवस्वान् मीनंचमेषंवृषभंचभुंक्ते ॥ २६ ॥
क्षुत्तृडाशा:कुटुंबिन्यो मयिजीवतिनान्यगा: ॥
तासामाशामहासाध्वी कदाचिन्मांनमुंचति ॥ २७ ॥
तृष्णाहिचेत्परित्यक्ता कोदरिद्र:कईश्वर: ॥
तस्याश्चेत्प्रसरोदत्तो दास्यंचशिरसिस्थितं ॥ २८ ॥
यौवनंजरयाग्रस्त मारोग्यंव्याधिभिर्हतं ॥
जीवितंमृत्युरभ्येति तृष्णैकानिरुपद्रवा ॥ २९ ॥
त्वामुदरसाधुमन्ये शाकैरपियदसिलब्धपरितोषं ॥
हतहृदयंह्यधिकाधिक वांछाशतदुर्भरंनपुन: ॥ ३० ॥
आशानिष्ठाप्रतिष्ठा:किलममभमहिलास्तासुसौख्यंकदाचि
द्यामात्यासामदद्यादिहकिमपिनथामध्यमासापरैत्र ॥
आद्यासानोभयत्राऽप्यहहतदपिकिंसक्तनायामिनस्यां
यामौढ्यादप्रगल्भेप्रतिदिवसमुभेतकदर्थीकरोति ॥ ३१ ॥

लोभनिंदा.

श्री० ॥ लोभ:सदाविचिंत्यो लुब्धेभ्य:सर्वतोभयंदृष्टं ॥
कार्याऽकार्यविचारो लोभविमूढस्यनाऽस्त्येव ॥ १ ॥
अतिमाहममतिदुष्कर मन्याश्चर्यंचदानमर्थानां ॥
योऽपिददातिशरीरं नददातिसवित्तलेशमपि ॥ २ ॥
केचित्स्वभावलुब्धा स्तीव्रतरांयातनामपिसहंते ॥

१ शांघ्रं २ गतलज्जानिर्लज्जात्यर्थ: ३ पुष्टाबंधबंधुंतदपीतिवापाठ: ४ अहो इत्याश्चर्ये ५ अवलंब:आश्रय: ६ सूर्य ७ मत्स्यं. ८ महाइतिलोके. ९ वृषभ पक्षे मीनादृयोराशिविशेषा: १० स्त्रिय: ११ प्रतिष्ठा. १२ अस्मिन्लोके १३ निष्ठा १४ परलोके १५ आशा १६ इहलोके परलोकेच १७ निष्ठाप्रतिष्ठे १८ पीडयति.

नतुसंत्यजंतिवित्तं मात्सर्यमिवाऽधमाःसततं ॥ ३ ॥
नाऽभ्यर्थमर्थाऽर्थितया लुब्धमुद्वेजयेज्जनं ॥
अभिधर्दत्वाऽश्वरत्नश्री मंथ्यमानोऽसृजद्विषं ॥ ४ ॥
मायेणधनिनामेव धनलोभोनिरंतरं ॥
पश्यकोटिद्वयोपेतं लक्षायमणतंधनुः ॥ ५ ॥
यद्दुर्गामटवीमटंतिविकटंक्रामंतिदेशांतरं
गाहंतेगहनंसमुद्रमटनंक्लेशंकृषिंकुर्वते ॥
सेवंतेकृपणंपतिंगजघटासंघट्टदुःसंचरं
सर्पंतिमधनंधनांऽधितधियस्तल्लोभविस्फूर्जितं ॥ ६ ॥

दैवं.

श्री० ॥ दैवंफलतिसर्वत्र नविद्यानचपौरुषं ॥
समुद्रमथनाल्लेभे हरिर्लक्ष्मींहरोविषं ॥ १ ॥
प्राप्तव्यमर्थंलभतेमनुष्यो देवोऽपितंलंघयितुंनशक्तः ॥
तस्मान्नशोचामिनविस्मयोमे यदस्मदीयंनहितत्परेषां ॥ २ ॥
माधावमाधावविनैवदैवं नोधावनंसाधनमस्तिलक्ष्म्याः ॥
चेद्धावनंसाधनमस्तिलक्ष्म्याः श्वाधावमानोनलभेतलक्ष्मीं ॥३॥
दैवेविमुखतांयाते नकोऽप्यस्तिसहायवान् ॥
पितामातातथाभार्या भ्रातावाऽथसहोदरः ॥ ४ ॥
भूयिष्ठंद्रविणात्मजंजनयितुंलिप्सावताचेतसा
नार्यःपंचमयाक्रमेणकुलजाःकालेसमुद्वाहिताः ॥
सद्विद्याकवितांविदेशवसतिःसेवातथाऽभ्यर्थना
दैवेनमनिबंधकेनयुगपद्वंध्याःसमस्ताःकृताः ॥ ५ ॥
सच्छिद्रोमध्यकुटिलः कर्णःस्वर्णस्यभाजनं ॥
धिग्दैवनिहतंनेत्रं पात्रंकज्जलभस्मनः ॥ ६ ॥
ईशःकरस्थीकृतकांचनाद्रिः कुबेरमित्रोरजताऽचलस्थः ॥

१ गहनां. २ अरण्यं ३ युद्धं. ४ बिलासः ५ पराक्रमः ६ मशकः ७ नकुलोच्चनाक्यद्दिलिखापाठः ८ द्रविणंद्रव्यंतद्वदआत्मजःपुत्रस्त ९ विवाहिताः १० निष्फलाः

तथाऽपिभिक्षाऽऽनमस्यजातं विधौशिरस्येकुटिलेकुतःश्रीः ॥ ७ ॥

क्वचित्पाणिमामंघटितमपिकार्यंविघटय
त्यशक्यंकेनाऽपिक्वचिदघटमानंघटयति ॥
तदेवंसर्वेषामुपरिपरितोजाग्रतिविधा
वुपालंभःकोऽयंजनतनुधनोपार्जनविधौ ॥ ८ ॥
यन्धात्रानिजभालपट्टलिखितंस्तोकंमहद्वाधनं
तत्प्राप्नोतिमरुस्थलेऽपिनितरांमेरौततोनाऽधिकं ॥
तद्धीरोभवचित्तवत्सकृपणांवृत्तिंवृथामाकृथाः
कूपेपश्यपयोनिधावपिघटोगृण्हातितुल्यंजलं ॥ ९ ॥
नेतायस्यबृहस्पतिःप्रहरणंवज्रंसुराःसैनिकाः
स्वर्गोदुर्गमनुग्रहःकिलहरेरैरावतोवारणः ॥
इत्याश्चर्यबलाऽन्वितोऽपिबलिभिर्भग्नःपरैःसंगरे
तद्युक्तंवरमेवदैवशरणंधिग्धिग्वृथापौरुषं ॥ १० ॥
नमस्यामोदेवान्ननुहतधियस्तेऽपिवशगा
विधिर्वंद्यःसोऽपिप्रतिनियतकर्मैकफलदः ॥
फलंकर्माऽऽयत्तंयदिकिममरैःकिंचविधिना
नमस्तत्कर्मभ्योविधिरपिनयेभ्यःप्रभवति ॥ ११ ॥
भग्नाऽऽशस्यकरंडपीडिततनोर्म्लानेंद्रियस्यक्षुधा
कृत्वाऽऽखुर्विवरंस्वयंनिपतितोनक्तंमुखेभोगिनः ॥
तृप्तस्तत्पिशितेनसत्वरमसौतेनैवयातःपथा
लोकाःपश्यतदैवमेवहिनृणांवृद्धौक्षयेकारणं ॥ १२ ॥
खल्वाटोदिवसेश्वरस्यकिरणैःसंतापितोमस्तके
वांछन्देशमनातपंविधिवशात्तालस्यमूलंगतः ॥
तत्रोच्चैर्महताफलेनपतताभग्नंसशब्दंशिरः
प्रायोगच्छतियत्रभाग्यरहितस्तत्राऽऽपदांभाजनं ॥ १३ ॥

गजभुजंगमयोरपिबंधनं शशिदिवाकरयोर्ग्रहपीडनं ॥
मतिमतांचविलोक्यदरिद्रतां विधिरहोबलवानितिमेमतिः ॥ १४ ॥
सृजतितावदशेषगुणाऽऽकरं पुरुषरत्नमलंकरणंभुवः ॥

---

१ दैवे पक्षे चंद्रे. २ वक्रे, पक्षे विपरीते. ३ आयुधं. ४ समर्थोभवति. ५ दैवं.

तदपिनक्षमतेभंगिकरोतिये दहहकष्टमपंडितताविधेः ॥ १५ ॥
स्वयंमहेशःश्वशुरोनगेशः सखाधनेशस्तनयोगणेशः ॥
तथाऽपिभिक्षाऽटनमेवशंभो र्बलीयसीकेवलमीश्वरेच्छा ॥ १६ ॥
यद्यपिदैवाल्लब्धा कस्तूरीभूमिरत्नभूरितरं ॥
नैपाकिमसौनदपिहि शौर्यार्यजानतापुंसा ॥ १७ ॥
स्ववशःकरोतिकर्म प्रमादतस्तुपरवशोभवति ॥
स्ववशोरोहतिवृक्षं निपतत्यवशस्ततःपुरुषः ॥ १८ ॥
किंत्वंनवेत्सिजगति मख्यातंलाभकारणेमूलं ॥
विधिलिखिताक्षरमालं फलतिकपालंनभूपालः ॥ १९ ॥
मज्जत्वंभसियातुमेरुशिखरंशत्रूनजयत्वाहवे
वाणिज्यंकृषिसेवनादिसकलाविद्याःकलाःशिक्षतु ॥
आकाशंसकलंप्रयातुखगवत्कृत्वाप्रयत्नंपरं
नाभाव्यंभवतीहकर्मवशतोभाव्यस्यनाशःकुतः ॥ २० ॥
द्वीपादन्यस्मादपि मध्यादपिजलनिधेर्दिशोप्यंतात् ॥
आनीयझटितिघटयति विधिरभिमतमभिमुखीभूतः ॥ २१ ॥
दैवमुल्लंघ्ययत्कार्यं क्रियतेफलवन्नतत् ॥
सरोंऽभश्चातकेनाऽऽत्तं गलरंध्रेणगच्छति ॥ २२ ॥
भाग्यवंतंप्रसूयेथा माशूरंमाचपंडितं ॥
शूराश्चकृतविद्याश्च वनेसीदंतिपांडवाः ॥ २३ ॥
नकेवलंमनुष्येषु दैवंदेवेष्वपिप्रभुः ॥
सतिमित्रेधनाऽध्यक्षे चर्मप्रावरणोहरः ॥ २४ ॥
अंभोधिःस्थलतांस्थलंजलधितांधूलीलवःशैलतां
मेरुर्मृत्कणतांतृणंकुलिशतांवज्रंतृणप्रायतां ॥
वन्हिःशीतलतांहिमंदहनतामायातियस्येच्छया
लीलादुर्ललिताऽद्भुतव्यसनिनेदैवायतस्मैनमः ॥ २५ ॥
अरक्षितंतिष्ठतिदैवरक्षितं सुरक्षितंदैवहतंविनश्यति ॥
जीवत्यनाथोऽपिवनेऽपिरक्षितः कृतप्रयत्नोऽपिगृहेविनश्यति ॥२६॥

१ मूर्खता. २ हिमालय. ३ हस्तपादादिक्षालनार्थं. ४ युद्धे. ५ व्यापारइतिलो.के.
६ वज्रता.

दाताबलिःप्रार्थयिताचविष्णु र्दानंभुवोवाजिमखस्यकालः ॥
नमोस्तुतस्यैभवितव्यतायै यस्याःफलंबंधनमेवजात ॥ २७ ॥
भगवंतौजगन्नेत्रे सूर्याचंद्रमसावपि ॥
पश्यगच्छतएवाऽस्तं नियतिःकेनलंघ्यते ॥ २८ ॥
प्रतिकूलतामुपगतेहिविधौ विफलत्वमेतिबहुसाधनता ॥
अवलंबनायदिनभर्तुरभू न्नपतिष्यतःकरसहस्रमपि ॥ २९ ॥
किंकरोतिनरःप्राज्ञः शूरोवाऽप्यथपंडितः ॥
दैवंयस्यच्छलान्वेषि करोतिविफलाःक्रियाः ॥ ३० ॥
यन्मनोरथशतैरगोचरं नस्पृशंतिकवयोऽपिगिरायत् ॥
स्वप्नवृत्तिरपियत्रदुर्लभा लीलयैवविदधातितद्विधिः ॥ ३१ ॥
मातायस्य[4]धराधरेंद्रदुहितातातोमहेशस्तथा
भ्राताविघ्नकुलांतकःपितृसखोदेवोधनानांपतिः ॥
ख्यातःक्रौंचविदारणेसुरपतेःसेनाग्रगःषण्मुख
स्तद्दैवबलेनकुत्रघटतेनाऽद्यापिपाणिग्रहः ॥ ३२ ॥
अनुकूलेसतिधातरि भवत्यनिष्टादपीष्टमविलंबं ॥
पीत्वाविषमपिशंभु र्मृत्युंजयतामवापतत्कालं ॥ ३३ ॥
अनुचितमेवाऽऽचरितं पशुपतिनायद्विधेःशिरश्छिन्नं ॥
छिन्नोनचाऽस्यहस्तो येनाऽयंदुर्लिपिंलिखति ॥ ३४ ॥
कांश्चित्तुच्छयतिप्रपूरयतिवाकांश्चिन्नयत्युन्नतिं
कांश्चित्पातविधौकरोतिचपुनःकांश्चिन्नयत्याकुलान ॥
अन्योन्यंप्रतिपक्षसंहतिमिमांलोकस्थितिंबोधय
न्नेषक्रीडतिकूपयंत्रघटिकान्यायप्रसक्तोविधिः ॥ ३५ ॥
संसदिविदुरभीष्मद्रोणशारद्वतानां
पतिभिरमरकल्पैःपंचभिःपालिताऽपि ॥
अ[13]हहपरि[14]भवस्यद्रौपदीपात्रमासी

---

१ अश्वमेधस्य. २ दैवाय. ३ दैव. ४ पर्वतराजपुत्रीपार्वती. ५ गजाननः ६ कुबेरः ७ विवाहः ८ दैवे. ९ दुर्लेखं. १० राहाटगाडगेंइतिलोके. ११ सभायां. १२ देवतुल्यैः १३ अहहइतिखेदे. १४ पराभवस्य.

इत्थंवतिसतिदैवेर्वबुधि:किंविधेयं ॥ २६ ॥
पिबंतिमधुपद्मेषु भृंगा:केसरधूसरा: ॥
हंसा:शैवालमश्नंति धिग्दैवमसमंजसं ॥ २७ ॥

उद्योगप्रशंसा.

श्लो० ॥ उद्योग:खलुकर्तव्य: फलंमार्जारवद्भवेत ॥
जन्मप्रभृतिगौर्नास्ति पय:पिबतिनित्यश: ॥ १ ॥
उद्यमेनहिसिध्यंति कार्याणिनमनोरथै: ॥
नहिसुप्तस्यसिंहस्य प्रविशंतिमुखेमृगा: ॥ २ ॥
उद्यम:साहसंधैर्यं बुद्धि:शक्ति:पराक्रम: ॥
षडेतेयत्रवर्तंते तत्रदेव:सहायकृत ॥ ३ ॥
उद्योगिनंपुरुषसिंहमुपैतिलक्ष्मी
दैवंप्रधानमितिकापुरुषावदंति ॥
दैवंविहायकुरुपौरुषमात्मशक्त्या
यत्नेकृतेयदिनसिध्यतिकोऽत्रदोष: ॥ ४ ॥
उद्योगिन:कराऽऽलंबं करोतिकमलाऽऽलया ॥
अनुद्योगिकराऽऽलंबं करोतिकमलाऽग्रजा ॥ ५ ॥
काकतालीयवत्प्राप्तं दृष्ट्वाऽपिनिधिमग्रत: ॥
नस्वयंदैवमादत्ते पुरुषार्थमपेक्षते ॥ ६ ॥
आलस्यंहिमनुष्याणां शरीरस्थोमहान्रिपु: ॥
नास्त्युद्यमसमोबंधु: कृत्वाऽयंनाऽवसीदति ॥ ७ ॥
नदैवमितिसंचित्य त्यजेदुद्योगमात्मन: ॥
अनुद्यमेनकस्तैलं तिलेभ्य:प्राप्तुमिच्छति ॥ ८ ॥
विहायपौरुषंयोहि दैवमेवाऽवलंबते ॥
मांसादसिंहवत्तस्य मूर्ध्निनिघ्नंतिवायसा: ॥ ९ ॥

---

१ उद्योगेन, २ पुरुषश्रेष्ट. ३ कुत्सितपुरुषा: ४ लक्ष्मी: ५ अलक्ष्मी: अवदसेति· लोके ६ काकागमनमिवतालपतनमिवकाकतालीयतद्वत् अवितर्कित अकस्मादितिया· वन ७ निरुपं, देवाइंनलोके ८ नावसादतिसिद्धोनभवति. ९ आश्रयति १० मांसादिदेवालनशिमर(?)

पूर्वजन्मजनितंपुराविदः कर्मदैवमितिसंप्रचक्षते ॥
उद्यमेनतदुपार्जितंचिरा दैवमुद्यमवशंनतत्कथं ॥ १० ॥
दैवंपुरुषकारेण साध्यसिद्धिनिबंधनं ॥
योऽतिक्रमितुमिच्छेत्स नलोकेष्ववसीदति ॥ ११ ॥
संपदासुस्थितंमन्यो भवतिस्वल्पयाऽपियः ॥
कृतकृत्योविधिर्मन्ये नवर्धयतितस्यताम ॥ १२ ॥
असंपादयतःकंचि दर्थंजातिक्रियागुणैः ॥
यदृच्छाशब्दवत्पुंसः संज्ञायैजन्मकेवलं ॥ १३ ॥
कामपिश्रियमासाद्य यस्तद्वृत्धौनचेष्टते ॥
तस्याऽयतिषुनश्रेयो बीजभोजिकुटुंबवत् ॥ १४ ॥

परगृहवासः

श्री० ॥ उडुगणपरिवारोनायकोऽप्योषधीना
ममृतमयशरीरःकांतियुक्तोऽपिचंद्रः ॥
भवतिविगतरश्मिर्मंडलंप्राप्यभानोः
परसदननिविष्टःकोलघुत्वंनयाति ॥ १ ॥
कष्टंखलुमूर्खत्वं कष्टंखलुयौवनेषुदारिद्र्यं ॥
कष्टादपिकष्टतर परगृहवासःपरान्नंच ॥ २ ॥

ऋणं.

श्री० ॥ नविषंविषमित्याहु ब्रह्मस्वंविषमुच्यते ॥
विषमेकाकिनंहंति ब्रह्मस्वंपुत्रपौत्रिकम ॥ १ ॥
पापकर्तुमृणंकर्तुं मन्यंतेमानवाःसुखं ॥
परिणामोऽतिगहनो महतामपिनाशकृत ॥ २ ॥
लोकद्वयमतिभयैकनिदानमेत

---

१ साध्यसिद्ध्यधीनंतदायत्तमित्यर्थः २ उल्लंघयितुं. ३ आत्मानंसुस्थितमन्यते-सोसुस्थितंमन्यः ४ व्यापारंनकरोति. ५ उत्तरकालेषु. ६ कल्याणं. ७ नक्षत्रसमूहः परिवारोयस्य. ८ वनस्पतीनां. ९ निस्तेजाः १० सूर्यस्य. ११ परगृहं. १२ नीचता. १३ ऋणं. १४ कारणं.

न्धिकर्माणिनामृणमहोपरिणामघोरं ॥
एकःसएवहिपुमान्परमस्त्रिलोके
कृतंधस्ययेनधनिकस्यमुखंनदृष्टं ॥ २ ॥

कर्म.

श्लो० ॥ ब्रह्मायेनकुलालवन्नियमितोब्रह्मांडभांडोदरे
विष्णुर्येनदशाऽवतारगहनेक्षिप्तःसदासंकटे ॥
रुद्रोयेनकपालपाणिपुटकेभिक्षाऽटनंकारितः
सूर्योभ्राम्यतिनित्यमेवगगनेतस्मैनमःकर्मणे ॥ १ ॥
धनानिभूमौपशवश्चगोष्ठे भार्यागृहद्वारिजनःश्मशाने ॥
देहश्चितायांपरलोकमार्गे कर्माऽनुगोगच्छतिजीवएकः ॥२॥
यथाधेनुसहस्रेषु वत्सोविंदतिमातरं ॥
तथापूर्वकृतंकर्म कर्तारमनुगच्छति ॥ ३ ॥
यस्माच्चयेनचयथाचयदाचयच्च
यावच्चयत्रचशुभाऽशुभमात्मकर्म ॥
तस्माच्चतेनचतथाचतदाचतच्च
तावच्चतत्रचविधातृवशादुपैति ॥ ४ ॥
रोगशोकपरीताप बंधनव्यसनानिच ॥
आत्माऽपराधवृक्षाणां फलान्येतानिदेहिनां ॥ ५ ॥
नैवाऽऽकृतिःफलतिनैवकुलनशीलं
विद्याऽपिनैवनचयत्नकृताऽपिसेवा ॥
भाग्यानिपूर्वतपसाकिलसंचितानि
कालेफलंतिपुरुषस्ययथैववृक्षाः ॥ ६ ॥
वनेजनेशत्रुजलाऽग्निमध्ये महार्णवेपर्वतमस्तकेवा ॥
सुप्तंप्रमत्तंविषमस्थितंवा रक्षंतिपुण्यानिपुराकृतानि ॥ ७ ॥
यासाधूंश्चखलान्करोतिविदुषोमूर्खान्हितान्द्वेषिणः
प्रत्यक्षंकुरुतेपरोक्षममृतंहालाहलंतत्क्षणात् ॥

---

१ परिणामेभयंकर. २ कुंभकार कुंभारइतिलोके. ३ प्राप्नोति ४ दैववशात्.

तामाराधयसत्क्रियांभगवतींभोक्तुंफलंवांछितं
हेसाधोव्यसनैर्गुणेषुविपुलेष्वास्थांवृथामाकृथाः ॥ ८ ॥
गुणवदगुणवद्वाकुर्वताकार्यमादौ
परिणतिरवधार्यायत्नतःपंडितेन ॥
अतिरभसकृतानांकर्मणामाविपत्ते
र्भवतिहृदयदाहीशल्यतुल्योविपाकः ॥ ९ ॥
स्थाल्यांवैदूर्यमय्यांपचतितिलकणांश्चंदनैरिंधनाद्यैः
सौवर्णैर्लांगलाद्यैर्निखनतिवसुधामर्कमूलस्यहेतोः ॥
छित्वाकर्पूरखंडान्वृतिमिहकुरुतेकोद्रवाणांसमंतात
प्राप्येमांकर्मभूमिंनचरतिमनुजोयस्तपोमंदभाग्यः ॥ १० ॥
अचोद्यमानानियथा पुष्पाणिचफलानिच ॥
स्वंकालंनाऽतिवर्तंते तथाकर्मपुराकृतं ॥ ११ ॥
आकाशमुत्पततुगच्छतुवादिगंत
मंभोनिधिंविशतुतिष्ठतुवायथेच्छं ॥
जन्मांतराऽर्जितशुभाऽशुभकृन्नराणां
छायेवनत्यजतिकर्मफलाऽनुबंधः ॥ ११ ॥
सुखस्यदुःखस्यनकोऽपिदाता परोददातीतिकुबुद्धिरेषा ॥
अहंकरोमीतिवृथाऽभिमानः स्वकर्मसूत्रग्रथितोहिलोकः ॥ १२ ॥
विपत्तौकिंविषादेन संपत्तौहर्षणेनाकिं ॥
भवितव्यंभवत्येव कर्मणामीदृशीगतिः ॥ १३ ॥

उदरपूरणदूषणं.

श्री० ॥ दीनादीनमुखैस्तथैवशिशुकैराकृष्टजीर्णाऽबरा
क्रोशाद्भिःक्षुधितैर्निरन्नविधुरादृश्येतचेद्गेहिनी ॥
याच्ञाभंगभयेनगद्गदगलत्त्रुटयद्विलीनाऽक्षरं
कोदेहीतिवदेत्स्वदग्धजठरस्याऽर्थेमनस्वीजनः ॥ १ ॥

---

१ परिणामः २ निश्चेतव्या. ३ अतित्वरया. ४ रत्नविशेषः ५ नागरइतिलोके. ६ मार्यारं कुंपणइतिलोके. ७ अप्रेर्यमाणानि ८ स्वेदेन. ९ कृपणा. १० रोदनंकुर्वद्भिः ११ भार्या.

अभिमतमहामानग्रंथिप्रभेदपटीयसी
गुरुतरगुणग्रामांऽभोजस्फुटोज्ज्वलचंद्रिका ॥
विपुलविलसल्लज्जावल्लीवितानकुठारिका
जठरपिठरीदुष्पूरेयंकरोतिविडंबनं ॥ २ ॥
गंगातरंगकणशीकरशीतलानि
विद्याधराऽध्युषितचारुशिलातलानि ॥
स्थानानिकिंहिमवतःप्रलयंगतानि
यत्साऽवमानपरपिंडरतोमनुष्यः ॥ ३ ॥
किंकंदाःकंदरेभ्यःप्रलयमुपगतानिर्झरावागिरिभ्यः
प्रध्वस्तावातरुभ्यःसरसफलभृतोवल्कलिन्यश्चशाखाः ॥
वीक्ष्यंतेयन्मुखानिप्रसभमपगतप्रश्रयाणांखलानां
दुःखोपात्ताल्पवित्तस्मयपवनवशान्नर्तितभ्रूलतानि ॥ ४ ॥
पुण्यैर्मूलफलैःप्रियप्रणयिनींवृत्तिंकुरुष्वाऽधुना
भूशय्यांनवपल्लवैःकुरुतृणैरुत्तिष्ठयामोवने ॥
क्षुद्राणामविवेकमूढमनसांयत्रेश्वराणांसदा
वित्तव्याध्यविवेकसंकुलगिरांनामाऽपिनश्रूयते ॥ ५ ॥
येवर्धंतेधनपतिपुरःप्रार्थनादुःखभाजो
येचाऽल्पत्वंदधतिविषयाक्षेपपर्यस्तबुद्धेः ॥
तेषामंतःस्फुरितहसितंवासराणांस्मरेयं
ध्यानच्छेदेशिखरिकुहरग्रावशय्यानिषण्णः ॥ ६ ॥
भिक्षाऽऽहारमदैन्यमप्रतिहतंभीतिच्छिदंसर्वदा
दुर्मात्सर्यमदाऽभिमानमथनंदुःखौघविध्वंसनं ॥
सर्वत्राऽन्वहमप्रयत्नसुलभंसाधुप्रियंपावनं
शंभोःसत्रमवार्यमक्षयनिधिंशंसंतियोगीश्वराः ॥ ७ ॥
लांगूलचालनमधश्चरणाऽवपातं

---

१ समर्था. २ कुऱ्हाडइतिलो० ३ जठरमांड. ४ उपहासः ५ अंबुकणः ६ दरीभ्यः ७ अविनीतानां. ८ गर्वः ९ उपजीवनं. १० विषयाक्षेपेणपर्यस्ताभ्रष्टाबुद्धिर्यस्य. ११ शिखरिपर्वतस्तस्यकुहरबिलंतत्संबंधीयो ग्रावापाषाणःसएवशय्यातस्यां निषण्णउपविष्टः १२ पुच्छविक्षेपणं.

भूमौनिपत्यवदनोदरदर्शनंच ॥
श्वापिंडदस्यकुरुतेगजपुंगवस्तु
धीरंविलोकयतिचाटुशतैश्वभुंक्ते ॥ ८ ॥
यज्जीवतिक्षणमपिप्रथितंमनुष्यै
र्विज्ञानविक्रमयशोभिरभज्यमानं ॥
तन्नामजीवितमिहप्रवदंतितज्ज्ञाः
काकोऽपिजीवतिचिरायबलिंचभुंक्ते ॥ ९ ॥
योनाऽऽत्मजेनचगुरौनचभृत्यवर्गे
दीनेदयांनकुरुतेनचबंधुवर्गे ॥
किंतस्यजीवितफलंहिमनुष्यलोके
काकोऽपिजीवतिचिरायबलिंचभुंक्ते ॥ १० ॥
अहितहितविचारशून्यबुध्येः श्रुतिसमयैर्बहुभिस्तिरस्कृतस्य ॥
उदरभरणमात्रकेवलेच्छोः पुरुषपशोश्चपशोश्चकोविशेषः ॥ ११ ॥
अस्यदग्धोदरस्याऽर्थे किंनकुर्वंतिपंडिताः ॥
वानरीमिववाग्देवीं नर्तयंतिगृहेगृहे ॥ १२ ॥

मौनगुणाः

आत्मनोमुखदोषेण बध्यंतेशुकसारिकाः ॥
बकास्तत्रनबध्यंते मौनंसर्वाऽर्थसाधनं ॥ १ ॥
स्वाऽऽयत्तमेकांतगुणंविधात्रा विनिर्मितंछादनमज्ञतायाः ॥
विशेषतःसर्वविदांसमाजे विभूषणंमौनमपंडितानाम ॥ २ ॥
भद्रंभद्रंकृतंमौनं कोकिलैर्जलदागमे ॥
वक्तारोदर्दुरायत्र तत्रमौनंसमाचरेत ॥ ३ ॥

---

१ गजश्रेष्ठः २ प्रख्यातं. ३ सिद्धांतैः ४ स्वाधीनं ५ पिधानं. ६ मूर्खतायाः
७ सभायां. ८ वर्षाकाले. ९ भेकाः

वैयाकरणानां

स्तुतिर्निंदाच.

श्लो० ॥ वैयाकरणकिराता दपशब्दमृगाःक्वयांतिसंत्रस्ताः ॥
ज्योतिर्नटविटगायक भिषगाननगह्वराणियदिनस्युः ॥ १ ॥
कुप्वोः ⁐क ⁐पौच शेषोप्यसखिससजुषोरुर्विरामोऽवसानं
शश्छोटीत्यादिशब्दैःसदसियदिशठाःशाब्दिकाःपंडिताःस्युः ॥
तेषांकोवाऽपराधःकथयतसततंयेपठंतीहथोङ्केत
नाथ्यायाथ्ययथ्याधिगधिगधिगधिक्थ्यथ्ययथ्येतिशब्दान् ॥२॥
ठिढ्ढाणञ्द्वयसच्खुट्ठकसिञ्सोस्तिमसूझिसिपृथसूथमि
न्नम्मस्ताहशिचट्टनाष्टरतङ्नशश्छोठ्यचोत्यादिटि ॥
लोपोव्योर्वलिवृद्धिरेचियचिमंदाधाघ्वदाप्छेचटे
त्यब्दानखिलान्नयंतिकतिचिच्छब्दानुपठंतःकर्टून् ॥ ३ ॥
सूत्रैःपाणिनिनिर्मितैर्बहुतरैर्निष्पाद्यशब्दाऽऽवलि
वैकुंठस्तवमश्रमारचयितुमिथ्याश्रमाःशाब्दिकाः ॥
पक्वाऽन्नंविविधंश्रमेणविविधाऽपूपाऽव्ययसूपाऽन्वितं
मंदाःप्रीनर्नुरुंधतेमितबलानाघ्रातुमप्यक्षमान् ॥ ४ ॥
कृतदुरितनिराकरणं व्याकरणंचतुरधीरधीयानः ॥
बुधगणगणनाऽवसरे कनिष्ठिकायांपरंजयति ॥ ५ ॥
पातंजलेविष्णुपदाऽऽपगायाः पौतंजलेचाऽपिनयेऽवगाहं ॥
आचक्षतेशुद्धिदमाप्रसूते राचक्षतेरागमधोक्षजेच ॥ ६ ॥
नृणामनभ्यस्तफणाभृदीश गिरांदुरापाबुधराजगोष्ठी ॥
अबुध्धचापश्रुतिपत्धतीनां युध्धक्षमेवोग्धृतयोग्धसार्था ॥ ७ ॥

१ वैयाकरणएवकिरातोभिल्लस्तस्मात् २ मीनाः ३ ज्योतिःशब्देनगणकाः नटा नाट्यकाराः विटाजाराः गायकाः भिषजोवैद्यास्तेषामाननान्येवगह्वराणिगुहाः ४ धूर्ताः ५ थोड्तत्साथय्येतिगायकानांतालशब्दानुकरण. ६ वर्णानि. ७ यापयंति. ८ कर्णकठोरान्. ९ विष्णुस्तवं. १० श्रमेणकृत्वेविशेषः ११ अनुकुर्वंति. १२ गंगायाःजलेपातंपतनं. १३ पतजलिनिर्मिते. १४ नयेव्याकरणशास्त्रे. १५ मज्जनमभ्यासंच. १६ दुष्प्रापा. १७ पंडितराजसभा १८ अज्ञानधनुर्वेदमार्गाणां.

नाऽङ्गीकृतव्याकरणौषधानां प्रत्यर्थवाचिंसुगाढमास्ते ॥
कस्मिंश्चिदुक्तेऽपि पदेकथंचि त्स्वैरंवपुःस्विद्यतिवेपतेच ॥ ८ ॥
सूत्रंपाणिनिबद्धं कलयन्पुरुषःसमुद्वहतिसुदृशं ॥
वर्णादीनांधर्मान् बुद्ध्वाविधिवत्प्रयुंक्तेऽसौ ॥ ९ ॥
शब्दंशास्त्रमनधीत्ययःपुमान् वक्तुमिच्छतिवचःसभांतरे ॥
बन्धुमिच्छतिवनेमदोत्कटं हस्तिनंकमलनालतंतुना ॥ १० ॥

नैयायिकप्रशंसा.

मोहंरुणद्धि विमलीकुरुतेचबुद्धिं
सूतेचसंस्कृतपदव्यवहारशक्तिं ॥
शास्त्रांऽतराऽभ्यसनयोग्यतयायुनक्ति
तर्कश्रमोनतनुतेकिमिहोपकारं ॥ १ ॥
प्रायःकाव्यैर्गमितवयसःपाणिनीयांऽबुराशेः
सारज्ञस्याऽप्यपरिकलितन्यायशास्त्रस्यपुंसः ॥
वादाऽऽरंभेवदितुमनसोवाक्यमेकंसभायां
मूर्च्छाजिह्वाभवतिकियतींपश्यकष्टामवस्थां ॥ २ ॥
अपरीक्षितलक्षणप्रमाणै रपरामृष्टपदार्थसार्थतत्त्वैः ॥
अवशीकृतजैत्रयुक्तिजालै रलमेतैरनधीततर्कविद्यैः ॥ ३ ॥
अद्भुतस्तर्कपाथोधि रगाधोमस्यवर्धकः ॥

---

१ कंपते २ पाणिभिनाबद्धरचितंसूत्रं. पक्षे पाणौहस्तेनिबद्धंसूत्रं कंकणमितिलोके. विवाहकालेसूत्रनिर्मितंकंकणंवधूवरयोर्हस्तयोर्बध्नंतीतिप्रसिद्धिः ३ अर्थज्ञानपूर्वकंविचारयन्. पक्षे धारयन्. ४ सम्यग्धारयति. पक्षे सम्यगुद्वहतिपाणिग्रहणपूर्वकंस्वीकरोति. ५ शोभनादृष्टिः शुद्धाशुद्धविवेचनशक्तिर्यस्येत्यर्थः पक्षे शोभनादृक्चक्षुर्यस्याएतादृशीं स्त्रियं. ६ अकारप्रभृतिवर्णादीनां. पक्षे ब्राह्मणवर्णादीनां. ७ ज्ञात्वा. ८ यथाशास्त्रं. ९ प्रयोगंकरोति पक्षे योजयति. १० व्याकरण. ११ अध्ययनमकृत्वा. १२ बिसतंतुना. १३ अज्ञानं. १४ रोधयतिनाशयतीत्यर्थ. १५ उत्पादयति. १६ योजयति. १७ अनभ्यस्तन्यायशास्त्रस्य. १८ वक्ता. १९ तर्कसमुद्रः

अक्षपादोऽतमःस्पृष्टस्त्वकलंकःकलानिधिः ॥ ४ ॥
ज्ञानाऽब्धिरर्चिचरणःकौमुभक्षकश्च
श्रीपक्षिलोऽप्युदयनःसचवर्धमानः ॥
गंगेश्वरःशशधरोबहवश्चनव्या
ग्रंथैर्निरुंधतइमेत्त्वदयांऽधकारं ॥ ५ ॥

नैयायिकनिंदा.

कर्मब्रह्मविचारणांविजहतोभोगापवर्गप्रदां
घोषंकंचनकंठशोषफलकंकुर्वंत्यमीतार्किकाः ॥
प्रत्यक्षंनपुनातिनाऽपहरतेपापानिपीलुच्छटा
व्याप्तिर्नाऽवतिनैवपात्यनुमितिर्नोपक्षतारक्षति ॥ १ ॥
हेतुःकोऽपिविशिष्टधोरनुमितौनज्ञानयुग्ममरु
त्वाचोनेतिचमोघवादमुखरानैयायिकाश्चेद्बुधाः ॥
मेषस्यांऽडमियत्प्रलंबलिभुजोदंताःकियंतस्तथे
त्येवंसंततचिंतनैःश्रमजुषांनस्युःकथंपंडिताः ॥ २ ॥
नजिघ्रत्याम्नायंस्पृशतिनतदंगान्यपिसकृ
त्पुराणंनाऽऽदत्तेनगणयतिकिंचस्मृतिगणं ॥
पठन्शुष्कंतर्कंपरपरिभवार्थोक्तिभिरसौ
नयत्यायुःसर्वं ःतपरलोकार्थयतनः ॥ ३ ॥
प्रयत्नैरेतैर्लोकैःपरिचितकुतर्कप्रकरणाः
परंवाचोवश्यान्कतिपयपदौघान्विदधतः ॥
सभायांवाचाटाःश्रुतिकटुरटंतोघटपटान्
नलज्जंतेमंदाःस्वयमपितुजिह्नेतिविबुधः ॥ ४ ॥

---

१ गौतमः पक्षे क्षपादद्रात्रीनिक्षपादःसनभवतीतितथाविधइतिचंद्रविशेषणं २ अज्ञानेनास्पृष्टः पक्षे तमसाराहुणाऽस्पृष्टः ३ कलानांनिधिरित्यक्षपादविशेषणं पक्षे चंद्रः एतैर्विशेषणैरद्भुतत्वंबोधितं ४ गौतमः ५ कणादः ६ अज्ञानं. ७ कर्मचिंतनंब्रह्मचिंतनंच ८ मोक्षः ९ जल्पाकाः १० वेदं. ११ वेदांगानि. १२ नीरसं. १३ बहुभिः १४ मूर्खाः १५ लज्जामाप्नोति.

वैद्यप्रशंसा.

श्री० ॥ गुरोरधीताऽखिलवैद्यविद्यः पीयूषपाणिः[1] कुशलः क्रियासु ॥
गतस्पृहो धैर्यधरः कृपालुः शुद्धोऽधिकारी भिषगीदृशः स्यात् ॥ १ ॥
रागादिरोगान्सततानुषक्तानशेषकायप्रसृतानशेषान् ॥
औत्सुक्य[2]मोहाऽरतिदान्[3]जघान योऽपूर्ववैद्याय नमोऽस्तु तस्मै ॥ २ ॥

मस्तेदुःसहवेदनाकवलिते मय्येत्वरेऽतर्गलं
तमायां ज्वरपावकेन च तनौ तां तेत्दृषीकव्रजे ॥
दूने बंधुजनेकृतमल्पने धैर्यं विधातुं पुनः
कः शक्तः कलितामयप्रशमनो वैद्यात्परो विद्यते ॥ ३ ॥
माबोधि वैद्यकमथाऽपि महाऽऽमयेषु
भामेषु यो भिषगिति प्रथितस्तमेव ॥
ओंकार यन्त्यखिल एव विशेषदर्शी
लोकोऽपि तेन भिषगेष न दूषणीयः ॥ ४ ॥

निर्वृत्ताध्वरकृत्य[11] ऋत्विजमहो तीर्णा[12]पगो नाविकं
युत्धांते सुभटं च सिद्धविजयो वोढारमामस्थलः ॥
वृद्धं वारवधूजनं चाकृतं वो निर्घृष्टतद्यौवनो
ध्वस्तोऽऽतंकचयश्चिकित्सकमपि[16] द्वेष्टि मदेयाऽर्थिनं ॥ ५ ॥
भ्रांता वेदांतिनः किं पठथ शठतयाऽद्यापि चाऽद्वैतविद्यां
पृथ्वीतत्त्वे लुठंतो विसृशथ सततं कर्कशास्तार्किकाः किं ॥
वैदैर्नानागमैः किं कलपयथ हृदयं श्रोत्रियाः श्रोत्र[17]शूलै
र्वैद्यं सेवां न वद्यं विचिनुत शरणं प्राणसंमोणनाय ॥ ६ ॥

---

१ पीयूषममृतं पाणौ यस्य सः अमृतवद्वश्यमारोग्यद इत्यर्थः पद्महस्त इति लोका वदंति २ अविचार्यकार्यप्रवृत्तिः ३ विचाराशक्तिः ४ असंतोषः ५ मस्तके. ६ व्याकुले ७ इंद्रियसमूहे. ८ खिन्ने. ९ वैद्यः १० आव्हयति. ११ संपादितयज्ञकृत्यः १२ तीर्णाउत्तीर्णा आपगा नदी येन सः १३ योद्धारं. १४ धूर्तः १५ निरस्तरोगसंचयः १६ वैद्यं. १७ वैद्याद्व्याधिन: १८ कर्णकटुभिः १९ सर्वेषामध्ये निर्दोषं.

कुवैद्योपहासः

वैद्यराजनमस्तुभ्यं यमराजसहोदर ॥
यमस्तुहरतिप्राणान् वैद्यःप्राणान्धनानिच ॥ १ ॥
मिथ्यौषधैर्हतसुपाककषायै रसप्रलेपैरयथार्थतैलैः ॥
वैद्याइमेवंचितरुग्णवर्गाः पिचंडभांडंपरिपूरयंति ॥ २ ॥
नधीतोविज्ञानंनचपरिचयोवैद्यकनये
नरोगाणांतत्त्वाऽवगतिरपिनोवस्तुगुणधीः ॥
तथाऽप्येतेवैद्याइतितरलयंतोजडजना
नसून्मृत्योर्भृत्याइववैसुहरंतेगदजुषां ॥ ३ ॥
कषायैरुपवासैश्च कृतामुल्लाघतांनृणां ॥
निजौषधकृतांवैद्यो निवेद्यहरतेधनं ॥ ४ ॥
अज्ञातशास्त्रसद्भावान् शास्त्रमात्रपरायणान् ॥
त्यजेद्दूराद्भिषक्पाशान् पाशान्वैवस्वतानिव ॥ ५ ॥

गणकप्रशंसा.

नदैवंनपित्र्यंचकर्माऽवसित्यै न्नयत्राऽस्तिदेशेननुज्योतिषज्ञः ॥
नतारानचारानवानांग्रहाणां नतिथ्यादयोवायतस्तत्रबुध्याः ॥१॥
भानोःशीतकरस्यवाऽपिभुजंगग्रासेपुरोनिश्चिते
तीर्थानामटनंजनस्यघटतेतापत्रयोच्चाटनं ॥
इष्टमागवधारितेसतिधृतेस्तुष्टिश्चलाभोभवे
दृष्टेतुव्यसनेऽन्यतस्परिहृतिःकर्तुंजपाद्यैःक्षमा ॥ २ ॥
वृद्धिह्रासौकुमुदसुहृदःपुष्पवंतोपरागः
शुक्रादीनामुदयविलयावित्यमीसर्वदृष्टाः ॥
आविष्कुर्वंत्यखिलवचनेष्वत्रकुंभीपुलाक
न्यायाज्ज्योतिर्नयगतिविदांनिश्चलंमानभावं ॥ ३ ॥

---

१ रोगिसमूहः २ उदरभांडं. ३ पारदादेः ४ कंपयंतः ५ प्राणान्. ६ यमस्य. ७ भृत्यं. ८ रोगिणां. ९ रोगशांतिं. १० वास्तवानर्थान्. ११ कुत्सितभिषजोभि-षक्पाशास्तान् १२ यमसंबंधिनः १३ ग्रहणे. १४ दुःखे. १५ परिहारः १६ क्षयवृद्धी. १७ चंद्रस्य १८ सूर्याचंद्रमसोः १९ ग्रहणं.

असुखमथसुखंवाकर्मणांपंक्तिवेला
स्वहहनियतमेतेभुंजतेदेहभाजः ॥
तदिहपुरतएवमाहमौहूर्तिकत्वं
कथयफलममीषामंततःकिंततःस्यात् ॥ ४ ॥
विदैवज्ञंग्राममविबुधविधुरांभूपतिसभां
मुखंभुत्याहीनंमनुजपतिशून्यंचविषयं ॥
अनाचारान्दारानपहारकथंकाव्यमपिच
भवकृत्वाऽपेतंगुरुमपिसुबुद्धिःपरिहरेत् ॥ ५ ॥
एकाऽऽसनस्थाजलवायुभक्षा मुमुक्षवस्त्यक्तपरिग्रहाश्च ॥
पृच्छंतितेऽप्यंबरचारिचारं दैवज्ञमन्येकिमुताऽर्थचित्ताः ॥ १ ॥

कुगणकनिंदा.

गणिकागणकौसमानधर्मौ निजपंचांगनिदर्शकावुभौ ॥
जनमानसमोहकारिणौतौ विधिनावित्तहरौविनिर्मितौ ॥ १ ॥
ज्योतिःशास्त्रमहोदधौबहुतरोत्सर्गाऽपवादात्मभिः
कल्लोलैर्निबिडेकणान्कतिपयान्लब्ध्वाकृतार्थाइव ॥
दीर्घायुःसुतसंपदादिकथनैर्दैवज्ञपाशाइमे
गेहंगेहमनुप्रविश्यधनिनांमोहंमुहुःकुर्वते ॥ २ ॥
विलिखतिसदसद्वाजन्मपत्रंजनानां
फलतियदितदानींदर्शयत्यात्मदाक्ष्यं ॥
नफलतियदिलब्धद्रष्टुरेवाऽऽहमोहं
हरतिधनमिहैवंहंतदैवज्ञपाशः ॥ ३ ॥
भ्रमोदेखेदेवाऽप्युपनमतिपुंसांविधिवशा
न्मयैवंप्रागेवाऽभिहितमितिमिथ्याकथयति ॥
जनानिष्टाऽनिष्टाऽऽकलनपरिहारैकनिरता
नसौभेषादीनांपरिगणनयैवभ्रमंयति ॥ ४ ॥

---

१ परिपाककालेषु. २ रहिता. ३ देशं. ४ मोक्षेच्छवः ५ त्यक्तःपरिग्रहःकलत्रंयैस्ते. ६ आकाशसंचारिग्रहगतिं. ७ कुदैवज्ञाः ८ स्वचातुर्यं. ९ हर्षे. १० भ्रमंकरोति.

लक्ष्मीस्वभाव.

श्री० ॥ लक्ष्मिक्षमस्ववचनीयमिदंदुरुक्त
मंधीभवंतिपुरुषास्त्वदुपासनेन ॥
नोचेत्कथंकमलपत्रविशालनेत्रो
नारायणःस्वपितिपन्नगभोगतल्पे ॥ १ ॥
हेलक्ष्मिक्षणिकेस्वभावचपलेमूढेचपापेऽधमे
नत्वंचोत्तमपात्रमिच्छसिखलेप्रायेणदुश्चारिणि ॥
येदेवार्चनसत्यशौचनिरतायेचाऽपिधर्मेरता
स्तेभ्योलज्जसिनिर्दयेगतमतिर्नीचोजनोवल्लभः ॥ २ ॥
शूरंत्यजामिवैधव्या दुदारंलज्जयापुनः ॥
सापत्न्यात्पंडितमपि तस्मात्कृपणमाश्रये ॥ ३ ॥
येवदंतिचपलेत्यपवादं नैवदूषणमिदंकमलायाः ॥
दूषणंजलनिधेर्हिभवेत्त यत्पुराणपुरुषायददौतां ॥ ४ ॥
गुणिनंजनमालोक्य निजबंधनशंकया ॥
राजन्लक्ष्मीःकुरंगीव दूरंदूरंपलायते ॥ ५ ॥
पद्मेमूढजनेददासिद्रविणंविद्वत्सुकिंमत्सरो
नाऽहंमत्सरिणीनचाऽपिचपलानैवाऽस्तिमूर्खेरतिः ॥
मूर्खेभ्योद्रविणंददामिनितरांतत्कारणंश्रूयतां
विद्वान्सर्वजनेषुपूजिततनुर्मूर्खस्यनाऽन्यागतिः ॥ ६ ॥
रत्नाकरस्तवपिताकमलेनिवासो
भ्रातासुधामयतनुःपतिरादिदेवः ॥
केनाऽपरेणकमलेबतशिक्षितानि
सारंगशृंगकुटिलानिविचेष्टितानि ॥ ७ ॥
उत्साहसंपन्नमदीर्घसूत्रं क्रियाविधिज्ञंव्यसनेष्वसक्तं ॥
शूरंकृतज्ञंदृढसौहृदंच लक्ष्मीःस्वयंयातिनिवासहेतोः ॥ ८ ॥
अव्यवसायिनमलसं दैवपरंसाहसाच्चपरिहीन ॥

---

१ सर्पः २ शरीरं, ३ शय्यायां, ४ प्रियः ५ लक्ष्म्याः ६ नारायणाय, यस्मै वु-
द्धाय. ७ मृगीव, ८ चंद्रः ९ नारायणः १० अनुयोगिन, ११ नियतिपरं.

मेमदापतिमिववृद्धं नेच्छतिलक्ष्मीरुपस्थातुं ॥ ९ ॥
आलस्यंस्त्रीसेवा सरोगताजन्मभूमिवात्सल्यं ॥
संतोषोभीरुत्वं षड्व्याघातामहत्त्वस्य ॥ १० ॥
मातर्लक्ष्मि भजस्वकंचिदपरंमत्कांक्षिणीमास्मभू
र्भोगेभ्यःस्पृहयालवोनहिवयंकानिस्पृहाणामसि ॥
सद्यःस्यूतपलाशपत्रपुटकेपात्रेपवित्रीकृते
भिक्षासक्तुभिरेवसंप्रतिवयंवृत्तिंसमीहामहे ॥ ११ ॥
लक्ष्मीर्यादोनिधेर्यादो नाऽदोवादोचितंवचः ॥
बिभेतियाधीवरेभ्यो जडेष्वेवनिमज्जति ॥ १२ ॥
हालाहलोनैवविषंविषंरमा जनाःपरंव्यत्ययमत्रमन्वते ॥
निपीयजागर्तिसुखेनतंशिवः स्पृशन्निमांमुह्यतिनिद्रयाहरिः ॥ १३ ॥
हंतुर्बंधुजनानृधनार्थमनघानूगंतुःपरस्त्रीशतं
रंतुर्जंतुविहिंसकैःसहजनैःसंतुष्यतोवंचनैः ॥
वक्तुस्तीक्ष्णमयुक्तमेववचनंपक्तुर्मितंचौदनं
नित्यंनृत्यसिमंदिरेषुकमलेकैत्यतवैतन्मतं ॥ १४ ॥
पीतोगऽस्त्येनतातश्चरणतलहतोवल्लभोऽन्येनरोषा
दाबाल्याद्विप्रवर्यैःस्ववदनविवरेधारितावैरिणीमे ॥
गेहंमेछेदयंतिप्रतिदिवसमुमाकांतपूजानिमित्तं
तस्मात्खिन्नासदाहंद्विजकुलसदनंनाथनित्यंत्यजामि ॥ १५ ॥
यत्राऽभ्यागतदानमानचरणप्रक्षालनंभोजनं
सत्सेवाऽपितृदेवताऽर्चनविधिःसत्यंगवांपालनं ॥
धान्यानामपिसंग्रहोनकलहश्चित्ताऽनुरूपाप्रिया
दृष्टामाहहरिर्वसामिकमलातस्मिनगृहेनिश्चला ॥ १६ ॥
येषामन्यकलत्रदर्शनकलाऽनुत्पत्तिशून्येदृशौ
मूकत्वंचपरार्थचिंतनविधौमिथ्याऽनभिज्ञंमुखं ॥

१ तरुणस्त्री. २ स्वदेशलोभः ३ उपजीवनं. ४ वांछामहे. ५ समुद्रस्य. ६ जलजंतुः ७ कैवर्तेभ्यः पक्षे बुद्धिश्रेष्ठेभ्यः ८ मूर्खेषु. पक्षेडलयोःसावर्ण्यात्जलेषुउदकेषु. ९ भिदभेदः १० विपरीतभावं. ११ निष्पापान्. १२ प्राणिविघातकैः. १३ अयोग्यं. १४ मितंपक्वं. दरिद्रमितियावत्. १५ क्रिदकारकं. १६ समुद्रः १७ भृगुणा १८ सरस्वती. १९ कमलं. २० स्त्री.

अप्रज्ञातपशूनबुभुक्षितशिशून्‌ प्रोदकैस्ताम्यत
स्तेषांलक्ष्मिगृहान्नृहशाऽपिभयभीतैवेह्नोवीक्षसे ॥ १७ ॥
कुटिलालक्ष्मीर्यत्र प्रभवतिनसरस्वतीवसतितत्र ॥
प्रायःश्वश्रूस्नुषयो र्नदृश्यतेसौहृदंलोके ॥ १८ ॥
यात्वसत्यनिपद्येऽपि संध्याऽवधिविजृंभते ॥
इंदिरामंदिरेऽन्येषां कथंस्थास्यतिनिश्चला ॥ १९ ॥

सत्संगतिः

श्री० ॥ जाड्यंधियोहरतिसिंचतिवाचिसत्यं
मानोन्नतिंदिशतिपापमपाकरोति ॥
चेतःप्रसादयतिदिक्षुतनोतिकीर्तिं
सत्संगतिःकथयाकिंनकरोतिपुंसां ॥ १ ॥
असज्जनःसज्जनसंगिसंगा त्करोतिदुःसाध्यमपीहसाध्यं ॥
पुष्पाश्रयाच्छंभुशिरोऽधिरूढा पिपीलिकाचुंबतिचंद्रबिंबं ॥ २ ॥
वंशप्रभवोगुणवानपि संगविशेषेणपूज्यतेपुरुषः ॥
नहितुंबीफलविकलो वीणादंडःप्रयातिमहिमानं ॥ ३ ॥
गंगेवाऽघविनाशिनीजनमनःसंतोषसच्चंद्रिका
तीक्ष्णांशोरपिसत्प्रभेवजगदज्ञानांऽधकाराऽपहा ॥
छायेवाऽखिलतापनाशनकरीत्वधेनुवत्कामदा
पुण्यैरेवहिलभ्यतेसुकृतिभिःसत्संगतिर्दुर्लभा ॥ ४ ॥
काचःकांचनसंसर्गा द्धत्तेमारकतीर्द्युतीः ॥
तथासत्सन्निधानेन मूर्खोयातिप्रवीणतां ॥ ५ ॥
कीटोऽपिसुमनःसंगा दारोहतिसतांशिरः ॥
अश्माऽपियातिदेवत्वं महद्भिःसुप्रतिष्ठितः ॥ ६ ॥
कल्पद्रुमःकल्पितमेवसूते साकामधुक्कामितमेवदोग्धि ॥
चिंतामणिश्चिंतितमेवदत्ते सतांहिसंगःसकलंप्रसूते ॥ ७ ॥

---

१ संध्याकालपर्यंतं. २ विराजते. ३ लक्ष्मीः ४ स्थिरा. ५ मांद्यं. ६ ददाति. ७ निराकरोति. ८ विस्तारयति. ९ मरकतः पाचइतिलोके तत्संबंधिनीः १० पाषाणः ११ कल्पवृक्षः १२ कामधेनुः

यथोदयगिरौद्रव्यं सन्निकर्षेणदीप्यते ॥
तथासत्सन्निधानेन हीनवर्णोऽपिदीप्यते ॥ ८ ॥
महाऽनुभावसंसर्गः कस्यनोन्नतिकारकः ॥
रथ्यांऽबुजान्हवीसंगा त्रिदशैरपिवंद्यते ॥ ९ ॥
गैवाशनानांसशृणोतिवाक्य महंहिराजन्पठितंमुनीनां ॥
नतस्यदोषोनचमद्गुणोवा संसर्गजादोषगुणाभवंति ॥ १० ॥
नस्थातव्यंनगंतव्यं क्षणमप्यधमैःसह ॥
पयोऽपिशौंडिनीहस्ते मंदिरांमन्यतेजनः ॥ ११ ॥
वीणावंशाश्रयातुंबी चुंबत्युच्चैःकुचौस्त्रियः ॥
पिबन्त्यनार्यसंयोगा द्वक्तंनक्तंचरोयथा ॥ १२ ॥
महाजनस्यसंसर्गः कस्यनोन्नतिकारकः ॥
पद्मपत्रस्थितवारि धत्तेमुक्ताफलश्रियं ॥ १३ ॥

स्थानमाहात्म्यं.

श्री० ॥ नैक्रःस्वस्थानमासाद्य गजेंद्रमपिकर्षति ॥
सएवप्रच्युतःस्थाना च्छुनाऽपिपरिभूयते ॥ १ ॥
स्थानंप्रधानंनबलंप्रधानं स्थानेस्थितःकापुरुषोऽपिशूरः ॥
जानामिनागेंद्रतवप्रभावं कंठंविनागर्जसिशंकरस्य ॥ २ ॥
किंचिदाश्रयसौंदर्या द्धत्तेशोभामसाध्वपि ॥
कांताविलोचनेन्यस्तं मलीमसमिवांऽजनं ॥ ३ ॥
गुणैःसर्वज्ञकल्पोऽपि सीदत्येकोनिराश्रयः ॥
अनर्घ्यमपिमाणिक्यं हेमाऽऽश्रयमपेक्षते ॥ ४ ॥
कुस्थानस्यप्रवेशेन गुणवानपिपीड्यते ॥
वैश्वानरोऽपिलोहस्थः कौरुकैरभिहन्यते ॥ ५ ॥

---

१ उदयपर्वते. २ सूर्यसन्निधानेन. ३ प्रकाशितोभवति. ४ देवैः ५ यवनानां य-वनगृहस्थितंसहोदरशुकमुद्दिश्यमुनिगृहस्थितस्यशुकस्योक्तिरियं. ६ मद्यविक्रयकर्त्री. ७ मद्यं. ८ मकरः नक्रइतिलो० ९ मघकंण. १० शिवतुल्यः ११ लोहकारैः

आश्रयवशेनसततं गुरुतालघुताचजायतेपुंसां ॥
विंध्योविंध्यसमानाः करिणोवतदर्पणेलघवः ॥ ६ ॥
अश्वःशस्त्रंशास्त्रं वीणावाणीनरश्चनारीच ॥
पुरुषविशेषंमासा भवंतियोग्याअयोग्याश्च ॥ ७ ॥
आसीत्पूर्वविमलजलधौमंडनंभूपतीनां
नारीणांचप्रबलमुकुटेकांचनेनप्रसंगात् ॥
तंत्रीबन्धःकथमिदमहोकांचखंडेनसार्धं
भिल्लीकंठेमरकतमणेकामवस्थांगतोऽसि ॥ ८ ॥
पात्रविशेषेन्यस्तं गुणांतरंव्रजतिशिल्पमाधातु. ॥
जलमिवसमुद्रशुक्तौ मुक्ताफलतांपयोदस्य ॥ ९ ॥

जिव्हा.

हेजिव्हेरससारज्ञे सर्वदामधुरप्रिये ॥
भगवन्नामपीयूषं पिबत्वमनिशंसखे ॥ १ ॥
अंगेषुमुख्याद्विजमध्यसंस्था वर्णाऽनुसंधानपराऽसिनित्यं ॥
अंधस्थिरप्रेमरसारसज्ञे नरस्तुतेनत्यजकर्णवत्त्वं ॥ २ ॥
रेसेनेरचितोऽयमजालिस्ते परनिंदापरुषंस्त्वंवचोमि ॥
नरकाऽपहरंनमःशिवायेत्यसमादिमंणवभजस्वमंत्रं ॥ ४ ॥
द्वात्रिंशद्दशनद्वेषि मध्यंभ्रमसिनित्यशः ॥
तदिदंशिक्षिताकेन जिव्हेसंचारकौशलं ॥ ५ ॥

१ विंध्यपर्वते. २ भूषणं. ३ काचमणिना. ४ सह. ५ कौशल. ६ मौक्तिकत्वं. ७ मधुरस्य. ८ रसस्यसारजानातिसा. ९ शरीरावयवेषु. पक्षे दशेषु १० मुखेभवाम्-स्या. ११ दंताःब्राह्मणाश्च. १२ वाणवर्णेनतदनुसंधानपरा, पक्षे बवयोः सावर्ण्यात् बाणानुसंधानपरः १३ अधःअक्षतरिमन्नुरःस्थरःप्रेमरसोयस्याः पक्षे. अंधोधृतराष्ट्रस्त-स्मिन्नुद्ढःप्रेमरसोयस्य. १४ मनुजस्तुति. पक्षे नरोर्जुनः १५ अगराजवत्. कर्णपक्षे अगेषुमुख्यइत्यादिलिंगविपरिणामेनयोजनीयं. १६ जिव्हे. १७ आदौप्रणवः ॐकारो-यस्यएतादृशमत्र. १८ दंताः

मनः

श्री० ॥ रेरेमनोममर्मनोभवशासनस्य
पादांबुजद्वयमनारतमानमत्वं ॥
किंमांनिपातयसिसंसृतिकूपमध्ये
तेनैवांकिंतवगमिष्यतिपुत्रशोकः ॥ १ ॥
रेचित्तचिंतयचिरंचरणौमुरारेः
पारंगमिष्यतिभवान्भवसागरस्य ॥
पुत्रःकलत्रमितरेसुहृदःसहायाः
सर्वंविलोकयसखेमृगतृष्णिकेव ॥ २ ॥
नपुंसकमितिज्ञात्वा प्रियायैप्रेषितंमनः ॥
तत्तुतत्रैवाऽरमत हंताःपाणिनिनावयं ॥ ३ ॥
कृष्णत्वदीयपदपंकजपंजरांते
अद्यैवमेविशतुमानसराजहंसः ॥
प्राणप्रयाणसमयेकफवातपित्तैः
कंठाऽवरोधनविधौस्मरणंकुतस्ते ॥ ४ ॥
मनसैवकृतंपापं नशरीरकृतंकृतं ॥
येनैवाऽऽलिंगिताकांता तेनैवाऽऽलिंगितासुता ॥ ५ ॥
मनोऽसिसांतंभजतत्वमनंतं क्षयाऽदितंचंद्रमसंजहीहि ॥
संश्लिष्यसांतइतिप्रशस्त धत्तेसदाऽनंतपदाऽवलंबं ॥ ६ ॥
इतस्ततश्चंक्रमणोरजोभिः क्रीडन्मनोमत्तमतंगजोऽयं ॥
यःसर्वदापिप्पलभोगतुष्ट स्तच्छांतयेत्वंहरिमाश्रयत्व ॥ ७ ॥
भिक्षाऽशनंतदपिनीरसमेकवारं
शय्याचभूःपरिजनोनिजदेहमात्रं ॥
वस्त्रंसुजीर्णशतखंडमयीचकंथा

१ मनोमबोमदनस्तच्छासनस्यशिवस्य २ सततं. ३ ससारएवकूपस्तन्मध्ये. ४ मरुमरीचिका. ५ वचिनाः ६ सकारांतं पक्षे अनसहितंनश्वरमित्यर्थः ७ नविद्यते- अंतोयस्यतंविष्णुं. ८ चद्रोहिसांतःमनसोदेवता. ९ संश्लिष्यद्वौपिम्यसांतःसकारांतः पक्षे नश्वरः अनोऽनंतपदावलंबंआकाशपदाश्रय पक्षे विष्णुपदाश्रयधत्ते. १० तुच्छाः

हाहातथाऽपिविषयान्नजहातिचेतः ॥ ८ ॥
परिश्रमसिकिंवृथाक्वचनचित्तविश्राम्यतां
स्वयंभवतियद्यथाभवतितत्तथानान्यथा ॥
अतीतमपिनस्मरन्नपिचभाविसंकल्पय
न्नतर्कितगमाऽऽगमाननुभवस्वभोगानिह ॥ ९ ॥
अयेगीतंसरसकवयःपार्श्वयोर्दाक्षिणात्याः
पश्चाल्लीलावलयरणितंचामरग्राहिणीनां ॥
यद्यस्त्येवंकुरुभवरसाऽऽस्वादनेलंपटत्वं
नोचेच्चेतःप्रविशसहसानिर्विकल्पेसमाधौ ॥ १० ॥
एतस्माद्विरमेंद्रियार्थगहनादायासकादाश्रय
श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षक्षणात् ॥
स्वात्मीभावमुपैहिसंत्यजनिजांकल्लोललोलांगतिं
माभूयोभजभंगुरांभवरतिंचेतःप्रसीदाऽधुना ॥ ११ ॥
पतितःपशुरपिकूपे निःसर्तुंचरणचालनंकुरुते ॥
धिक्त्वांचित्तभवाब्धे रिच्छामपिनोबिभर्षिनिःसर्तुं ॥ १२ ॥

भोगाद्यस्थिरत्वं.

श्लो० ॥ भोगेरोगभयंकुलेच्युतिभयंवित्तेनृपालाद्भयं
मानेदैन्यभयंबलेरिपुभयंरूपेतरुण्याभयं ॥
शास्त्रेवादभयंगुणेखलभयंकायेकृतांताद्भय
सर्ववस्तुभयाऽन्वितंभुविनृणांवैराग्यमेवाऽभयं ॥ १ ॥
आक्रांतंमरणेनजन्मजरयायात्युच्चैर्यौवनं
संतोषोधनलिप्सयाशमसुखंप्रौढांगनाविभ्रमैः ॥
लोकैर्मत्सरिभिर्गुणावनभुवोव्यालैर्नृपादुर्जनै
रस्थैर्येणविपत्तयोऽप्युपहताग्रस्तंनकिंकेनवा ॥ २ ॥

१ गतं. २ आदिन्त्यगमनागमनान्. ३ विषयान्. ४ लुब्धत्व. ५ कल्याणपत्थाले. ६ स्वसंवेद्यत्वं. ७ कल्लोलवच्चंचलां. ८ न धरां ९ त्वां. १० इच्छिनं. ११ शांतिसुखं. १२ विलासैः

आधिव्याधिशतैर्जनस्यविविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्रपतंतितत्रविवृतद्वाराइवभापदः ॥
जातंजातमवश्यमाशुविवशंमृत्युःकरोत्यात्मसा
त्तत्किंकेननिरंकुशेनविधिनायन्निर्मितंसुस्थिरं ॥ ३ ॥
भोगास्तुंगतरंगभंगचपलाःप्राणाःक्षणध्वंसिनः
स्तोकान्येवदिनानियौवनसुखंस्फूर्तिःप्रियासुस्थिता ॥
तत्संसारमसारमेवनिखिलंबुध्वाबुधाबोधका
लोकाऽनुग्रहपेशलेनमनसायत्नःसमाधीयताम ॥ ४ ॥
भोगामेघवितानमध्यविलसत्सौदामिनीचंचला
आयुर्वायुविघट्टिताऽभ्रपटलीलीनांबुवद्भंगुरं ॥
लोलायौवनलालसास्तनुभृतामित्याकलय्यद्रुतं
योगेधैर्यसमाधिसिद्धिसुलभेबुद्धिंविदध्वंबुधाः ॥ ५ ॥
आयुःकल्लोललोलंकतिपयदिवसस्थायिनीयौवनश्री
रर्थाःसंकल्पकल्पाघनसमयतडिद्विभ्रमाभोगपूराः ॥
कंठाऽऽश्लेषोपगूढंतदपिचनचिरंयत्प्रियाभिःप्रणीतं
ब्रह्मण्यासक्तचित्ताभवतभवभयांभोधिपारंतरीतुं ॥ ६ ॥
कृच्छ्रेणाऽमेध्यमध्येनियमिततनुभिःस्थीयतेगर्भवासे
कांताविश्लेषदुःखव्यतिकरसमयेयौवनेचोपभोगः ॥
वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोऽप्यसाधुः
संसारेरेमनुष्यावदतयदिसुखंस्वल्पमप्यस्तिकिंचित ॥ ७ ॥
भोगाभंगुरवृत्तयोबहुविधास्तैरेवचाऽयंभव
स्तत्कस्येहकृतेपरिभ्रमतहेलोकाःकृतंचेष्टितैः ॥
आशापाशशतोपशांतिविशदंचेतःसमाधीयतां
कामोत्पत्तिवशेत्स्वधामनियदिश्रद्धेयमस्मद्वचः ॥ ८ ॥

---

१ प्रकृष्टाआपदोविपत्तयः २ पराधीनं, ३ कालः ४ आत्माधीन, ५ स्वतंत्रेण. ६ तुंगाःउच्चायेतरंगाऊर्मयस्तेषांभंगस्तद्वच्चपलाः ७ अल्पानि, ८ मृदुलन, ९ संकल्पतुल्याः १० वर्षाकालविद्युद्विलासाःअतिचंचलाइत्यर्थः ११ कांताभिः १२ अवमानः १३ भ्रमशीलाः १४ संसारः १५ चेष्टितैर्व्यापारैः कृतंअलंपर्याप्तमितियावत्, व्यापारंमामुरुतेत्यर्थः १६ विश्वसनीयं.

९४

पश्चात्तापः

श्री० ॥ विद्यानाऽधिगताकलंकरहितावित्तंचनोपार्जितं
शुश्रूषाऽपिसमाहितेनमनसापित्रोर्नसंपादिता ॥
आलोलायतलोचनायुवतयःस्वप्नेऽपिनाऽऽलिंगिताः
कालोऽयंपरपिंडलोलुपतयाकाकैरिवप्रेषितः ॥ १ ॥
ब्रह्मज्ञानविवेकनिर्मलधियःकुर्वंत्यहोदुष्करं
यन्मुंचंत्युपभोगवंतिचधनान्येकांततोनिःस्पृहाः ॥
नप्राप्तानिपुरानसंप्रतिनचप्राप्तौदृढप्रत्ययो
वांछामात्रपरिग्रहाण्यपिपरित्यक्तुंनशक्तावयं ॥ २ ॥
अर्थाःपादरजःसमागिरिनदीवेगोपमयौवनं
आयुष्यंजलबिंदुलोलचपलंफेनोपमजीवितं ॥
धर्मंयोनकरोतिनिश्चलमतिःस्वर्गाऽर्गलोद्घाटनं
पश्चात्तापयुतोजरापरिगतःशोकाऽग्निनादह्यते ॥ ५ ॥
धनवानितिहिमदोमे किंगतविभवोविषादमुपयामि ॥
करनिहतकंदुकसमाः पातोत्पातामनुष्याणां ॥ ६ ॥
नाऽभ्यस्ताभुविवादिवृंददमनीविद्याविनीतोचिता
खड्गाग्रैःकरिकुंभपीठदलनैर्नाकननीतंयशः ॥
कांताकोमलपल्लवाऽधररसःपीतोनचंद्रोदये
तारुण्यंगतमेवनिष्फलमहोशून्याऽऽलयेदीपवत् ॥ ७ ॥
नध्यातंपदमीश्वरस्यविधिवत्संसारविच्छित्तये
स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपिनोपार्जितः ॥
नारीपीनपयोधरोरुयुगलंस्वप्नेऽपिनाऽऽलिंगितं
मातुःकेवलमेवयौवनवनच्छेदेकुठारावयं ॥ ८ ॥
आयुर्वर्षशतंनृणांपरिमितंरात्रौतदर्धंगतं

---

१ संपादिता. २ स्वप्नेन. ३ माताचपिताचपितरौतयोः ४ ब्रह्मज्ञानविचारेण शुद्धांतःकरणाः ५ दुःखेनकर्तुमशक्यं. ६ स्वभावतःनैरंतर्येणेतिवा ७ निरिच्छाः ८ विश्वासः ९ केवलंइच्छयागृहीतानि. १० अडसरइतिलोके. ११ जरयावार्धक्येनपरिभूतः १२ खेदं. १३ स्वर्गे १४ छेदनाय. १५ परश्वधाः

तस्यार्धस्यपरस्यचार्धमपरंबालत्ववृद्धत्वयोः ॥
शेषंव्याधिवियोगदुःखसहितंसेवादिभिर्नीयते
जीवेवारितरंगचंचलतरेसौख्यंकुतःप्राणिनां ॥ ९ ॥
क्षणंबालोभूत्वाक्षणमपियुवाकामरसिकः
क्षणंवित्तैर्हीनःक्षणमपिचसंपूर्णविभवः ॥
जराजीर्णैरंगैर्नटइववलीमंडिततनु
र्नरःसंसारांऽतेविशतियमधानीयवनिकाम १० ॥
चिरंध्यातारामंक्षणमपिनरामंभैतिकृतिः
परंपीतोरामाऽधरइहनरामांऽघ्रिसलिलं ॥
नतारुष्टारामायदरचिनरामायविनति
र्गतंमेसाम्राज्यंनदशरथजन्मापरिगतः ॥ ११ ॥
जन्मेदंव्यर्थतांनीतं भवभोगोपलिप्सया ॥
काचमूल्येनविक्रीतो हंतचिंतामणिर्मया ॥ १२ ॥

गृहस्थाश्रमः

श्री० ॥ सानंदंसदनंसुताश्चसुधियःकांतानदुर्भाषिणी
सन्मित्रंसधनंस्वयोषितिरतिश्चाऽऽज्ञापराःसेवकाः ॥
आतिथ्यंशिवपूजनंप्रतिदिनंमिष्टान्नपानंगृहे
साधोःसंगमुपासतेहिसततंधन्योगृहस्थाश्रमः ॥ १ ॥
मानुष्यंवरवंशजन्मविभवोदीर्घायुरारोग्यता
सन्मित्रंसुसुतःसतीप्रियतमाभक्तिश्चनारायणे ॥
विद्वत्त्वंसुजनत्वमिंद्रियजयःसत्पात्रदानेरति
स्तेपुण्येनविनात्रयोदशगुणाःसंसारिणांदुर्लभाः ॥ २ ॥
क्रोशंतःशिशवःसवारिसदनंपंकाऽऽवृतंचांऽगणं

---

१ वलीभिर्मंडितातनुर्यस्य. २ कृतांतनगरीं. ३ पहदाइनिळो० ४ स्त्री. ५ रामकृतिः ६ रामपादोदकं. ७ नमस्कारः ८ सार्वभौमत्वं. ९ दशरथाज्जन्मयस्यसःरामः १० निष्फलत्वं. ११ काचमणेर्मूल्येन १२ हंतइतिखेदे. १३ रत्नविशेषःसहिचिंतितमर्थंददातिइतिप्रसिद्धिः १४ गृहं. १५ उत्तमकुलेउत्पत्तिः १६ ऐश्वर्यं. १७ उदकपूर्णं.

शय्यादंशवतीचकुंभमशनंधूमेनपूर्णगृहं ॥
भार्यानिष्ठुरभाषिणीप्रभुरपिक्रोधेनपूर्णःसदा
स्नानंशीतलवारिणाहिसततंधिग्धिग्गृहस्थाश्रमं ॥ ३ ॥
न्यायार्जितधनस्तत्त्व ज्ञाननिष्ठोऽतिथिप्रियः ॥
शास्त्रवित्सत्यवादीच गृहस्थोऽपिविमुच्यते ॥ ४ ॥
सविप्रपादोदककर्दमानि सवेदशास्त्रध्वनिगर्जितानि ॥
स्वाहास्वधाकारनिरंतराणि स्वानंदतुल्यानिगृहाणितानि ॥ ५ ॥
नविप्रपादोदकपंकिलानि नवेदशास्त्रध्वनिगर्जितानि ॥
स्वाहास्वधाकारविवर्जितानि श्मशानतुल्यानिगृहाणितानि ॥ ६ ॥
यदिरमायदिचरमा यदितनयोविनयगुणोपेतः ॥
तनयेतनयोत्पत्तिः सुरवरनगरेकिमाधिक्यं ॥ ७ ॥
वंशोविश्वोऽवतंसोजनुरनुपहतंस्वांतमौन्नत्यकांतं
लीलाशीलानुकूलाक्षपितकलिमलाकाऽपिविद्यानवद्या ॥
वाणीवेणीगुणानांसमधिकयशसांसाधिकासाधिकाश्रीः
श्रीमद्गौरीमयूरीमुदिरपुरहरत्वत्कृपायाविपाकः ॥ ८ ॥
तावद्विद्याऽनवद्यागुणगणमहिमारूपसंपत्तिशौर्यं
स्वस्थानेसर्वशोभापरगुणकथनेवाक्पटुस्तावदेव ॥
यावत्पाकाकुलाभिःस्वगृहयुवतिभिर्भाषिताऽपत्यवत्कात
हेबाबानाऽस्तितैलंनचलवणमपीत्यादिवाचांप्रचारः ॥ ९ ॥

जरा.

श्री० ॥ कृतांतस्यदूतीजराकर्णमूले
समागत्यवक्तीतिलोकाःशृणुध्वं ॥
परस्त्रीपरद्रव्यवांछांत्यजध्वं
भजध्वंरमानाथपादाऽरविंदं ॥ १ ॥

१ मशकपूर्णा. २ अस्निग्धं. ३ कठोरभाषिणी. ४ न्यायेनसंपादितधनयुक्तः. ५ मुक्तोभवति. ६ ब्राह्मणचरणक्षालनोदकेनपंकिलानि. ७ स्त्री. ८ लक्ष्मीः ९ विश्व-भूषणं. १० मनः ११ निर्दोषा. १२ प्रवाहः १३ साधयित्री. १४ गौरीवल्लभपुरी-नस्त्वत्कृपामुदिरोमेघः १५ हे त्रिपुरनाशक. १६ परिणामःफलमित्यर्थः १७ हेबाबा इत्यनु-चितुर्लौकिकसंबोधनं.

कृष्णवर्त्मनिगुणानुगमयंती यौवनेऽपिजनयत्यनुरागं ॥
आगतावनजरेवहिमानी सेव्यतांसुरतरंगवतीयं ॥ २ ॥
शशिनीवहिमार्तानां घर्मार्तानांयथारवौ ॥
मनोनरमतेस्त्रीणां जरापीतेंद्रियेपतौ ॥ ३ ॥
व्याघ्रीवतिष्ठतिजरापरितर्जयंती
रोगाश्चशत्रवइवमहरंतिदेहं ॥
आयुःपरिस्रवतिभिन्नघटादिवांऽभो
लोकस्तथाऽप्यहितमाचरतीतिचित्रं ॥ ४ ॥
गात्रंसंकुचितंगतिर्विगलिताभ्रष्टाचदंतावलि
र्दृष्टिर्नश्यतिवर्धतेबधिरतावक्त्रंचलालायते ॥
वाक्यंनाद्रियतेचबांधवजनैर्भार्यानशुश्रूषते
हाकष्टंपुरुषस्यजीर्णवयसःपुत्रोऽप्यमित्रायते ॥ ५ ॥
वर्णंसितंवीक्ष्यशिरोरुहाणां
स्थानंजरापरिभवस्ययदेवपुंसां ॥
आरोपिताऽस्थिशकलंपरिहृत्ययांति
चांडालकूपमिवदूरतरंतरुण्यः ॥ ६ ॥
मलिनैरलकैरेतैः शुक्लत्वंमकटीकृतं ॥
तद्रोषादिवनिर्याता वदनाद्दंतनावलिः ॥ ७ ॥
यममिवकरधृतदंडं हरिमिवसंगदंशशांकमिववक्रं ॥
शिवमिवचविरूपाक्षं जराकरोत्यकृतपुण्यमपि ॥ ८ ॥
श्रुतिःशिथिलतांगतास्मृतिरपिमनष्टाऽधुना
गतिर्विपथमागताविगलिताद्विजानांततिः ॥
गेर्वामपिचसंहृतिःसमुचितक्रियातश्च्युता

१ असौ पक्षे कृष्णस्यवर्त्ममार्गस्तस्मिन्. २ उदके. प्राणेच. ३ हिमसंहतिः ४ सुरतेरंगवती. प० सुराणांतरंगवतीभागीरथी. ५ जरयापीतानिग्रस्तानिइंद्रियाणि-यस्यतस्मिन्. ६ कंपयंती, ७ शत्रुवदाचरति. ८ केशानां. ९ आरोपितंअस्थ्नःशकलं-खंडंयस्मिन्. १० अस्पृश्यत्वादितिभावः ११ केशैः १२ दंतपंक्तिः १३ गदयासहितं पक्षे गदेनरोगेणसहितं. १४ विकृतास्यं. १५ कर्णेंद्रियंवेदश्च. १६ स्मरणं मन्वादिवाक्यंच १७ दंतानांब्राह्मणानांच. १८ इंद्रियाणांधेनूनांच.

कृतानुजरयातयाकलियुगस्यसोधर्म्यता ॥ ९ ॥
वदनंदशनविहीनं वाचोनपरिस्फुटागताशक्तिः ॥
अव्यक्तेंद्रियशक्तिः पुनरपिबाल्यंकृतंजरया ॥ १० ॥
पटुरटतिपलितदूतो मस्तकमासाद्यसर्वलोकस्य ॥
परिभवतिजरामरणं कुरुधर्मंविरमपापेभ्यः ॥ ११ ॥
वृद्धत्वाऽनलदग्धस्य सारयौवनवस्तुनः ॥
दृश्यतेदेहगेहेषु भस्मैवपलितच्छलात् ॥ १२ ॥
वीक्ष्यतेपलितश्रेणि नैववृद्धस्यमूर्धनि ॥
भूमिवजातंजन्मेति किंतुभस्मविधिर्न्यधात् ॥ १२ ॥
इयत्यामपिसामग्र्यां सुकृतनकृतंत्वया ॥
इतीवकुपितादंता नंतकःपातयत्यलं ॥ १३ ॥
पादौसंस्तंभयंतीमुखमपिनमयंत्यंगमाकुंचयंती
हस्तावुत्कंपयंतीप्रणयिजनवचोनश्रुतीःश्रावयंती ॥
रत्यामुद्वेजयंतीवलिततनुमतीनूतनोढाजरावा
तुल्यापूर्वान्पुसस्त्रंसतिबतपरंभीतिहेतुर्नरस्य ॥ १४ ॥
शांतमन्युंदंडधरं कुबेरमपिशूलिनंतथागदिनं ॥
कुरुतेजरानसाकिं कुर्यान्नीरूपनामकंमनुजं ॥ १५ ॥
स्थूलभावरणोऽतिवृत्तकथकःकामाश्रुलाल्याऽऽविलो
भग्नोरःकटिपृष्ठजानुजघनोमुग्धोऽतिथीनवारयन् ॥
शृण्वन्धृष्टवधूवचांसिधनपासंत्रासयन्त्रायसा
नाशापाशनिबन्धजोर्वविभवोवृद्धोगृहेग्लायति ॥ १६ ॥

१ समानधर्मत्वं २ दंतरहितं. ३ पलितमेवदूतः ४ वार्धक्यमदेवानलस्तेनदग्धस्य ५ पलितमिषेण. ६ पलितपंक्तिः ७ व्यर्थमेव. ८ ब्रह्मा. ९ निर्मितवान्. १० पुण्यं. ११ यमः १२ पादयोःस्तंभनंकुर्वती. १३ उद्वेगकुर्वती. १४ वलयःसंजातायस्याःसाव-लितासाचासौतनुश्चतद्वती. पक्षे वलितंवलनंतनुकायास्तद्वती: १५ नवीनविवाहितास्त्री. १६ नूतनोढा. १७ पुरुषान्. १८ उद्वेगंप्राप्नोति. १९ जरा. २० भयकारण. २१ इंद्रं. कोपनंच. २२ यमं. यष्टिधरंच. २३ धनाधिपं कुत्सितशरीरंच २४ शिवं. शूलयुक्तंच. २५ विष्णुं. गदयुक्तंच. २६ अतिक्रांतानिवृत्तानिकथयतीति. २७ धार्ष्ट्ययुक्तस्त्रीवचनानि. २८ खेदंप्राप्नोति.

संसारः

संसारतवनिस्सार पदवीनदवीयसी ॥
अंतरादुस्तरानस्यु यदिरेमदिरेक्षणाः ॥ १ ॥
दुःखांगारकतीव्रः संसारोऽयंमहानसोगहनः ॥
इहविषयाऽमृतलालस मानसमार्जारमानिपत ॥ २ ॥
असारेखलुसंसारे सारंश्वशुरमंदिरं ॥
हरोहिमालयेशेते हरिश्शेतेमहोदधौ ॥ ३ ॥
असारेखलुसंसारे सारमेतच्चतुष्टयं ॥
काश्यांवासःसतांसंगो गंगांऽभःशंभुसेवनं ॥ ४ ॥
क्वचिद्विद्वद्गोष्ठीक्वचिदपिसुरामत्तकलहः
क्वचिद्वीणावादःक्वचिदपिचहाहेतिरुदितं ॥
क्वचिद्रम्यारामाक्वचिदपिजराजर्जरतनु
र्नजानेसंसारःकिममृतमयःकिंविषमयः ॥ ५ ॥
कृच्छ्रेणाऽमेध्यमध्येनियमिततनुभिःस्थीयतेगर्भगर्ते
कांताविश्लेषदुःखव्यतिकरविषमेयौवनेविप्रयोगः ॥
नारीणामप्यवज्ञाविलसितनियतंवृध्धभावेऽप्यसाधुः
संसारेरेमनुष्यावदतयदिसुखंस्तोकमप्यस्तिकिंचित ॥५॥

भवजयोपायः

श्री० ॥ शुचिसांनिध्ययोगेन त्वद्रिरामोपगूहनात ॥
केर्मसाक्षिसमालोकात भवंहेमंतवज्जयेत ॥ १ ॥
माणाघातान्निवृत्तिःपरधनहरणेसंयमःसत्यवाक्यं
कालेशक्त्यामदानंयुवतिजनकथामूकभावःपरेषां ॥

---

१ मार्गः २ अतिदूरा. ३ मध्ये. ४ पाकगृहं. ५ अशुचिमलादितन्मध्ये. ६ जरायुणा बद्ध शरीरैः ७ गर्भाशये. ८ अवमानः ९ अल्पं. १० अग्निसंनिधानेन. पक्षे शुचिःपवित्रोमुनीश्वरसत्समागमेन. ११ रामायाःस्त्रियःउपगूहनादालिंगनात. पक्षे रामस्यात्मस्वरूपध्याानात. १२ सूर्याऽवलोकनात, पक्षे परमात्मनोऽपरोक्ष्यात् १३ संसारं १४ स्त्रीजनवार्ता.

तृष्णास्रोतोविभंगोगुरुषुचविनयःसर्वभूताऽनुकंपा
सामान्यःसर्वशास्त्रेष्वनुपहतविधिःश्रेयसामेषपंथाः ॥ २ ॥
इतरभजनघनरसतः फलनिष्पत्तिर्नवाभवेदिति न ॥
मुक्ताःपरंतुलोके स्वातिघनरसंविनानजायेरन् ॥ ३ ॥

कालः

व्योमैकांतविहारिणोऽपिविहगाःसंप्राप्नुवंत्यापदं
बध्यंतेनिपुणैरगाधसलिलान्मत्स्याःसमुद्रादपि ॥
दुर्नीतंकिमिहाऽस्तिकिंसुचरितंकःस्थानलाभेगुणः
कालोहिव्यसनप्रसारितकरोगृण्हातिदूरादपि ॥ १ ॥
सारम्यानगरीमहान्सनृपतिःसामंतचक्रंचतत्
पार्श्वेतस्यचसाविदग्धपरिषत्ताश्चंद्रबिंबाऽऽननाः ॥
उन्मत्तःसचराजपुत्रनिवहस्तेबंदिनस्ताःकथाः
सर्वंयस्यवशादगात्स्मृतिपथंकालायतस्मैनमः ॥ २ ॥
यत्राऽनेकेक्वचिदपिगृहेतत्रतिष्ठत्यथैको
यत्राऽप्येकस्तदनुबहवस्तत्रनैकोऽपिचांते ॥
इत्थंचेमौरजनिदिवसौदोलयन्द्वाविवाऽक्षौ
कालःकाल्याभुवनफलकेक्रीडतिप्राणिसारैः ॥ ३ ॥
अर्थानमेवसनमे जायामेबंधुवर्गोमे ॥
इतिमेमेकुर्वाणं कालवृकोहंतिपुरुषाऽजं ॥ ४ ॥
ब्रह्माविष्णुदिनेयाति विष्णूरुद्रस्यवासरे ॥
ईश्वरस्यतथासोऽपि कःकालंलंघितुक्षमः ॥ ५ ॥

---

१ तृष्णाप्रवाहोपरोधः २ दया. ३ इतरेषांभजनयोघनरसस्तेन. पक्षे इतरेयेभजनानसप्राणितेभ्योयोघनरसःउदकंतस्मात् ४ फलोत्पत्तिः पक्षे फलानांसस्यादीनामुत्पत्तिः ५ जीवन्मुक्ताः प० मौक्तिकानि. ६ स्वस्यअतिघनरसःअत्यंतप्रेमरसस्तंविना. पक्षे स्वातिनक्षत्रोदकंविना. ७ केवलमाकाशसंचारिणः ८ पक्षिणः ९ विपत्ति. १० कुशलैः ११ मांडलिकमंडलं. १२ चतुरसभा. १३ स्तुतिपाठकाः १४ पाशौ. १५ भुवनमेवफलकःसारीपटस्तस्मिन्. १६ प्राणिनएवसाराः (सोंगट्याइतिलो०) तैः १७ मोजन. १८ वस्त्रं १९ कालएववृकः (लांडगाइ०) २० पुरुषएवअजः (बोकड) तं.

अप्सुप्लवंतेपाषाणा मानुषाघ्नंतिराक्षसान् ॥
कपयःकर्मकुर्वंति कालस्यकुटिलागतिः ॥ ६ ॥

क्षमा.

श्री० ॥ क्षमाशस्त्रंकरेयस्य दुर्जनःकिंकरिष्यति ॥
अतृणेपतितोवन्हिः स्वयमेवोपशाम्यति ॥ १ ॥
आजन्मसिद्धंकौटिल्यं खलस्यचहलस्यच ॥
सोढुंनयोर्मुखाऽऽक्षेप मलमेकैवसाक्षमा ॥ २ ॥
नरस्याऽऽभरणंरूपं रूपस्याऽऽभरणंगुणः ॥
गुणस्याऽऽभरणंज्ञानं ज्ञानस्याऽऽभरणंक्षमा ॥ ३ ॥
क्षमाबलमशक्तानां शक्तानांभूषणंक्षमा ॥
क्षमावशीकृतिर्लोके क्षमयाकिंनसिध्यति ॥ ४ ॥

क्षुधा.

श्री० ॥ आदौरूपविनाशिनीकृशकरीकामांऽकुरच्छेदिनी
पुत्राऽमित्रकलत्रभेदनकरीगर्वांकुरच्छेदिनी ॥
कामंमंदकरीतपःक्षयकरीधर्मस्यनिर्मूलनी
सामांसंप्रतिसर्वरोगजननीप्राणापहंत्रीक्षुधा ॥ १ ॥
शय्यावस्त्रंचंदनंचारुहास्यं वीणावाणीदृश्यतेयाचनारी ॥
नभ्राजंतेक्षुत्पिपासातुराणां सर्वाऽऽरंभास्तंडुलाप्रस्थमूलाः ॥ २ ॥
नाऽस्तिक्षुधासमंदुःखं नाऽस्तिरोगःक्षुधासमः ॥
नाऽस्त्याहारसमंसौख्यं नाऽस्तिक्रोधसमोरिपुः ॥ ३ ॥

स्वभावः

सर्वस्यहिपरीक्ष्यंते स्वाभावानेतरेगुणाः ॥
अतीत्यहिगुणान्सर्वान् स्वभावोमूर्ध्निवर्तते ॥ १ ॥
नधर्मशास्त्रंपठनीतिकारणं नचाऽपिवेदाऽध्ययनंदुरात्मनः ॥

---

१ तरंति, २ बका, ३ शांतिः ४ (नांगरहनिलोके) ५ पृथ्वी शांतिश्च, ६ वायुः ७ कुटंब, ८ सुंदरं. ९ अतिक्रम्य.

स्वभावएवाऽत्रतथाऽतिरिच्यते यथाप्रकृत्यामधुरंगवांपयः ॥ २ ॥
निम्नोन्नतंवक्ष्यतिकोजलानां विचित्रभावंमृगपक्षिणांच ॥
माधुर्यमिक्षौकटुतांमरीचे स्वभावतःसर्वमिदंहिसिद्धं ॥ ३ ॥
वन्हिस्तस्यजलायतेजलनिधिःकुल्यायतेतत्क्षणा
न्मेरुःस्वल्पशिलायतेमृगपतेःसंघःकुरंगायते ॥
व्यालोमाल्यगुणायतेविषरसःपीयूषवर्षायते
यस्यांऽगेऽखिललोकवल्लभतमंशीलंसमुन्मीलति ॥ ४ ॥

जीवितसाफल्यं

यस्यजीवंतिधर्मेण पुत्रमित्राणिबांधवाः ॥
सफलंजीवितंतस्य नाऽऽत्मार्थेकोहिजीवति ॥ १ ॥
वाणीरसवतीयस्य भार्यापुत्रवतीसती ॥
लक्ष्मीर्दानवतीयस्य सफलंतस्यजीवितं ॥ २ ॥

दीपवर्णनं.

श्री० ॥ रक्षपात्रगतंस्नेह मदीपश्रीविवर्धनं ॥
मयास्यंतविनातेन भस्मत्वंयेभवद्गुणाः ॥ १ ॥
रेरेदीपतिरस्कृताऽखिलतमःस्तोमाऽरिवर्गस्यते
रीत्रीगूढनिजांगपातिशलभाऽऽघातेनकिंपौरुषं ॥
तत्कर्माऽऽचरयेनतावकयशोभूयात्प्रभातेपुन
र्नस्नेहोनचसादशानहिपरंज्योतिःपरंस्थास्यति ॥ २ ॥
दीपोऽर्जुनइवाऽऽभाति पतंगजनितापदः ॥
किंचरामइवाऽऽभाति समुच्छिन्नदशाननः ॥ ३ ॥

---

१ अतिक्रम्यवर्तते. २ नीचोच्चं. ३ तीक्ष्णतां. ४ कृत्रिमसरिद्भवति. ५ सर्पः ६ माला. ७ अमृतं. ८ विजृंभते. ९ शोभा. १० सूत्राणि. ११ टोळइतिलोकम. १२पतंगःशलभःतेनजनिताआपद्येन. आर्यचैवहलंतानामित्युकेष्टाप् पक्षे पतंगःसूर्यस्तस्मा-ज्जातोकर्णस्तस्मात्कर्णात्संप्राप्ताआपद्यस्य:(?) १३ समुच्छिन्नदशायाःवर्त्याःआननंयेन. पक्षे समु-च्छिन्नउन्मूलितोदशाननोरावणोयेन.

व्यापारिणः

श्लो० ॥ आदौसत्ययुगेबलिस्तदनुचत्रेतायुगेराघवो
रामःसत्यपराक्रमोऽथभगवान्धर्मस्तथाद्वापरे ॥
दाताकोऽपिनचाऽस्तिसंप्रतिकलौजीवंतिकेनाऽर्थिन
इत्येवंकृतनिश्चयेनविधिनाव्यापारिणोनिर्मिताः ॥ १ ॥

परोपकृतिः

श्लो० ॥ नीरसान्यपिरोचंते कार्पासस्यफलानिमे ॥
येषांगुणमयंजन्म परेषांगुह्यगुप्तये ॥ १ ॥
परोकारशून्यस्य धिङ्मनुष्यस्यजीवितं ॥
यावंतःपशवस्तेषां चर्माण्यपकरिष्यति ॥ २ ॥
धनानिजीवितंचैव पराऽर्थेप्राज्ञउत्सृजेत् ॥
तन्निमित्तोवरंत्यागो विनाशेनियतेसति ॥ ३ ॥
भवंतिनम्रास्तरवःफलोद्गमै र्नवांऽबुभिर्भूरिविलंबिनोघनाः ॥
अनुद्धताःसत्पुरुषाःसमृद्धिभिः स्वभावएवैषपरोपकारिणाम ॥ ४ ॥
श्रोत्रंश्रुतेनैवनकुंडलेन दानेनपाणिर्नतुकंकणेन ॥
विभातिकायःखलुसज्जनानां परोपकारैर्नतुचंदनेन ॥ ५ ॥
पद्माऽऽकरंदिनकरोविकचंकरोति
चंद्रोविकासयतिकैरवचक्रवालं ॥
नाऽभ्यर्थितोजलधरोऽपिजलंददाति
संतःस्वयंपरहितेषुकृताऽभियोगाः ॥ ६ ॥
तृणंचाऽहंवरंमन्ये नरादनुपकारिणः ॥
घासोभूत्वापशून्पाति भीरून्पातिरणाऽगणे ॥ ७ ॥
परोपकृतिकैवल्ये तोलयित्वाजनार्दनः ॥
गुर्वीमुपकृतिंमत्वा ह्यवतारान्दशाऽग्रहीत् ॥ ८ ॥

---

१ शुष्काणि. २ सूत्रमयं. ३ कर्णः ४ शास्त्रेण. ५ कासारं. ६ कुमुदमंडलं. ७ श्री- मान्, भयशीलान्वा. ८ परोपकारः ९ मोक्षः १० उभयोस्तुलनांकृत्वा. ११ भारवतीं १२ मत्स्यादीन्. १३ जग्राह.

ब्रह्मलिखित.

श्री० ॥ पत्रंनैवयदाकरीरविटपेदोषोवसंतस्यकिं
नोलूकेनविलोक्यतेयदिदिवासूर्यस्यकिंदूषणं ॥
धारानैवपतंतिचातकमुखेमेघस्यकिंदूषणं
यत्पूर्वंनिजभालपट्टलिखितंतन्मार्जितुंकःक्षमः ॥ १ ॥
यःसुंदरस्तद्वनिताकुरूपा यासुंदरीसापतिरूपहीना ॥
यत्रोभयंतत्रदरिद्रताच विधेर्विचित्राणिविचेष्टितानि ॥ २ ॥
इतरकर्मफलानियदृच्छया विलिखितानिसहेचतुरानन ॥
अरसिकेषुकवित्वनिवेदनं शिरसिमालिखमालिखमालिख ॥ ४ ॥
सोहंगगनविहारीकल्मषध्वंसकारी
दशशतकरधारीज्योतिषांमध्यचारी ॥
विधुरपिविधियोगाद्ग्रस्यतेराहुणाऽसौ
लिखितमपिललाटेप्रोज्झितुंकःसमर्थः ॥ ५ ॥
त्रिलोकेशःशार्ङ्गीशबरशरलक्ष्यत्वमगम
द्विधातालोकानामलभतशिरःकृंतनविधिं ॥
मयातौतौराहोर्दिनकरशशांकौकवलितौ
प्रभुर्नब्रह्मःशंभुःशिरसिलिखितंलंघयतिकः ॥ ६ ॥
हरिणाऽपिहरेणाऽपि ब्रह्मणात्रिदशैरपि ॥
ललाटलिखितारेखा नशक्यापरिमार्जितुं ॥ ७ ॥

वेश्यागर्हणं.

श्री ॥ वेश्येयंऽसौमदनज्वाला रूपेंधनसमेधिता ॥
कामिभिर्यत्रहूयंते यौवनानिधनानिच ॥ १ ॥

---

१ नेत्रूर्तानिलोके. २ दिवाभीतेन. ३ शोधयितुं. ४ समर्थः ५ स्वेच्छया. ६ आकाशसंचारि. ७ अंधकारनाशकर्ता. ८ नक्षत्राणां. ९ विष्णुः १० शबरोजरानामाभिल्लः प्रभासेपरस्परंकलहेनाखिलयादवोपसंहारानंतरमश्वत्थस्याधस्ताद्वामोरौदक्षिणंपादंनिधायास्थितेभगवतिजरानाम्नाभिल्लेनदूरतोमगचरणंदृष्ट्वामृगमुखभ्रमाद्भगवत्पादोबाणेनविद्धइतिभागवतं ११ ब्रह्मा १२ शिरःकर्तनं. १३ ग्रासनं १४ दैवैः १५ वारांगना. १६ रूपमेवेंधनकाष्ठंतेनसम्यक्प्रदीप्ता

कष्टंजीवतिगणिका भृत्यकोऽपिचराजसेवकोवैद्यः ॥
दिवसेदिवसेमरणं परस्यवांछितरंजनवृत्तिः ॥ २ ॥
एताहसंतिचरुदंतिचवित्तहेतो विश्वासयंतिपुरुषंनचविश्वसंति ॥
तस्मान्नरेणकुलशीलसमन्वितेन वेश्याःश्मशानघटिकाइववर्जनीयाः॥३॥
जात्यंधायचदुर्मुखायचजराजीर्णाऽखिलांगायच
ग्रामीणायचदुष्कुलायचगलत्कुष्ठाऽभिभूतायच ॥
यच्छंतीषुमनोहरंनिजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषुविवेककल्पलतिकाशस्त्रीषुरज्येतकः ॥ ४ ॥
हारहीरकहिरण्यभूषणैः स्तोषमेतिगणिकाधनैषिणी ॥
प्रेमकोमलकटाक्षवीक्षितैरेवजीवतिकुलांऽगनाजनः ॥ ५ ॥
तावत्कुलस्त्रीमर्यादा यावल्लज्जावगुंठनं ॥
त्यक्तेतस्मिन्कुलस्त्रीभ्यो वरंवेश्यांऽगनाजनः ॥ ६ ॥
धनाऽऽशाकैतवस्नेहो वितथैश्चसतोषणं ॥
एकमप्यस्तिनाऽस्मासु कथंवेश्यासमावयं ॥ ७ ॥

मद्यपानगर्हणं.

चित्तेभ्रांतिर्जायतेमद्यपानाद् भ्रांतेचित्तेपापचर्यामुपैति ॥
पापंकृत्वादुर्गतिंयांतिमूढा स्तस्मान्मद्यंनैवपेयंनपेयं ॥ १ ॥
मत्तोहिनेक्षतेसर्वं मिथ्याप्रलपतिहिविकलयाबुद्ध्या ॥
मातरमपिकामयते साऽवज्ञंमद्यपानमत्तःसन् ॥ २ ॥
एकतश्चतुरोवेदा ब्रह्मचर्यंतथैकतः ॥
एकतःसर्वपापानि मद्यपानंतथैकतः ॥ ३ ॥
मद्यपस्यकुतःसत्यं दयामांसाऽशिनःकुतः ॥
कामिनश्चकुतोविद्या निर्धनस्यकुतःक्रिया ॥ ४ ॥

---

१ श्मशानस्थिताघटिकाःघटपोघटाइतियावत् एताश्चयाअस्पृश्यास्तथैवैतावर्जनीयाइतिभावः २ जन्मान्धाय. ३ ग्राम्याय. ४ अर्पयंतीषु. ५ लक्ष्मीलेशाशया. ६ गणिकासु. ७ कनेच्छावती. ८ लज्जयाअवगुंठनंसंवरणं. घुंगटइतिलोके. ९ कपटस्नेहः १० असत्यनीतिभिः ११ पापाचरणं. १२ नरकं. १३ नाशयति. १४ इच्छति.

वैकल्यंधरणीपात मयथोचितजल्पनं ॥
संनिपातस्यचिन्हानि मथसर्वाणिवर्जयेत ॥ ६ ॥

अघटितघटना.

श्री० ॥ अंबुजमंबुनिजातं नहिदृष्टंजातमंबुजादंबु ॥
अधुनातद्विपरीतं चरणसरोजाद्विनिर्गतागंगा ॥ १ ॥
जातालताहिशैले जातुलतायांनजायतेशैलः ॥
अधुनातद्विपरीतं कनककलतायांगिरिद्वयंजातं ॥ २ ॥
कमलेकमलोत्पत्तिः श्रूयतेनचदृश्यते ॥
बालेतवमुखांभोजे दृष्टमिंदीवरद्वयं ॥ ३ ॥
नकेनाऽपिश्रुतंदृष्टं वारिणावारिशुष्यति ॥
अहोगोदावरीवारा भवसिंधुर्विशुष्यति ॥ ४ ॥
मूकाऽऽरब्धंकमपिबधिराःश्लोकमाकर्णयंति
मद्वोलुस्तंविलिखतिकुणिःश्लाघयावीक्षतेंऽधः ॥
अभ्यारोहत्यहहसहसापंगुरप्यद्रिशृंगं
सांद्राऽऽलस्याःशिशुभरणतोमंदमायांतिवंध्याः ॥ ५ ॥
एषवंध्यासुतोयाति खंपुष्पकृतशेखरः ॥
मृगतृष्णांऽभसिस्नातः शशशृंगधनुर्धरः ॥ ६ ॥

प्रवासः

श्री० ॥ अहोनुकष्टःसततंप्रवास स्ततोऽतिकष्टःपरगेहवासः ॥
कष्टाऽधिकानीचजनस्यसेवा ततोऽतिकष्टाधनहीनताच ॥ १ ॥
तीर्थानामवलोकनंपरिचयःसर्वत्रवित्ताऽर्जनं
नानाऽऽश्चर्यनिरीक्षणंचतुरताबुद्धेःप्रशस्तागिरः ॥

१ विकलत्वं २ अयुक्तप्रलापः ३ त्रिदोषस्य. ४ लक्षणानि. ५ सुवर्णवल्ल्यां-तत्तुल्यायामंगयष्ट्यां ६ पर्वततुल्यंस्तनद्वयमितिभावः ७ इंदीवरसदृशंनेत्रयुगलं. ८ उदकेन. ९ मत्स्यावान्. १० विकलपाणिः ११ शिखर. १२ समाकाशंतस्यपुष्पेणकृतः-शेखरःशिरोभूषणंयेन. १३ मरुमरीचिकोदककृतमज्जनः १४ शशशृंगकृतधनुर्धारी. १५ परगृहवासः

एतेसंतिगुणाःप्रवासविषयेदोषोऽस्तिचैकोमहान्
यन्मुग्धामधुराऽधराऽधरसुधापानंविनास्थीयते ॥ २ ॥
देशेदेशेकिमपिकुतुकादद्भुतंलोकमानाः
संपाद्यैवद्रविणमतुलंसेव्यभूयोऽप्यवाऽऽप्य ॥
संयुज्यंतेसुचिरविरहोत्कंठिताभिःसतीभिः
सौख्यंधन्याःकिमपिदधतेसर्वसंपत्समृद्धाः ॥ ३ ॥
आकिंचन्याददतिपरिचयाज्जाययोपेक्ष्यमाणो
भूपालानामननुसरणाद्धिम्यदेवाऽखिलेभ्यः ॥
गेहेतिष्ठन्कुमतिरलसःकूपकूर्मैःसधर्मा
किंजानीतेभुवनचरितंकिंसुखंचोपभुंक्ते ॥ ४ ॥
व्यापारांतरमुत्सृज्य वीक्षमाणोवधूमुखं ॥
योगृहेष्वेवनिद्राति दरिद्रातिसदुर्मतिः ॥ ५ ॥

व्याजनिंदा.

श्री० ॥ यच्छ्वशुरोऽभूज्जनकः पत्युर्द्वाभ्याश्चतत्सुताजाया ॥
भ्राताभुजंगराजो भक्तामुक्त्यैभजंतितच्चित्र ॥ १ ॥
त्रिदोषशमनार्थाय त्वयिमज्जंतिमानवाः ॥
त्वंकरोषिचतुर्दोषं कथंगंगेनलज्जसि ॥ २ ॥
लावण्यद्रविणव्ययोनगणितःक्लेशोमहानर्जितः
स्वच्छंदंचरतोजनस्यहृदयेचिताज्वरोनिर्मितः ॥
एषाऽपिस्वगुणाऽनुरूपरमणाऽभावाद्वराकीहता
कोऽर्थश्चेतसिवेधसाविनिहितस्तन्वीमिमांतन्वता ॥ ३ ॥
इंदोर्लक्ष्मत्रिपुरजयिनःकंठमूलंमुरारि
र्दिङ्नागानांमदजलमषीभांजिगंडस्थलानि ॥

---

१ आश्चर्यं. २ वीक्षमाणाः ३ द्रव्यं ४ बहुलं ५ गृहं. ६ पुनः ७ दारिद्र्यात्. ८ अवमानितः ९ सदृशः १० दरिद्रोभवति. ११ पिताजनकराजश्च. १२ उपमा-तुःपृथ्व्याश्च. १३ शेषःजारश्च. १४ त्रयोदोषाःआध्यात्मिकाधिभौतिकाधिदैविकाः १५ चत्वारोदोषाचत्वतथाविधं पत्नीषनुर्द्वयं विष्णुसरूपंकरोषीत्यर्थः १६ कलंकः १७ दिग्गजानां

अथ्याऽप्युर्वीवलयतिलकश्यामलिम्नाऽनुलिप्ता
न्याभासंतेवत्धवलितांकयशोभिस्त्वदीयैः ॥ ४ ॥
सर्वदासर्वदोऽसीति मिथ्यासंस्तूयसेजनैः ॥
नाऽरयोलेभिरेपृष्ठं नवक्षःपरयोषितः ॥ ५ ॥

सेवकनिंदा.

श्लो० ॥ आहारेवडवाऽनलश्चशयनेयःकुंभकर्णायते
संदेशेबधिरःपलायनविधौसिंहःसृगालोरणे ॥
अंधोवस्तुनिरीक्षणेऽथगमनेखंजःपटुःक्रंदने
भाग्येनैवहिलभ्यतेपुनरसौसर्वोत्तमःसेवकः ॥ १ ॥
प्रणमन्त्युन्नतिहेतो जीवितहेतोर्विमुंचतिप्राणान् ॥
दुःखीयतिसुखहेतोः कोमूढःसेवकादन्यः ॥ २ ॥
जीवंतोऽपिमृताःपंच व्यासेनपरिकीर्तिताः ॥
दरिद्रोव्याधितोमूर्खः प्रवासीनित्यसेवकः ॥ ३ ॥
शिरसाधार्यमाणोऽपि सोमःसौम्येनशंभुना ॥
तथाऽपिकृशतांधत्ते कष्टःखलुपराऽऽश्रयः ॥ ४ ॥
वरंवनंवरंभैक्ष्यं वरंभारोपजीवनं ॥
पुंसांविवेकहीनानां सेवयानधनाऽर्जनं ॥ ५ ॥
सेवयाधनमिच्छद्भिः सेवकैःपश्ययत्कृतं ॥
स्वाऽऽयैत्स्वंशरीरस्य मूढैस्तदपिहारितं ॥ ६ ॥
सर्वःकैल्पेवयमियततेलब्धुमर्थान्कुटुंबी
पश्चात्पुत्रैरपहितभरःकैल्पतेविश्रमाय ॥
अस्माकतुमतिदिनमियंसादयंतीप्रतिष्ठां
सेवाकाकुःपरिणतिरभूत्स्त्रीपुकष्टोऽधिकारः ॥ ७ ॥
स्वाऽभिप्रायपरोक्षस्य परचित्ताऽनुवर्तिनः ॥

---

१ श्यामलिम्ना. २ वैरिणः ३ उरःस्थलं. ४ वाडवाग्निः ५ शार्दूलमे. ६ कोल्हाइ-तिलो० ७ पादविकलः ८ रोदने. ९ भिक्षा. १० भारवाहकत्वेनोपजीवनं. ११ स्वाधी-नत्वं. १२ नाशितं. १३ प्रथमे. १४ योग्योभवति.

स्वयंविक्रीतदेहस्य सेवकस्यकुतःसुखं ॥ ८ ॥
चलेषुस्वामिचित्तेषु सुलभेपिशुनेजने ॥
यदिजीवंत्यहोचित्र क्षणमप्युपजीविनः ॥ ९ ॥
सेवाश्ववृत्तिर्यैरुक्ता नतैःसम्यगुदात्हृतं ॥
स्वच्छंदचारीकुत्रश्वा विक्रीतासु.कसेवकः ॥ १० ॥
मौनान्मूकःप्रवचनपटुर्वातलोजल्पकोवा
धृष्टःपार्श्वेवसतिचसदादूरतस्त्वप्रगल्भः ॥
क्षांत्याभीरुर्यदिनसहतेप्रायशोनाऽभिजातः
सेवाधर्मःपरमगहनोयोगिनामप्यगम्यः ॥ ११ ॥
द्वयजहातिसेवक. सुखंचमानमेवच ॥
यदर्थमर्थमोहते तदेवतस्यहीयते ॥ १२ ॥

भिक्षुकगुणाः

श्री० ॥ उच्चैरध्ययनंपुरातनकथास्त्रीभिःसहाऽऽलापनं
तासामर्भकलालनपतिनुतिस्तत्पाकमिथ्यास्तुतिः ॥
आदेशस्यकराऽवलबनविधिःपांडित्यलखक्रिया
होरागारुडमंत्रतंत्रकविधिर्भिक्षोर्गुणाद्वादश ॥ १ ॥
प्रातःक्षालितलोचनाःकरतलेचंचत्पवित्रांकुरा
स्तत्तत्स्थाननिवेशितोर्ध्वतिलकाश्चैलांतबध्धाऽक्षताः ॥
कोजातश्चमृतोऽथवामृततिथिःकस्याऽऽलयेवर्तते
चेत्थंहर्षशतैर्युताःप्रतिदिनंधावंत्यहोभिक्षुकाः ॥ २ ॥
अंडयोर्भुक्तिमतांप्रयागसमयेमंत्रेपुपृष्ठगतः
पाकाऽगारगतस्तुपाचकमनस्तोषायवाचस्पतिः ॥
उच्छ्रायांनिरतोरतोऽर्भकगणेपिंडेपुदत्ताऽऽदरो
नानाभ्रातृगणैकचालितमनाभट्टोत्तमोराजते ॥ ३ ॥

---

१ सूचके. २ सेवकाः ३ विक्रांताःअसबप्राणायनसः ४ बहुभाषकः ५ धीटइ-तिको० ६ असमंजसः ७ मयशीलः ८ दांडगाइ० ९ इच्छति. १० पठनं. ११ शिशु-१२ स्तुतिः १३ हस्तकथनं १४ बध्नाति १५ अपगम्यः १६ भोक्तृणां. १७ बृहस्पतिः
१८ दक्षिणायां अर्थतुवैदिकानांसांकेतिकःशब्दः

वाग्वर्णनं.

श्री० ॥ केयूरानविभूषयंतिपुरुषंहारानचंद्रोज्वला
नस्नानंनविलेपनंनकुसुमंनाऽलंकृतामूर्धजाः ॥
वाण्येकासमलंकरोतिपुरुषंयासंस्कृताधार्यते
क्षीयंतेखलुभूषणानिसततंवाग्भूषणंभूषणं ॥ १ ॥

मातर्नाऽतःपरमनुचितंयत्खलानांपुरस्ता
दस्ताऽऽशांकंजठरपिठरीपूर्तयेनार्तितामि ॥
तत्क्षंतव्यंसहजसरलेवत्सलेवाणिकुर्या
मार्यश्चित्तंगुणगणनयागोपवेषस्यविष्णोः ॥ २ ॥

अपिललितसुगुणवेणिः सोऽलंकाराऽपियासुवर्णाऽपि ॥
रघुतिलकविहीनाचेद्वाणीरमणीवनैवकल्याणी ॥ ४ ॥

कामानदुग्धेविप्रकर्षत्यलक्ष्मीं
कीर्तिसूतेदुष्कृतंयाहिनस्ति ॥
तांचाप्येतांमातरंमंगलानां
धेनुंधीराःसूनृतांवाचमाहुः ॥ ५ ॥

तवकरकमलस्थांस्फाटिकीमक्षमालां
नखकिरणविभिन्नांदाडिमीबीजबुध्या ॥
अनुलवमनुकर्षन्येनकीरोनिषिद्धः
सभवतुममभूत्यैवाणितेमंदहासः ॥ ६ ॥

---

१ बाहुभूषणानि. २ चंद्रवदुज्ज्वलाः ३ सुगंधतैलादिनासंस्कृताः ४ केशाः ५ सम्यगलंकरोति: ६ याअसंस्कृतेतिपदच्छेदपक्षेसमलंमलसहितं. ७ उदरभांड. ८ गोपवेषधारिणःकृष्णस्य. ९ ललितासुंदरासुष्ठुगुणयुक्तावेणिःप्रवाहोयस्याःसा, पक्षे ललिताशोभनगंगावनादिसूत्रयुक्तावेणिःकेशपाशोयस्याः १० श्लेषरूपकाद्यलंकृतियुक्ता, पक्षे सौवर्णहीरकाद्यलंकारयुक्ता. ११ सुष्ठुवर्णाःयस्यां. पक्षे शोभनगौरवर्णा. १२ रघुतिलकोरामस्तद्वर्णनविहीनावाणी १३ मंगला. रलयोःसावर्ण्यात्लघुतिलकेनकुंकुमतिलकेनविहीनारमणीस्त्री विधवेत्यर्थः १४ मनोरथान्. १५ प्रपूरयति. १६ अवलक्ष्मीं (अवद्सेतिलोके) १७ सत्यां. १८ स्फटिकमयीं. १९ जपमालां. २० नखाग्रकिरणैर्विभिन्नांमिश्रां. २१ प्रतिक्षण. २२ शुकः २३ संपत्त्यै. २४ मंदहास्यं.

गाम्भोरुवेस्तुपरंपारं नोपेयोक्सरस्वती ॥
अतोनिमज्जनभया तुंबींवहतिवक्षसि ॥ ७ ॥
याकर्षतिनिजयोगा दंतर्गतजीवनानिसरसानां ॥
वाणीसैवगुणवती घटीवयद्वावंधूटीव ॥ ८ ॥
अस्त्यथाऽपिचतुःसमुद्रपरिखापर्यंतमुर्वीतलं
वर्ततेऽपिचतत्रतत्ररसिकागोष्ठीषुसक्तानृपाः ॥
एकस्तत्रनिरादरोभवतिचेदन्योभवेत्साऽऽदरो
वाग्देवीवदनांबुजेवसतिचेत्कोनामदीनोजनः ॥ ९ ॥
तास्तुवाचःसभायोग्या याश्चित्ताऽऽकर्षणक्षमाः ॥
स्वेषांपरेषांविदुषां द्विषामविदुषामपि ॥ १० ॥

वाग्मिप्रशंसा.

श्रोतृन्मूकयतिब्रुवन्स्थिरतमंकुर्वन्नमीषांमनो
निर्बाष्पःपरबाष्पकृत्परदशामेकाऽऽश्रयोनाऽन्यदक् ॥
यस्त्यक्ताऽगविकंपनःप्रचलयन्नित्यंसतांमस्तकं
क्षीरंश्रोतृषुमुख्यमात्मनिगुणंधत्तेसवक्तोत्तमः ॥ १ ॥
तद्वक्तासदसिब्रवीतुवचनंयच्छृण्वतांचेतसः
प्रोल्लासंरसपूरणंश्रवणयोरक्ष्णोर्विकासश्रियं ॥
क्षुन्निद्राश्रमदुःखकालगतिवत्कार्यांतरप्रस्मृति
प्रोत्कंठामनिशंश्रुतौवितनुतेशोकोविरामादपि ॥ २ ॥
श्रुतिसिन्धांतशूरस्य तद्विरुद्धान्निरुंधतः ॥
वल्गितंवावदूकस्य कृतिनःकिंनशोभते ॥ ३ ॥
अल्पाऽक्षररमणीयं यःकथयतिनिश्चितंसखलुवाग्मी ॥
बहुवचनमल्पसारं यःकथयतिविप्रलापीसः ॥ ४ ॥

---

१ गामसमुद्रस्य. २ नप्रापवती. ३ इक्ष्वाकुफलं. जलतरणार्थंतुंब्याःसंग्रहंलोकाः कुर्वंतीतिप्रसिद्धं. ४ हृद्गतानिजीवनानि. उदकानिच. ५ रसिकानां कूपादीनांच. ६ प्रामाण्यादिगुणयुक्ता, रज्जुयुक्ताच. ७ स्त्रीव. ८ संदकइतिलो०. ९ सरस्वती. १० वक्ता ११ मूकान्करोति. १२ अचलंतरस्थमितियावत्. १३ प्रकर्षेणोल्लासंविकासं. १४ रसानांशृंगारादीनांपूरणं. १५ अन्यकार्यविस्मृतिं. १६ वक्तुः

शुद्धकांस्यरचिताऽपिकाल्किता जिह्वयायदिनयोगिताभवेत ॥
किंतयाकरणमस्तिघंटया जिह्वयाध्वनिमताहिपूज्यया ॥ ५ ॥

असत्यवादिनिंदा.

यशोयस्माद्भस्मीभवतिवनवन्हेरिववनं
निंदानंदुःखानांयदवनिरुहाणामिवजलं ॥
नयत्रस्याच्छायाऽऽतपइवतपःसंयमकथा
कथंचित्तन्मिथ्यावचनमभिधत्तेनमतिमान् ॥ १ ॥
जिह्वैकैवसतामुभेफणवतांद्वेदुश्च नस्त्वभ्रता
स्ताःसप्तैवविभावसोर्नियमिताःषट्कार्तिकेयस्यच ॥
पौलस्त्यस्यदशाऽभवनफणिपतेर्जिह्वासहस्रद्वयं
जिह्वालक्षशतैककोटिनियमोनोदुर्जनानांमुखे ॥ २ ॥
असत्यमप्रत्ययमूलकारणं कुवासनासद्मसमृद्धिवारणं ॥
विपन्निदानंपरवंचनोर्जितं कृताऽपराधंकृतिभिर्विवर्जितं ॥ ३ ॥
नाऽसत्यवादिनःसख्यं नपुण्यंनयशोभुवि ॥
दृश्यतेनाऽपिकल्याणं कालकूटमिवाऽश्नतः ॥ ४ ॥

कृतघ्ननिंदा.

व्योमनिशांबाकुरुते चित्रंनिर्माति यत्नतःसलिले ॥
स्नपयतिपवनंसलिलै र्यस्तुखलेचरतिसत्कारं ॥ १ ॥
यथाबृष्टिःसमुद्रेषु भुक्तस्योपरिभोजनं ॥
एवंप्रीतिःखलैःसार्धं मुत्पन्नाऽप्यवसीदति ॥ २ ॥
शोकंमाकुरुकुक्कुर सत्त्वेष्वहमधमइतिमुधासाधो ॥
कष्टादपिकष्टतरं दृष्ट्वाश्वानंकृतघ्ननामानं ॥ ३ ॥

---

१ लोढीलंबकइतिभाषायांमद्गुया २ कर्तव्यं नकिंचित्कार्यमस्तीतिभावः ३ दावाग्नेः ४ आदिकारणं. ५ वृक्षाणां. ६ भक्ति. ७ सर्पाणां. ८ ब्रह्मणः ९ अग्नेः १० रावणस्य. ११ शेषस्य. १२ अविश्वासः १३ विपत्तेःकारणं. १४ कुशलैः १५ विषं. १६ भक्षयतः १७ सुखं. १८ आलस्यं. १९ पूजा. २० मयूक. २१ व्यर्थं.

गर्भवासप्रयुक्तंदुःखं.

कृमिभिःक्षतसर्वांगः सौकुमार्यात्प्रतिक्षणं ॥
मूर्छामाप्नोत्युरुक्लेशो गर्भस्थैःक्षुधितैर्भृशं ॥ १ ॥
कटुतीक्ष्णोष्णलवण क्षाराऽम्लादिभिरुल्बणैः ॥
मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ॥ २ ॥
उल्बेनसंवृतस्तस्मि न्नाडैश्चबहिरावृतः ॥
आस्तेकृत्वाशिरःकुक्षौ भुग्नपृष्ठशिरोधरः ॥ ३ ॥
अकल्पःस्वांगचेष्टायां शकुंतइवपंजरे ॥
अनुच्छ्वसन्स्मरन्पूर्वं गर्भेकिंनामविंदते ॥ ४ ॥
निःसृतोऽहंकरिष्यामि सुकृतानीतिचिंतयन् ॥
मेदोसृग्दिग्धसर्वांऽगो जरायुपटसंवृतः ॥ ५ ॥
निष्क्रामन्भृशंदुःखाऽऽर्तो रुदन्नुच्चैरधोमुखः
यंत्रादिवविनिर्मुक्तः पतत्युत्तानशाय्यथ ॥ ६ ॥

अथस्त्रीस्वभावनिंदा.

अनृतंसाहसंमाया मूर्खत्वमतिलोभता ॥
अशुचित्वंनिर्दयत्वं स्त्रीणांदोषाःस्वभावजाः ॥ १ ॥
स्त्रियोह्यकरुणाःक्रूरा दुर्मर्षाःप्रियसाहसाः ॥
घ्नत्यल्पार्थेऽपिविश्रब्धं पतिंभ्रातरमप्युत ॥ २ ॥
स्त्रियांहिनामखल्वेता निसर्गादेवपंडिताः ॥
पुरुषाणांतुपांडित्यं शास्त्रैरेवोपदिश्यते ॥ ३ ॥
विधायैवालीकविश्रंभ मज्ञेषुत्यक्तसौहृदाः ॥

---

१ कीटकैः २ महाकष्टयुक्. ३ उत्कटैः ४ जरायुणा. (जारइतिलोक.) ५ व्याप्तः ६ असमर्थः ७ चलनादिव्यापारे. ८ पक्षीव. ९ उच्छ्वासंत्यक्तुमशक्तः १० प्राचीनं-कर्म. ११ गर्भाशयाच्च्युतः १२ मेदोरक्तलिप्तसर्वांगः १३ जरायुकोशव्याप्तः १४ बहिर्निःसरन्. १५ निःसरणकालेऽत्यंतदुःखयुक्तः १६ उच्चस्वरेणरोदनंकुर्वन् १७ उत्तानः-शेतेसौउत्तानशायी. १८ असत्यं १९ कपट २० दुःसहाः २१ स्वभावतः २२ कपट-विश्वासं.

नवंनवंमभीष्णंश्च: पुंभिस्त्वस्तैरेवमथ: ॥ ४ ॥
स्वातंत्र्यंपितृमंदिरेचवसतिर्यात्रोत्सवेसंगति
र्गोष्ठीपूरुषसंनिधाननियमोवासोविदेशेतथा ॥
संसर्ग:सहपुंश्चलीभिरसकृद्वृत्तेर्निजायाःक्षति:
पत्युर्वार्धकमीर्ष्यितंप्रवसनंनाशस्यहेतु:स्त्रिया: ॥ ५ ॥
ज्योत्स्नेवनयनाऽऽनंद: सुरेवमदकारणं ॥
प्रभुतेवसमाकृष्ट सर्वलोकानितंबिनी ॥ ६ ॥
अथाहृन्हृदयंतथैववदनंयद्दर्पणाऽतर्गतं
भाव:पर्वतसूक्ष्ममार्गविषम:स्त्रीणांनविज्ञायते ॥
चित्तंपुष्करपत्रतोयतरलंविद्वद्भिराशंसितं
नारीनामविषांकुरैरिवलतादोषै:समंवर्धिता ॥ ७ ॥
गुणाऽऽश्रयंकीर्तियुतंचकांतं पतिंविधेयंसधनंरतिज्ञं ॥
विहायशीघ्रंवनितात्रजंति नरांतरंशीलगुणादिहीनं ॥ ८ ॥
समुद्रवीचीवचलस्वभावा: संध्याऽभ्रलेखेवमुहूर्तरागा: ॥
स्त्रियोन्हृताऽर्था:पुरुषंनिरर्थं निष्पीडितालक्तकवत्त्यजंति ॥ ९ ॥
संमोहयंतिमदयंतिविडंबयंति
निर्भर्त्सयंतिरमयंतिविषादयंति ॥
एता:प्रविश्यसदयंहृदयंनराणां
किंनामवामनयनानसमाचरंति ॥ १० ॥
नाऽमृतंनविषंकिंचि देकांमुक्तानितंबिनीं ॥
सैवाऽमृतलतारक्ता विरक्ताविषवल्लरी ॥ ११ ॥
अनेकुरितकूर्चक:सतुसितोपलाऽऽढ्यंपय:
सएवभूतकूर्चक:सलवणाऽम्लुतक्रोपम: ॥
सएवसितकूर्चक:क्वथितगुग्गुलोद्वेगकृत्

---

१ चारिण्य: २ स्वेछवृत्तय: ३ समागम: ४ प्रवास: ५ मद्यमिव. ६ चित्ता-भिप्राय: ७ पर्वतस्थसूक्ष्ममार्गवदतिकठिन: ८ कमलपत्रगतजलबिंदुवच्चंचलं. ९ तरंग: १० तात्कालिकमिवक्षणमनुरागिण्य: ११ निष्पीडितलाक्षारसरंजितकार्पासवत्. १२ अ-मृतमिव मधु: १३ खंडशर्करायुक्तदुग्धमिवसुखावह: १४ सितकूर्चकस्तुस्त्रीणांक्वथितगु-ग्गुलवदुद्वेगजनकोनकथमपिसंतोषजनकइत्यर्थ: क्वथितगुग्गुलुक्वाथवदितिवापाठ:

भवंतिहरिणीदृक्षाप्रियतमेषुमायाचायः ॥ १२ ॥
जल्पंतिसार्धमन्येन पश्यंत्यन्यंसविभ्रमं ॥
त्हृदयेचिंतयंत्यन्यं प्रियःकोनामयोषितां ॥ १३ ॥
स्त्रीणांद्विगुणआहारो लज्जाचाऽपिचतुर्गुणा ॥
साहसंषड्गुणंचैव कामश्चाऽष्टगुणःस्मृतः ॥ १४ ॥
अंतःक्रूराःसौम्यमुखा अगाधत्हृदयाःस्त्रियः ॥
अंतर्विषाबहिःसौम्या भक्ष्याविषकताइव ॥ १५ ॥
स्त्रियोहिमूलंनिधनस्यपुंसः स्त्रियोहिमूलंव्यसनस्यपुंसः ॥
स्त्रियोहिमूलंनरकस्यपुंसः स्त्रियोहिमूलंकलहस्यपुंसः ॥१६॥
कामनाम्नाकिरातेन वितताम्मूढचेतसां ॥
नार्योनरविहंगाना मंगबंधनवागुराः ॥ १७ ॥
दर्शनाद्ध्रसतेचित्तं स्पर्शनात्ग्रसतेधनं ॥
संगमाद्ग्रसतेसर्वं नारीमत्यक्षराक्षसी ॥ १८ ॥

कुलवधूवृत्तं.

श्री० ॥ यस्यभार्याशुचिर्दक्षा भर्तारमनुगामिनी ॥
नित्यंमधुरवक्त्रीच सारमोनरमारमा ॥ १ ॥
नित्यंस्नातासुगंधाच नित्यंचप्रियवादिनी ॥
अल्पभुक्मितवक्त्रीच देवतासानमानुषी ॥ २ ॥
असारभूतेसंसारे सारभूतानितंबिनी ॥
इतिसंचिंत्यवैशंभु रर्धांगेपार्वतींदधौ ॥ ३ ॥
कार्येषुमंत्रीकरणेषुदासी भोज्येषुमाताशयनेषुरंभा ॥
धर्माऽनुकूलाक्षमयाधरित्री भार्याचषाड्गुण्यवतीहदुर्लभा ॥ ४॥
यदभ्यासोगेहाद्बहिरहिफणाऽऽरोपणसमो
निजाऽऽवासादन्यद्भवनमपरद्वीपतुलितं ॥
वचोलोकाऽलभ्यंकृपणधनतुल्यंमृगदृशः

---

१ सह. (बरोबर) २ मरणस्य. ३ दुःखस्य. ४ मिळेल. ५ मस्तुताः ६ नरा-एवविहंगाःपक्षिणस्तेषां. ७ पाशाः ८ बलं. ९ पवित्रा. १० लक्ष्मीः ११ सर्पः १ स्वगृहात्.

पुमानन्यःकांताद्विधुरिवचतुर्थीसमुदितः ॥ ५ ॥
सामार्यायामियंब्रूते सपुत्रोयत्रनिर्वृतिः ॥
सन्धिर्मयंयत्रविश्वासः संदेशोयत्रजीव्यते ॥ ६ ॥
जीवतिजीवतिनाथे मृतेमृतायामुदायुतामुदिते ॥
सहजस्नेहरसाला कुलवनिताकेनतुल्यास्यात् ॥ ७ ॥
भक्तिःप्रेयसिसंश्रितेषुकरुणाश्वश्रूषुनम्रंशिरः
प्रीतिर्यालृषुगौरवंगुरुजनेक्षांतिःकृतोऽगस्यपि ॥
अम्लानाकुलयोषितांव्रतविधिःसोऽयंविधेयःपुन
मंद्भर्तुर्दयिताइतिप्रियसखीबुद्धिःसपत्नीष्वपि ॥ ८ ॥
अभ्युत्थानमुपागतेगृहपतौतद्भाषणेनम्रता
तत्पादार्पितदृष्टिरासनविधिस्तस्योपचर्यास्वयं ॥
सुप्तेतत्रशयीततत्प्रथमतोजह्याच्चशय्यामिति
प्राच्यैःपुत्रिनिवेदितःकुलवधूसिद्धांतधर्माऽऽगमः ॥ ९ ॥
लज्जावशाच्चनतमंथरदृष्टिपातं यैश्चुंबितंकुलवधूवदनाऽरविंदं ॥
तेषामनेकपुरुषव्रणिताधरेषु शक्तिःकथंभवतिवेशवधूमुखेषु ॥ १० ॥
सैवसाध्वीसुभक्तश्च सुस्नेहःसरसोज्वलः ॥
पाकःसंजायतेयस्याः करादप्युदरादपि ॥ ११ ॥
दीपदशाकुलयुवती वैदग्ध्येनैवमलिनतामेति ॥
दोषाअपिभूषायै गणिकायाःशशिकलायाश्च ॥ १२ ॥
रूपसंपन्नमग्राम्यं प्रेमप्रायंप्रियंवदं ॥
कुलीनमनुकूलंच कलत्रंकुत्रलभ्यते ॥ १३ ॥

---

१ कांतात्प्रियात्अन्यःपुमान्वरदचतुर्थ्युदितचंद्रइवदर्शनानर्हइत्यर्थः २ हर्षिते. ३ स्वाभाविकस्नेहभरिता. ४ कुलस्त्री. ५ भर्तरि. ६ आश्रितेषु. ७ जाबाइती० ८ क्षमा. ९ अपराधिनि. १० प्रफुल्लवदना. ११ (सवतीवर) १२ पूजा. १३ त्यजेत्. १४ पक्वान्न. पक्षेबालकः १५ दीपवर्तिः १६ विशेषेणदग्धाविदग्धातस्याःभावोवैदग्ध्यं-तेन. पक्षे चातुर्येण. १७ सदोषतां मलिनत्वंच १८ दूषणानि रात्रिश्च. १९ सौंदर्यपूर्ण. २० ग्राम्यनभवतीत्यग्राम्यंसद्व्यवहारचतुरं. २१ प्रेमबहुलं. २२ मधुरभाषि. २३ कुटुंबं.

असतीचरितं.

श्री० ॥ यस्यभार्याविरूपाच केश्मलाकलहमिया ॥
अधिकाऽधिकभक्षाच साजैरानजराजरा ॥ १ ॥

विवादशीलांस्वयमर्थचोरिणीं
पराऽनुकूलांबहुपाकपाकिनीं ॥
आक्रोशिनींदुर्विषहप्रकोपिनीं
त्यजंतिभार्यादशपुत्रमातरं ॥ २ ॥

भर्तायद्यपिनीतिशास्त्रनिपुणोविद्वान्कुलीनोयुवा
दाताकर्णसमःप्रसिद्धविभवःशृंगारदीक्षागुरुः ॥
स्वप्राणाऽधिककल्पितास्ववनितास्नेहेनसंलालिता
तंकांतंप्रविहायसैवयुवतीजारंपतिंवांछति ॥ ३ ॥

पतिरतीवधनीसुभगोयुवा परविलासवतीषुपराङ्मुखः ॥
शिशुरलंकुरुतेभवनंसदा तदपिसासुदतीरुदतीकुतः ॥ ४ ॥

आरोपिताशिलाया मश्मेवत्वंभवेतिमंत्रेण ॥
मयाऽपिपरिणयाऽऽपदि जारमुखंवीक्ष्यहसितैव ॥ ५ ॥

आःपाकंनकरोषिपापिनिकथंपापीत्वदीयःपिता
रंडेजल्पसिकिंतवैवजननीरंडात्वदीयास्वसा ॥
निर्गच्छत्वरितंगृहाद्बहिरितोनेदंत्वदीयंगृहं
हाहानाथममाऽद्यदेहिमरणंजारस्यभाग्योदयः ॥ ६ ॥

पाणीगृहीताऽपिपुरस्कृताऽपि स्नेहेननित्यंपरिवर्धिताऽपि ॥
परोपकारायभवेदवश्यं वृद्धस्यभार्याकरदीपिकेव ॥ ७ ॥

वयंबाल्येबालांस्तरुणिमनियूनःपरिणता
वपीच्छामोवृद्धान्परिणयविधौनःस्थितिरियं ॥
त्वयाऽऽरब्धंजन्मक्षपयितुमनेनैकपतिना
नमेगोत्रेपुत्रिक्वचिदपिसतीलांछनमभूत् ॥ ८ ॥

---

१ अमंगला. २ वृद्धत्वं. ३ उपदेशा. ४ सुदरः अथचसुष्टुमंनक्षत्रंतस्मिनूगच्छति. कुर्योगंत्यक्त्वामार्यांव्रजति. इदमेवरोदनकारणं. ५ श्वापिता ६ परिणयरूपायामापदिसं-कटे. ७ भगिनी. ८ प्रीत्यानैलेनच. ९ बाल्यावस्थायां. १० तारुण्ये. ११ वार्धक्ये. १२ इच्छाविषयानुकुर्मः

कार्येसत्यपिजातुयातिनबहिर्नांऽप्यन्यमालोकते
साध्वीरन्वनुकुर्वतीगुरुजनंश्वश्रूंचशुश्रूषते ॥
विश्रंभंकुरुतेचपत्युरधिकंमाभेनिशीथेपुन
र्निद्राणेसकलेजनेशशिमुखीनिर्यातिरंतुंविटैः ॥ ९ ॥
एषैवयांषितांधन्या शीलंचलभतेसुखं ॥
दिवापतिव्रताभूयो नक्तंचकुलटायतः ॥ १० ॥
कुलपतनंजनगर्हां बंधनमपिजीवितस्यसंदेहं ॥
अंगीकरोतिसकलं वनितापरपुरुषसंसक्ता ॥ ११ ॥

ब्रह्मैवसत्यमखिलंनहिकिंचिदस्ति
तस्मान्नमेसखिपराऽवरभेदबुद्धिः ॥
जारेतथानिजवरेसदृशोऽनुरागो
व्यर्थंकिमर्थमसतीतिकदर्थयंति ॥ १२ ॥

सखिसुखयत्येवकाशे मामःभेयानूयथातथानगृहे ॥
वातादवारितादपि भवतिगवाक्षाऽनिलःशीतः ॥ १३ ॥
नांऽबुजैर्नकुमुदैरुपमेयं स्वैरिणीनयनपंकजयुग्मं ॥
नोदयेदिनकरस्यनवेंदोःकेवलंतमसियस्यविकासः ॥ १४ ॥
तुलामारुह्यरविणा वृश्चिकेनिहितंपदं ॥
व्ययातुशिरसिन्यस्त मयत्नेनैवभोगिनां ॥ १५ ॥
आकारेणशशीगिराचपरभृत्पारावतश्चुंबने
हंसश्चंक्रमणेसमंदयितयारम्यांममत्तोगजः ॥
इत्थंभर्तरिमेसमस्तयुवतिश्लाघ्येऽपिनोरोचते
मद्भाग्येनविवाहितःपतिरिस्यान्नैकदोषोयदि ॥ १६ ॥
दृशाकिंचित्किंचित्चलितभुजलीलाविलसितैः
कराऽऽघातैःकिंचिन्नखविलिखितैःकिंचिदधिकं ॥
स्पृशंत्यःसंबाधेगुरुभिरनभिप्रेक्षितपथे
यथेष्टंचेष्टंतेस्फुटकुचतटाःपश्यकुलटाः ॥ १७ ॥

---

१ कदाचित्. २ अनुकरणंकुर्वाणा. ३ विश्वास. ४ शयाने. ५ क्रीडितुं. ६ जारैः ७ बहुत. ८ निंदां. ९ अवसरे. १० उपमातुंयोग्यं. ११ सर्पाणां. कामिनांच. १२ कोकिलः १३ गमने. १४ जनसंमर्दे. १५ व्यापारंकुर्वने. १६ स्त्रीविषयः

पर्यंकःस्रस्तरणः पतितस्तुकूलोमनोहरंसदनं ॥
तृणमिवलघुमन्यंते कामिन्यश्चौर्यरतिलुब्धाः ॥ १८ ॥
दुर्दिवसेघनतिमिरे दुःसंचारासुनगरवीथीषु ॥
पत्युर्विदेशगमने परमसुखंजघनचपलायाः ॥ १९ ॥
वर्धिद्देमेतिवेशिनिक्षणमिहाऽप्यस्मद्गृहेदास्यसि
प्रायेणाऽस्यशिशोःपितानविरसाःकौपीरपःपास्यति ॥
एकाकिन्यपियामितद्दूरमितःस्रोतस्तमालाऽऽकुलं
नीरंध्राःस्तनमालिखंतुजठरच्छेदानलग्रंथयः ॥ २० ॥
इहवटवृक्षेयक्षः प्रतिवसतिदिवाऽपियत्रभयशंका ॥
तस्मिन्नभिनववध्वा नीतावीतादयाःक्षणदाः ॥ २१ ॥

सामान्यतःपुत्रप्रशंसा.

गृहेजोनुचरःकेल्यां मुग्धस्मितमुखांऽबुजः ॥
पुत्रःपुण्यवतामेव पात्रीभवतिनेत्रयोः ॥ १ ॥
स्वगर्भशुक्तिनिर्भिन्नं सुवृत्तंसुतमौक्तिकं ॥
वंशश्रीतिलकीभूतं मंदभाग्यस्यदुर्लभं ॥ २ ॥
वर्धतेनचिरंलोके वंशलक्ष्मीरसंतातः ॥
स्वल्पाऽवशेषितस्नेह वर्तिमालेवदीपिका ॥ ३ ॥
अंतःकरणतत्त्वस्य दंपत्योःस्नेहसंश्रयात् ॥
आनंदग्रंथिरेकोय मपत्यमितिकथ्यते ॥ ४ ॥
आनंदस्रुतिरात्मनोनयनयोरंतःसुधाऽभ्यंजनं
प्रस्तारःप्रणयस्यमन्मथतरोःपुष्पंप्रसादोरतेः ॥
आलानंहृदयद्विपस्यविषयाऽरण्येषुसंचारिणो
दंपत्योरिहलभ्यतेसुकृततःसंसारसारःसुतः ॥ ५ ॥
दिग्वाससंगतव्रीडं जटिलंधुलिधूसरं ॥
पुण्याऽधिकाहिपश्यंति गंगाधरमिवाऽऽत्मजं ॥ ६ ॥
देरोरुहाद्गुद्गमितैःपयोभि रापूर्यकेल्यानिजमास्यगर्भे ॥

---

१ दुर्दिनं. २ (वेजारीण्ह०) ३ कूपसंबंधिनीः ४ राज्यः ५ आनुम्नाबाली-
निम्ना०रिंगमाणइत्यर्थः ६ संततिरहिता. ७ बंधनस्तंभः ८ मग्नं. ९ स्तनात्.

फूत्कृत्यमातुर्वदनेंदुसंतं तनूभवंभ्यपतिकोऽपिधन्यः ॥ ७ ॥
कृतचंक्रमणमंगणेपुकिंचि त्कणत्कंकिकिणीरणदंघ्रियुग्मं ॥
यदिसम्यग्हितंसुतंभितंस्या त्तदिदंसत्यहितंभवेत्तदानीं ॥ ८ ॥
अहंकिमंबाकिमभीष्टतापदे तवेतिमातुर्धुरितानुपृच्छया ॥
प्रलोभ्यतुल्यंभवदंतमर्भकं मुदाहसन्तुजिघ्रतिमूर्ध्निपुण्यभाक् ॥ ९ ॥
निपतंतेपितृभिस्तस्मै निरपत्यधनःपुमान् ॥
अध्वनीनैरतिश्राति रवेकशीवपादपः ॥ १० ॥

सत्पुत्रप्रशंसा.

एकोऽपिगुणवानपुत्रो निर्गुणैःकिंशतेनतैः ॥
एकश्चंद्रोजगच्चक्षु र्नक्षत्रैःकिंप्रयोजनं ॥ १ ॥
एकेनहिसुवृक्षेण पुष्पितेनसुगंधिना ॥
वासितंतद्वनंसर्वं सुपुत्रेणकुलंयथा ॥ २ ॥
पात्रंनतापयतिनैवमलंप्रसूते
स्नेहंनसंहरतिनैवगुणानक्षिणोति ॥
द्रव्याऽवसानसमयेचलतांनधत्ते
सत्पुत्रएवकुलसद्मनिकोऽपिदीपः ॥ ३ ॥
प्रज्ञयावाविसारिण्या योबलेनधनेनवा ॥
धुरंवहतिगोत्रस्य जननीतेनपुत्रिणी ॥ ४ ॥
सजातोयेनजातेन यातिवंशःसमुन्नतिं ॥
परिवर्तिनिसंसारे मृतःकोवानजायते ॥ ५ ॥
विद्याविहीनाबहवोऽपिपुत्राः कल्पायुषःसंतुपितुःकिमेतैः ॥
क्षयिष्णुनावाऽपिकलावतावा तस्यप्रमोदःशशिनेवसिंधोः ॥ ६ ॥
किंमृष्टंसुतवचनं पुनरपिमृष्टंतदेवसुतवचनं ॥
मृष्टान्मृष्टतरंकिं श्रुतिपरिपक्वंतदेवसुतवचनं ॥ ७ ॥
एकेनाऽपिसुपुत्रेण विद्यायुक्तेनभासते ॥

---

१ माता, २ इष्टस्थाने, ३ प्रलोभ्यस्यप्रलोभनार्थंदर्शितस्यवस्तुनोऽनुरूपं, ४ अवज्ञानंकरोति, ५ पथिः ६ वंध्यः ७ कुलमेवसद्मगृहंतस्मिन्, ८ प्रसरणशीलया, ९ कार्यभारं. १० भ्रमणशीले, ११ नाशशीलेन, १२ कलापूर्णेन, १३ चंद्रेण, १४ मधुरं.

कुपु[illegible]द्वेषी ॥ ८ ॥
अजातमृतमूर्खाणां वरमाद्यौनचाऽतिमः ॥
सकृदुःखकरावाद्या वंतिमस्तुपदेपदे ॥ ९ ॥
वरंगर्भस्रावोवरमपिचनैवाऽभिगमनं
वरंजातःप्रेतोवरमपिचकन्याविजनिता ॥
वरंवंध्याभार्यावरमपिचगर्भेषुवसति
र्नचाऽविद्वान्रूपद्रविणगुणयुक्तोऽपितनयः ॥ १० ॥

कुपुत्रनिंदा.

किंतेनजातुजातेन मातृयौवनहारिणा ॥
आरोहतिनयःस्वस्य वंशस्याऽग्रेध्वजोयथा ॥ १ ॥
किंतयाक्रियतेधेन्वा यानदोग्ध्रीनगर्भिणी ॥
कोऽर्थःपुत्रेणजातेन योनविद्वान्नधार्मिकः ॥ २ ॥
एकेनशुष्कवृक्षेण दह्यमानेनवन्हिना ॥
दह्यतेतद्वनंसर्वं कुपुत्रेणकुलंतथा ॥ ३ ॥
कोटरांतःस्थितोवन्हि स्तरुमेकंदहेत्खलु ॥
कुपुत्रस्तुकुलेजातः स्वकुलंनाशयत्यहो ॥ ४ ॥
अजातमृतमूर्खेभ्यो मृताऽजातौसुतौवरौ ॥
यतस्तावल्पदुःखाय यावज्जीवंजडोदहेत् ॥ ५ ॥
यस्यपुत्रोनवैविद्वान् नशूरोनचधार्मिकः ॥
अप्रकाशंकुलंतस्य नष्टचंद्रेवशर्वरी ॥ ६ ॥
अविनीतःसुतोजातः कथंनदहनात्मकः ॥
विनीतस्तुसुतोजातः कथंनपुरुषोत्तमः ॥ ७ ॥

---

१ कुलनाशेन. २ रात्रिः ३ कदाचित्. ४ यौवननाशकेन. ५ दोहनशीला. ६ को-टरिलोके. ७ प्रकाशरहितं.

राज राजनीति राजाश्रयादयः

श्री० ॥ राजानंप्रथमंविंदे ततोभार्यांततोधनं ॥
राजन्यसतिलोकेऽस्मिन् कुतोभार्याकुतोधनं ॥ १ ॥
पर्जन्यइवभूतानामाधारःपृथिवीपतिः ॥
विकलेऽपिहिपर्जन्ये जीव्यतेनतुभूपतौ ॥ २ ॥
यःकुलाऽभिजनाऽऽचारै रतिशुद्धःप्रतापवान् ॥
धार्मिकोनीतिकुशलः सस्वामीयुज्यतेभुवि ॥ ३ ॥
कथंनामनसेव्यंते यत्नतःपरमेश्वराः ॥
अचिरेणैवयेतुष्टाः पूरयंतिमनोरथान् ॥ ४ ॥
सुन्हृदामुपकारकारणात् द्विषतामप्यपकारकारणात् ॥
नृपसंश्रयइष्यतेबुधै र्जठरंकोनविभर्तिकेवलं ॥ ५ ॥
बालोऽपिनाऽवमंतव्यो मनुष्यइतिभूमिपः ॥
महतीदेवताह्येषा नररूपेणतिष्ठति ॥ ६ ॥
यस्यप्रसादेपद्माऽऽस्ते विजयश्चपराक्रमे ॥
मृत्युश्चवसतिक्रोधे सर्वतेजोमयोहिसः ॥ ७ ॥
यस्मिन्नेवाऽधिकंचक्षु रारोहयतिपार्थिवः ॥
सुतेऽमात्येऽप्युदासीने सलक्ष्म्याऽऽश्रीयतेजनः ॥ ८ ॥
राजन्दुधुक्षसियदिक्षितिधेनुमेतां
तेनाऽद्यवत्समिवलोकममुंपुषाण ॥
तस्मिंश्चसम्यगनिशंपरितुष्यमाणे
नानाफलैःफलतिकल्पलतेवभूमिः ॥ ९ ॥
सत्याऽनृताचपरुषाप्रियवादिनीच
हिंस्रादयालुरपिचाऽर्थपरावदान्या ॥
नित्यव्ययाप्रचुरनित्यधनाऽऽगमाच
वेश्यांगनेवनृपनीतिरनेकरूपा ॥ १० ॥
आज्ञाकीर्तिःपालनंब्राह्मणानां दानंभोगोमित्रसंरक्षणंच ॥
येषामेतेषड्गुणानप्रवृत्ताः कोऽर्थस्तेषांपार्थिवोपाश्रयेण ॥ ११ ॥

---

१ दोहनंकर्तुमिच्छासि. २ पोषणंकुरु. ३ कर्कशा. ४ घातुका. ५ दानशौंडा.

नकश्चिचंडकोपाका यात्यौकोकामभूभुजां ॥
होतारमपिजुव्हानं स्पृष्टोदहतिपावकः ॥ १२ ॥
राजंस्त्वद्दर्शनेनैव गच्छंतिवीजितत्त्वमात् ॥
रिपोःसर्वांकवेर्षैन्यं नीवीबंधोमृगीदृशां ॥ १३ ॥
वसुधाराज्यलाभेन यस्तोषस्तवभूपते ॥
वसुधाराऽऽक्यलाभेन संतोषोममभूपते ॥ १४ ॥
राजसेवामनुष्याणा मसिधाराऽवलेहनं ॥
पंचाननपरिष्वंगो व्यालीवदनचुंबनं ॥ १५ ॥
इच्छेद्यस्तुसुखंनिवस्तुमवनौगच्छेत्सराज्ञःसभां
कल्याणींगिरमेवसंसदिवदेत्कार्यंविदध्यात्कृती ॥
अक्लेशात्धनमर्जयेदधिपतेरावर्जयेद्वल्लभान्
कुर्वीतोपकृतिजनस्यजनयेत्कस्याऽपिनाऽपंक्रियां ॥ १६ ॥
अयुक्तंयुक्तंवायदभिहितमज्ञेनविभुना
स्तुयादेतन्नित्यंजडमपिगुरुंतस्यविनुयात् ॥
विवस्तुनैस्पृष्टंकथमपिसभायामभिनये
त्स्वकार्यसंतुष्टेक्षितिभृतिरहस्येवकथयेत् ॥ १७ ॥
सित्ध्यंतिकर्मसुमहत्स्वपियन्नियोज्याः
संभावनागुणमवेहितमीश्वराणां ॥
किमाऽभविष्यदरुणस्तमसांवधाय
तंचेत्सहस्रकिरणोधुरिनाऽकरिष्यत् ॥ १८ ॥
आलोकांतप्रतिहततमोवृत्तिरासांप्रजानां
तुल्योद्योगस्तवचसवितुश्चाऽधिकारोमतोनः ॥
तिष्ठत्येकःक्षणमधिपतिर्ज्योतिषांव्योममध्ये
षष्टेकालेत्वमपिलभसेदेवविश्रांतिमह्नः ॥ १९ ॥

---

१ होमकर्तारं. २ घृतं. ३ खड्गधारा. ४ सिंहालिंगनं. ५ सर्पिणी. ६ पृथिव्या. ७ मनोज्ञां. ८ सभायां. ९ प्रियान्. १० अपकारं, ११ उक्तं, १२ तद्गुरोःस्तवनंकुर्यान्, १३ निस्पृहता. १४ अभिनयपूर्वकंदर्शयेत्. १५ एकांते. १६ भृत्याः १७ राज्ञां. १८ सूर्यकरादिः १९ सूर्यः २० लोकालोकपर्वतपर्यंतं. २१ दिनस्य

भुजंगभोगसंक्रांता कलत्रंतवमेदिनी ॥
अहंकारःपरांकोटि मारोहतिकुतस्तव ॥ २० ॥
अचिराऽधिष्ठितराज्यः शत्रुःप्रकृतिष्वरूढमूलत्वात् ॥
नवसंरोपणशिथिल स्तरुरिवसुकरःसमुद्धर्तुं ॥ २१ ॥
समतिवंधकार्यं प्रभुर्गंधगंतुंसहायवानेव ॥
दृश्यंतमसिनपश्यति दीपेनविनासचक्षुरपि ॥ २२ ॥
भोगिनःकंचुकाऽऽसक्ताः क्रूराःकुटिलगामिनः ॥
सुदुष्टामंत्रसाध्याश्च राजानःपन्नगाइव ॥ २३ ॥
उत्खातान्प्रतिरोपयन्कुसुमितांश्चिन्वन्लघून्वर्धय
न्नत्युच्चान्नमयन्नतान्समुदयन्विश्लेषयन्संहतान् ॥
क्रूरान्कंटकिनोबहिर्निरसयन्म्लानान्पुनःसेचयन्
मालाकारइवप्रपंचचतुरोराजाचिरंनंदति ॥ २४ ॥
अकस्माद्द्वेष्टियोभक्त माजन्मपरिसेवितं ॥
नऽभ्यंजनैरुचिर्यस्य त्याज्योनृपइवाऽऽतुरः ॥ २५ ॥

राजस्तुतिः

सर्पामांऽगणमागतेनभवताचापेसमारोपिते
देवाऽऽकर्णययेनयेनसहसायद्यत्समासादितं ॥
कोदंडेनशराःशरैररिशिरस्तेनाऽपिभूमंडलं
तेनत्वंभवताचकीर्तिरतुलाकीर्त्याचलोकत्रय ॥ १ ॥
अंतर्विष्णोस्त्रिलोकीनिवसतिफणिनामीश्वरेसोऽपिशेते
सिंधोःसोऽप्येकदेशेनमपिचलकयांकुंभयोनिश्चकार ॥
धत्तेवैद्योतलीलामयमपिनभसिश्रोत्रसिद्धक्षितींद्र
त्वत्कीर्तेःकर्णनीलोत्पलमिदमपिचप्रेक्षणीयंविभाति ॥ २ ॥
अपायिमनिनापुरापुनरमोयिमर्यादया

१ सेषःपक्षेजारः २ मार्या. ३ विलासिनःभोगवन्त्य. ४ कवचं पक्षे (कोन) ५ विचारः (मसलत) पक्षे शाबरादिः ६ सर्पाइव. ७ सेवकंओदनंच. ८ शुद्धभूमि. ९ धनुषि. १० सकीकृते. ११ विष्णोरुदरे. १२ शेषे. १३ ज्योतिरिंगणः (काजवाहिलो.) १४ पीतः १५ मितः

अंतारिकैमिनापुनपुनस्दाहिल्कारिणा ॥
अंमंथिमुरवैरिणापुनर्वांचिकंकारिणा
कनामवसुधापतेनवयशोंऽबुधिःकांऽबुधिः ॥ २ ॥
अस्यक्षोणिपतेःपरार्धपरयालक्षीकृताःसंख्यया
मंज्ञाचक्षुरवेक्ष्यमाणबधिरआख्याःकिलाऽकीर्तयः ॥
गीयंतेस्वरमष्टमंकलयताजातेनवंध्योदरा
न्मूकानांमकरेणकूर्मरमणीदुग्धोदधेरोधसि ॥ ४ ॥
द्वारंखङ्गिभिरावृतंबहिरपिमस्विन्नगंडैर्गजै
रंतःकंचुकिभिःस्फुरन्मणिधरैरध्यासिताभूमयः ॥
आक्रांतंमहिषीभिरेवशयनंत्वद्विद्विषांमंदिरे
राजन्नैवचिरंतनमर्णायनीशून्येऽपिराज्यस्थितिः ॥ ५ ॥
त्वंद्वित्राणिपदानिगच्छसिमहीमुल्लंघ्ययांतिद्विष
स्त्वंबाणानदशपंचमुंचसिपरेसर्वाणिशस्त्राण्यपि ॥
तेदेवीपतयस्त्वदस्त्रनिहतास्त्वंमानुषीणांपति
र्निदातेषुकथस्तुतिस्तवकथंश्रीकर्णनिर्णीयतां ॥ ६ ॥
कीर्तिस्तवक्षितिपयातिभुजंगगेहे मातंगसंगमकरीचदिगंतरेषु ॥
स्पत्कांऽबरंव्रजतिनंदनमप्यैकंपं किंकिंकरोतिनर्निरर्गलतांगतास्त्री ॥ ७ ॥

मदनवर्णनं.

श्री० ॥ शंभुस्वयंभुहरयोहरिणेक्षणानां
येनाऽक्रियंतसततंगृहकर्मदासाः ॥
वाचामगोचरचरित्रविचित्रिताय
तस्मैनमोभगवतेकुसुमाऽऽयुधाय ॥ १ ॥

---

१ तीर्णः २ मारुतिना, ३ मथितः ४ बद्धः ५ अंधः इयंमिथ्याप्रबसितिः अनेनराज्ञःअकीर्तिरेवनास्तीतिसूचितं, ६ खड्गधारिभिःगंडकैश्च (गेंडइतिलो०) ७ सर्पैश्च द्वारपालैश्च. ८ पट्टाभिषिक्तस्त्रीभिः ९ वैरिणः १० देवांगनास्वामिनः ११ पाताले, आरण्येच. १२ दिक्करिसमागमकर्ता. अंत्यजसंगकरीच, १३ वस्त्रं. आकाशंच, १४ नंदनवनं. पुत्रंच, १५ निर्भयं, १६ निष्प्रतिबंधत्व, १७ स्त्रीणां. १८ गृहकर्मकरादासाः १९ मदनाय.

नूनमपाङ्गकरवाल्याः सुभ्रुवो मकरध्वज ॥
यतस्त्वमेवंसंचार छुरितेषु प्रवर्तसे ॥ २ ॥
नगम्योमंत्राणांनचभवतिभैषज्यविषयो
नचाऽपिप्रध्वंसंव्रजतिविविधैःशांतिकशतैः ॥
भ्रमाऽऽवेशादंगेकिमपिविदधद्भंग्यमसमं
स्मराऽपस्मारोऽयंभ्रमयतिदृशंघूर्णयतिच ॥ ३ ॥
अनंगेनाऽबलासंगा ज्जितायेनजगत्त्रयी ॥
सचित्रचरितःकामः सर्वकामप्रदोऽस्तुवः ॥ ४ ॥
कुलगुरुरबलानांकेलिदीक्षाप्रबंधे
परमसुहृदनंगोरोहिणीवल्लभस्य ॥
अपिकुसुमपृषत्कैर्देवदेवस्यजेता
जयतिसुरतलीलानाटिकासूत्रधारः ॥ ५ ॥
अद्याऽपिनूनंहरकोपवन्हि
स्त्वयिज्वलत्यौर्वइवांऽबुराशौ ॥
त्वमन्यथामन्मथमद्विधानां
भस्माऽवशेषःकथमेवमुष्णः ॥ ६ ॥
तवकुसुमशरत्वंशीतरश्मित्वमिंदो
र्द्वयमिदमयथार्थंदृश्यतेमद्विधेषु ॥
विसृजतिहिमगर्भैरग्निमिंदुर्मयूखै
स्त्वमपिकुसुमबाणान्वज्रसारीकरोषि ॥ ७ ॥
स्तोकाऽस्त्रसाधनवताभवतामनोज
स्वैरंजगज्जितमनंगतयाऽपिसर्वं ॥
स्याच्चेद्भवान्बहुशरःप्रतिलब्धगात्रः
कुर्यास्ततोयदपिकर्मकियन्नजाने ॥ ८ ॥
एकंवस्तुद्विधाकर्तुं बहवःसंतिधन्विनः ॥
धन्वीसमारएवैको द्वयोरैक्यंकरोतियः ॥ ९ ॥

---

१ नेत्रकटाक्षपातेनसूचितेषु. २ औषधोपायसाध्यः ३ नाशं. ४ भूतोन्मादरोग-विशेषः ५ पुष्पबाणैः ६ वडवाग्निः ७ समुद्रे. ८ असत्यं. ९ वज्रवत्कठिनान्करोषि. १० अल्पानि. ११ मदन. १२ स्वेच्छया.

नकश्रीरंत्रवातीकथ मापुर्धपुन्नधन्वनः ॥
तथाऽपिजितमेवाऽऽसी दमुनाभुवनत्रयं ॥ १० ॥
त्वद्दयतृणकुटीरैदीप्यमानेस्मराऽमा
वुषितमनुचितंवावेत्तिनोपंडितोऽपि ॥
किमुकुवलयनेत्राःसंतिनोनाकनार्यं
स्त्रिदशपतिरहल्यांतापसीयःसिषेवे ॥ ११ ॥
शिवशिवहिशिवेनपुष्पधन्वा मलयनटेनकिमित्यकारिभस्म ॥
सहिपुनरहेदितश्छलायलोके सतुमणिमंत्रमहौषधैरसाध्यः ॥ १२ ॥

पांथोक्तिप्रत्युक्तयः

श्री० ॥ भोपांथपुस्तकधरक्षणमत्रतिष्ठ
वैद्योऽसिकिंगणितशास्त्रविशारदोऽसि ॥
केनौषधेनममपश्यतिभर्तुरंबा
किंवाऽऽगमिष्यतिपतिःसुचिरप्रवासी ॥ १ ॥
कस्येयंतरुणिप्रपापथिकनःकिंपीयतेऽस्यांपयो
धेनूनामथमाहिषंबधिरेवीरःकथंमंगलः ॥
सोमोवाऽथशनैश्चरोऽमृतमिदंतत्तेऽधरेदृश्यते
श्रीमत्पांथविलाससुंदरसखेयद्रोचतेतत्पिब ॥ २ ॥
कामिनीकायकांतारे कुचपर्वतदुर्गमे ॥
मासंचरमनःपांथ तत्राऽऽस्तेस्मरतस्करः ॥ ३ ॥
वाणिज्येनगतःसमेगृहपतिर्वार्ताऽपिनश्रूयते
प्रातस्तज्जननीप्रसूततनयाजामातृगेहंगता ॥

---

१ त्वद्दयमेवतृणकुटीरंतृणगृहं. २ इंद्रः ३ मलयकालिकोनर्तकःशिवइतिभावत् ४ हतः ५ उत्पन्नः ६ छलंकर्तुं. ७ अचिकित्स्यः ८ कस्तेपुस्तकधारिणंपांथप्रतिकस्याश्चित्कामिन्याःस्वाभिप्रायसूचिकोक्तिः औषधप्रश्नेनश्वश्रूअंधत्वंसूचितं प्रोषितस्यपत्युःकदाआगमनंभविष्यतीतिप्रश्नेनसोऽपिगृहेनाऽस्तीतिसूचितं. ९ कस्येति इयंछलोक्तिः १० पानीयशालिका ११ पयोजलंक्षीरंच १२ जलानि सोमादिवासरश्च. १३ उत्कंपापूर्वक. १४ कामिन्याःकायएवदुर्गमोमार्गस्तस्मिन्. १५ कुचावेवपर्वतौताभ्यांदुर्लंघ्ये. १६ मनएवपांथ. १७ स्मरएवतस्करःतत्राऽऽस्तेअतोमासंचारंकुर्वितिमामसंप्रतिबोधः १८ वाणिज्यार्थंपरदेशंगतः १९ भर्ता.

बालाऽहंनवयौवनानिशिकथंस्थातव्यमस्मिन्गृहे
सायंसंप्रतिवर्ततेपथिककहेस्थानांतरंगम्यतां ॥ ४ ॥
यामिन्येषाबहुलजलदैर्भीमभीमांऽधकारा
निद्रांयातोममपतिरसौक्लेशितःकर्मदुःखैः ॥
बालाचाऽहंमनसिजभयात्मामगाढमकंपा
ग्रामश्चौरैरयमुपहृतःपांथनिद्रांजहीहि ॥ ५ ॥
भवनमिवमदीयंनिर्जनंपांथपंथाः
कुसुमशरइवाऽस्मिंस्तस्कराद्दुर्निवाराः ॥
गृहपइवपतंगोऽप्येषयातोदिगंतान्
मदनसुभगभूयोनैवगंतुंसमीहे ॥ ६ ॥
रेपांथकुतोभवान्नगरतोवार्तानचाऽपिश्रुता
बांब्रूहियुवापयोदसमयेहित्वाप्रियांजीवति ॥
सत्यंजीवतिजीवतीतिकथितावार्तामयाऽपिश्रुता
विस्तीर्णापृथिवीजनोऽपिविविधःकिंकिंनसंभाव्यते ॥ ७ ॥
शून्यंवेश्मचिरायितोगृहपतिर्जाताऽधुनाशर्वरी
स्थातुंनोचितमध्वगच्छनिभृतंलोकैरनालक्षितः ॥
इत्थंलोलदृशाप्रसाध्वभिहितोदासीजनेनाऽध्वगः
स्थित्वाकिंचिदिवक्कयामिरजनीमामेत्युदीर्यस्थितः ॥ ८ ॥
ग्रामेऽस्मिन्प्रस्तरे[12]माये नांकिंचित्पांथविद्यते ॥
पयोधरोन्नतिंदृष्ट्वा वस्तुमिच्छसिचेद्वस ॥ ९ ॥
पांथमंदमतेकिंवा संतापमनुविंदसि ॥
पयोधरसमंशाल्व येनशांतिरवाप्नुयात् ॥ १० ॥
त्वमिवपथिकप्रियोमे विटपिस्तोमेषुगमयतिक्लेशान् ॥
किमितोऽन्यत्कुशलंमे संप्रतियत्पांथजीवामि ॥ ११ ॥

१ रात्रिः २ भयंकरगाढांधकारा. ३ कर्मजन्यैर्दुःखैःश्रांतस्त्वर्थः ४ उक्तैर्हेतुभिर्मनसिजाद्भयद्वयतस्मात् अभयकामभयात्. ५ गृहस्वामिव. ६ सूर्यः ७ सत्यं. ८ वर्षाकाले. ९ चिरकालदूरगत. १० अदृष्टः ११ उत्का. १२ पाषाणमये. १३ पयोधराणामिवानां पक्षे स्तनयोरुन्नतिं. १४ मेघस्तनय. १५ सम्यकूमार्गेलांकुरु. १६ कांतः १७ वृक्षसमूहेषु.

किमितिकृशाऽसिकृशोदरि किंतवपरकीयवृत्तांतैः ॥
कथयतथाऽपिमुदेमम कथयिष्यतिपांथतवजाया ॥ १२ ॥
यथोर्ध्वाक्षःपिबत्यंबु पथिकोविरलांऽगुलिः ॥
तथाप्रपापालिकाऽपि धारांवितनुतेतनुं ॥ १३ ॥
भोपांथत्वरितोऽसितिष्ठनिमिषंकिंचिद्वदामोवयं
मार्गोऽयंपुरतोद्विधाखलुभवेद्वामेननोगम्यतां ॥
तत्राऽऽस्तेसहकारकोमलतरोर्मूलेप्रपापालिका
तस्यालोचनवागुरानिपतितोनत्वंपुनर्यास्यसि ॥ १४ ॥

कामातुरः

असुलभासकलेंदुमुखीचसा किमपिचेदमनंगविचेष्टितं ॥
अभिमुखीष्विववांछितासिद्धिषु व्रजतिनिर्वृत्तिमेकपदेमनः ॥१॥
अपराधीनूनमहं प्रसीदरंभोरुविरमसंरंभात् ॥
सेव्योजनश्चकुपितः कथंनुदासोनिरपराधः ॥ २ ॥
कदाकांताऽगारेपरिमलमिलत्पुष्पशयने
शयानःश्यामायाःकुचयुगमहंवक्षसिवहन् ॥
अयेस्निग्धेमुग्धेचपलनयनेचंद्रवदने
प्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान् ॥ ३ ॥

विरहिजनोक्तिः

श्री ॥ चंद्रश्चंडकरायतेमृदुगतिर्वातोऽपिवज्रायते
माल्यंसूचिकुलायतेमलयजाऽऽलेपःस्फुलिंगायते ॥
रात्रिःकल्पशतायतेविधिवशात्प्राणोऽपिभारायते
हाहंतप्रमदावियोगसमयःसंहारकालायते ॥ १ ॥

---

१ ईर्षाया. २ वामभागेन. ३ लोचनमेववागुरामृगबंधिनी जालमित्यर्थः ४ इष्टसिद्धिषु. ५ संतोष. ६ कोपात्. ७ चंडकरःसूर्यस्तद्वदाचरति. ८ (सुई इतिलो॰) ९ चंदनलेपः १० अग्निकणइवाचरति. ११ सहस्रकल्पमिवेवाचरति.

तारापतेकुमुद्विनीमनुकूलकांतां
पादेनपीडयसिकंपयसिद्विजातीन ॥
विद्वेषमाचरसिकिंचवियोगिलोके
नक्तंचरस्यभवतःकरुणाकुतःस्यात् ॥ २ ॥
भोरोहिणित्वमसिरात्रिचरस्यभार्या
एनंनिवारयपतिंसखिदुर्निवारं ॥
जालांतरेणममसद्मनिसन्निविष्टः
श्रोणीतटंस्पृशतिकिंकुलधर्मएषः ॥ ३ ॥
जटानेयंवेणीकृतकचकलापोनगरलं
गलेकस्तूरीयंशिरसिशशिरेखानकुसुमं ॥
इयंभूतिर्नाऽगेप्रियविरहजन्माधवलिमा
पुरारातिभ्रांत्याकुसुमशरकिंमांव्यथयसि ॥ ४ ॥
रेरेनिर्दयदुर्निवारमदनप्रोत्फुल्लपंकेरुहं
बाणंसंवृणुसंवृणुत्यजधनुःकिंपौरुषंमांप्रति ॥
कांतासंगवियोगदुःखदहनज्वालाऽवलीढंवपुः
शूराणांमृतमारणेनहिपुराधर्मःप्रयुक्तोबुधैः ॥ ५ ॥
आस्वाद्यनिर्विशेषं विरहिवधूनांमृदूनिमांसानि ॥
करंकामिषेणमन्ये निष्ठीवतिनीरदोऽस्थीनि ॥ ६ ॥
परिम्लानंपीनस्तनजघनसंगादुभयत
स्तनोर्मध्यस्यांऽतःपरिमिलनमप्राप्यहरितं ॥
इदंव्यस्तन्यासंश्लथभुजाऽऽक्षेपचलनैः
कृशांग्याःसंतापंवदतिनलिनीपत्रशयनं ॥ ७ ॥
आदातुंमकरंदीक्षितेऽपिकुसुमेहस्ताऽग्रमालोहितं
लाक्षारंजनवार्तयाऽपिसहसारक्तंतलंपादयोः ॥
अंगानामनुलेपनस्मरणमप्यत्यंतखेदाऽऽवहं

---

१ पक्षिणः पक्षे ब्राह्मणान्. २ रात्रिचरस्य. पक्षे राक्षसस्य. ३ विषं. ४ भस्म. ५ पांडुरता. ६ शिवभ्रांत्या. ७ निष्करुण. ८ विकसितं. ९ उपसंहर. १० (शार्दूलवि०) ११ मेघः निर्गताःरदाःदंताअस्य. दंतानामभावादस्थिचर्वणासमर्थःसंस्त्यजतीतिभावः १२ हरिद्वर्णं. १३ शय्या.

हंताऽधीरदृशः किमन्यदलकाऽऽमोदोऽपि भारायते ॥ ८ ॥

अयं रेवाकुंजः कुसुमशरसेवासमुचितः
समीरोऽयं वेलानवविदलदेलापरिमलः ॥
इयं प्रावृड्धन्या नवजलदविन्यासचतुरा
पराधीनं चेतः सखि किमपि कर्तुं मृगयते ॥ ९ ॥

अंगाऽऽसंगि मृणालकांडमयते भृंगाऽऽवलीनां रुचं
नासामौक्तिकमिंद्रनीलसरणिं श्वासाऽनिलाद्धाहते ॥
क्षिप्रा साहिमवालुकाऽपि कुचयोर्धत्ते क्षणं दीपतां
तं प्राऽयः पतितांऽबुवत्करतले धाराऽम्बु संलीयते ॥ १० ॥

यत्त्वन्नेत्रसमानकांतिसलिले मग्नं तदिंदीवरं
मेघैरंतरितः प्रिये तव मुखच्छायाऽनुकारी शशी ॥
येऽपि त्वद्गमनाऽनुसारिगतयस्ते राजहंसा गता
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥ ११ ॥

बकुलमालिकयाऽपि मया न सा तनुरभूषि तदंतरभीरुणा ॥
तदधुना विधिना कथमावयोर्गिरिदरीनगरीशतमंतरं ॥ १२ ॥

यस्य कांताऽस्ति दूरस्था नैवापीनपयोधरा ॥
तस्य तापस्य शांत्यर्थं न वापी न पयोधराः ॥ १३ ॥

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुरः ॥
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गंतव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्सृज्यते ॥ १४ ॥

स्वयमप्राप्तदुःखोऽयः संदुनोति न विस्मयः ॥
त्वं स्मरप्राप्तदाहोऽपि दहसीति किमुच्यते ॥ १५ ॥

हारो नाऽऽरोपितः कंठे मया विश्लेषभीरुणा ॥
इदानीमंतरे जाताः पर्वताः सरितो द्रुमाः ॥ १६ ॥

---

१ चंचलदृशः २ केशरंजनचूर्णं. ३ नर्मदा. ४ लतागृहं. ५ बिसखंडं. ६ प्राप्नोति. ७ भृंगपंक्तीनां. ८ कांतिं. ९ कर्पूरः १० मसलोहपतितजलवत्. ११ छादितः १२ मर्दिता. १३ पुष्पस्तनी १४ (विहारहतिलो०) १५ मेघाः १६ कंकणैः १७ नेत्रोदकैः १८ निरंतरं. १९ उपवेशनं कृतं. २० निश्चितं, २१ तापयति. २२ वियोगः

विरमतविरमतसख्यो नलिनीदलतालवृंतपवनेन ॥
त्वद्दृपगतोयंवन्हि र्झटितिकदापिकव्यक्त्येव ॥ १७ ॥
बिभेमिसखिसंवीक्ष्य भ्रमरीभूतकीटकं ॥
यत्ध्यानादागतेपुंस्त्वे तेनसार्धंरतिःकथं ॥ १८ ॥
याःपश्यंतिप्रियंस्वप्ने धन्यास्ताःसखियोषितः ॥
अस्माकंतुगतेकांते गतानिद्राऽपिवैरिणी ॥ १९ ॥

यदिप्रियाविय़ोगेऽपि रुदनेदीनदीनकं ॥
तदिदंदग्धमरण मुपयोगंकयास्यति ॥ २० ॥
दिव्यचक्षुरहंजातः सरागेणाऽपिचक्षुषा ॥
इहस्थोयेनपश्यामि देशांतरगतांप्रियां ॥ २१ ॥

नूनमयंमेपापः कांताविरहोरसायनीभूतः ॥
वर्षसहस्राऽभ्यधिका न्नयामिकथमन्यथादिवसान् ॥२२॥
केशैःकेसरमालिकामपिचिरंयाबिभ्रतीखिद्यते
यागात्रेषुघनांविलेपनमपिन्यस्तंनसोढुंक्षमा ॥
दीपस्याऽपिशिखांनवास्वभवनेशक्नोतियावीक्षितुं
तापंसाविरहाऽनलस्यमहतःसोढुंकथंशक्ष्यति ॥ २३ ॥
अपसरतिनचक्षुषोमृगाक्षी
रजनिरियंचनयातिनैतिनिद्रा ॥
प्रहरतिमदनोऽपिदुःखितानां
बतबहुशोऽभिमुखोभवंत्यपायाः ॥ २४ ॥
त्वदिविलसितोहारोनाऽयंभुजंगमनायकः
कुवलयदलश्रेणीकंठेनसागरलद्युतिः ॥
मलयजरजोनेदंभस्मप्रियारहितेमयि
प्रहरनहरभ्रांत्याऽनंगक्रुधाकिमुधावसि ॥ २५ ॥
पाणौमाकुरुचूतसायकममुंमाचापमारोपय
क्रीडानिर्जितविश्वमूर्छितजनाऽऽघातेनाकिंपौरुषं ॥
तस्याएवमृगीदृशोमनसिजप्रेंखत्कटाक्षाऽनल

१ विरामंकुरुत. २ रोदनंक्रियते. ३ अतींद्रियज्ञानवान्. ४ जीवनसाधकरसाय-नरूपोजातः ५ बकुलमालिका. ६ वासुकिः

श्रेणीजर्जरितंमनागपिमनोनाऽद्याऽपिसंधुक्षते ॥ २६ ॥
पादांऽगुष्ठेनभूमिंकिसलयरुचिनासाऽपदेशंलिखंती
भूयोभूयःक्षिपंतीमयिसितशबलेलोचनेलोलतारे ॥
वक्त्रंह्रीनम्रमीषत्स्फुरदधरपुटंवाक्यगर्भंदधाना
यन्मांनोवाचकिंचित्स्थितमपिपुरतोमानसंतद्दुनोति ॥ २७ ॥
व्रीडायोगान्नतमुखतयासन्निधानेगुरूणां
बद्धोत्कंपस्तनकलशयोर्मन्युमंतर्निगृह्य ॥
तिष्ठेत्युक्तंकिमिवनतयायातमुत्सृज्यबाष्पं
मय्यासक्तश्चकितहरिणीहारिनेत्रत्रिभागः ॥ २८ ॥
निद्राऽर्धमीलितदृशोर्मदमंथराणि
नाऽप्यर्थवंतिनचनामनिरर्थकानि ॥
अद्याऽपिमेमृगदृशोमधुराणितस्या
न्यस्ताक्षराणिहृदयेकिमपिध्वनंति ॥ २९ ॥
मुखंतस्याःस्मितस्मेरं किंचिदंचलसंवृतं ॥
मदाऽऽलोकनलोलाक्ष स्मृत्वामन्येसुधांमुधा ॥ ३० ॥
इदंमशिशिरैरंतस्तापाद्विवर्णमणीकृतं
निशिनिशिभुजन्यस्तापांगप्रवर्तिभिरश्रुभिः ॥
अनतिलुलितज्याघाताऽकंमुहुर्मणिबंधनात्
कनकवलयंस्रस्तंस्रस्तंपुनःप्रतिसार्यते ॥ ३१ ॥
तपतितनुगात्रिमदन स्त्वामनिशमांपुनर्दहत्येव ॥
ग्लपयतियथाशशांकं नतथाहिकुमुद्वतींदिवसः ॥ ३२ ॥
त्वंदूरमपिगच्छंती हृदयंनजहासिमे ॥
दिनाऽवसानेछायेव पुरोमूलंवनस्पतेः ॥ ३३ ॥

---

१ कोमलपल्लवकांतिना. २ सव्याज. ३ लोलाचपलातारकनीनिकाययोः ४ लज्जयानम्रं. ५ संतापयति. ६ लज्जा. ७ नम्रमुखत्वेन. ८ कोपं. ९ त्यक्त्वा. १० मदानि. ११ स्मितेनहास्येनस्मेरंप्रसन्नं. १२ वस्त्रांचलेनसंवृतंअवगुंठितं. १३ अमृतं. १४ व्यर्थं. १५ अस्यकनकवलयमित्यनेनसंबंधः १६ उष्णैः अस्याश्रुभिरित्यनेनसंबधः १७ अभ्यंतरेविरहजन्यतापाद्धेतोः १८ विवर्णाहीनवर्णामणयोयस्मिंस्तंविधंकृत. १९ नेत्रप्रांतः २० मौर्वीघर्षणजन्यःकिणः २१ सुवर्णकंकण. २२ वारंवारंगलित. २३ कोमलांगि. २४ सायंकाले

सखिपतिविरहहुताशः किमितिमशमंनयातिनयनोदैः ॥
शृणुकारणंनितंबिनि मुंचसिनयनोदकंतुसस्नेहं ॥ २४ ॥
कांचिद्विलोलनयनारमणेस्वकीये
दूरंगतेसतिमनोभवबाणखिन्ना ॥
त्यक्तुंशरीरमचिरान्मलयाद्रिवायुं
सौरभ्यशालिनमहोपिबतिस्मचित्रं ॥ २५ ॥
उपनिषदःपरिपीता गीताऽपिचहंतमतिपथंनीता ॥
तदपिनहाविधुवदना मानससदनाद्बहिर्याति ॥ २६ ॥
गुरुमध्येहरिणाक्षी मौक्तिकशकलैर्निहंतुकामंमाम् ॥
रदयंत्रितरसनाग्रं तरलितनयनंनिवारयांचक्रे ॥ २७ ॥
अगानिमेकांतवियोगवह्निः
संरक्षतुप्रियनमोऽर्दादवनतोऽमौ ॥
इत्याशयाशशिमुखीगलदश्रुवारि
धाराभिरुष्णमभिषिंचतितन्मदेशं ॥ २८ ॥
वसंतकुसुमाकरंतदनुपूर्णचंद्रोदय
निदानमविचारयन्दिशतहंतमारोभिषक् ॥
त्वदीयविरहज्वरोमयिविजृंभतेसांप्रतं
नवाऽधररसायनंतरुणिदेहिदिव्यौषध ॥ २९ ॥
वियोगवह्निकुंडेऽस्मिन् हृदयेतेवियोगिनि ॥
प्रियसंगसुखायेव मुक्ताहारस्तपस्यति ॥ ४० ॥
अहमिहस्थितवत्यपितावकी त्वमपितत्रवसन्नपिमामकः ॥
नतनुसंगमएवसुसंगमो हृदयसंगमएवसुसंगमः ॥ ४१ ॥

१ पत्युर्विरहोवियोगएवहुताशोऽग्निः २ नेत्रोदकैरश्रुभिरितियावत्. ३ मलयपर्वतचंदनेष्वनिशसर्पनिवासात्तच्छ्वाससंपृक्तस्यवायोःसविषत्वात्तत्पानेनझटितिमेमरणंस्यादितिबुद्ध्यामंदपवनपानेविनिगूढाशयः ४ ब्रह्मप्रतिपादकाःश्रुतिशिरोभागाः ५ अभ्यस्ताः ६ मूर्खैः ७ दंताः ८ वसंतकुसुमाकरनामकमौषधं, पक्षे वसंतऋतुःसचासौकुसुमाकरश्च. ९ पूर्णचंद्रोदयाख्यंरसायनं, पक्षे पूर्णोयश्चंद्रस्तस्योदयं. १० रोगोत्पत्तिकारणं ११ विचारमकुर्वन् १२ ददातु. १३ मदनः १४ वैद्यः १५ मुक्तस्त्यक्तःआहारोयेन, पक्षे मुक्तानांमौक्तिकानांहारः

इहनगरेमतिरथ्यं भुजंगसंबाधकल्पसंचारे ॥
शृणुसखिसाधनमेकं नकुलमतिपालनंश्रेयः ॥ ४२
स्वच्छंसज्जनचित्तवन्मधुतरंवीनाऽतिवच्छीतलं
पुत्राऽऽलिंगनवत्तथैवमधुरंबालस्यसंजल्पवत् ॥
एलोशीरलवंगचंदनलसत्कर्पूरकस्तूरिका
पाटल्युत्पलकेतकीसुरभितंपानीयमानीयतां ॥ ४३ ॥
वक्त्रांभोजेसरस्वत्यभिवसतिसदाशोणएवाऽधरस्ते
पाणिःकाकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्तेसमुद्रः ॥
वाहिन्यःपार्श्वमेताःकथमपिभवतोनैवमुंचंत्यभीक्ष्णं
स्वच्छेतर्मानसेऽस्मिन्कथयनरपतेतेंऽबुपानाऽभिलाषः ॥ ४४ ॥
प्राणेशविज्ञप्तिरियंमदीया तत्रैवनेयादिवसाःकियंतः ॥
संप्रत्ययोग्यस्थितिरेषदेशः कराहिमांशोरपितापयंति ॥ ४५ ॥
कराहिमांशोरपितापयंती त्येतन्मियेचेतसिनैवशंक्यं ॥
वियोगतप्तंहृदयंमदीयं तत्रस्थितांत्वांसमुपैतितापं ॥ ४६ ॥
कांतांदृष्ट्वाचरणयुगलक्षालनायप्रवृत्ता
मस्मिन्राष्ट्रेश्वयमितिवचःपांपठीतिप्रयत्नात् ॥
देवस्यत्वेतिचपुनरसौवीटिकायाःप्रदाने
जामातातेजडमतिरयंछांदसःकिंकरोमि ॥ ४७ ॥
कग्रस्थिताऽसिकरभोरुघनेनिशीथे
प्राणाऽधिपोवसतियत्रनिजःप्रियोमे ॥
एकाकिनीवदकथंनबिभेषिबाले
नन्वस्तिपुंखितशरोमदनःसहायः ॥ ४८ ॥
निःशेषच्युतचंदनंस्तनतटंनिर्मृष्टरागोऽधरो

---

१ रथ्यायांरथ्यायां. २ सर्पाजाराश्च. ३ संमर्दः (दाटी गर्दी इतिलो०) ४ नकुल (मुंगुस) पालनं. पक्षे नइतिपदच्छेदः कुलप्रतिपालनंनश्रेयः अत्रद्वितीयचरणे भुजगबाधोऽनिरुद्धसंचारइत्यपिपाठः अत्रपाठे सर्पाणां पक्षे जाराणांचनिवासः नानिरुद्धोऽनिरुद्धःसंचारोयस्यैवंविधइति ५ भाषणवत्. ६ वाणीनदीविशेषश्च. ७ आरक्तःनदविशेषश्च. ८ मुद्राभिःसहितःअब्धिश्च. ९ सेनानद्यश्च. १० अतिशयेनपुनःपुनर्वापठति. ११ तांबूलस्य. १२ वैदिकःस्वछंदानुवर्तीवा. १३ निबिडे. १४ अर्धरात्रे. १५ पुंखिताःशरायेन. १६ आलिप्तःरागोरक्तिमायस्य.

नेत्रेदूरमनंजनेपुलकितात्वंजीतवेपथुः ॥
मिथ्यावादिनिदूतिबांधवजनस्याऽज्ञातपीडाऽऽगमा
वापींस्नातुमितोगताऽसिनपुनस्तस्याऽधमस्यांऽतिकं ॥ ४९ ॥
कथमपिसखिक्रीडाकोपाद्व्रजेतिमयोदिते
कठिनहृदयस्त्यक्त्वाशय्यांबलाद्गतएवसः ॥
इतिसरभसध्वस्तप्रेम्णिव्यपेतघृणेस्पृहां
पुनरपिहतव्रीडंचेतःकरोतिकरोमिकिं ॥ ५० ॥
पुराभूदस्माकंप्रथममविभिन्नातनुरियं
ततोनुत्वंप्रेयानहमपिहताशाप्रियतमा ॥
इदानींनाथस्त्वंवयमपिकलत्रंकिमपरं
मयाऽऽप्तंप्राणानांकुलिशकठिनानांफलमिदं ॥ ५१ ॥
स्मर्तव्याऽहंत्वयाकांत नस्मरिष्याम्यहंतव ॥
स्मरणंचेतसोधर्मं स्तच्चेतोभवताहृतं ॥ ५२ ॥
स्मर्तव्यावयमिंदुसुंदरमुखिप्रस्तावतोऽपिप्रियाः
सत्यंनाथयदिप्रदास्यतिविधिर्जातिस्मरत्वंमम ॥
एकस्मिन्नपिजन्मनिप्रियतमेजातिस्मरत्वंकथं
प्राणाःपांथसमंत्वयैवचलिताःकाऽथाऽपिजन्मैकता ॥ ५३ ॥
गच्छगच्छसिचेत्कांत पंथानःसंतुतेशिवाः ॥
ममाऽपिजन्मतत्रैव भूयाद्यत्रगतोभवान् ॥ ५४ ॥
सहिष्येविरहंनाथ देह्यदृश्यांजनंमम ॥
यदक्तनेत्रांकंदर्पः प्रहर्तुमांनशक्ष्यति ॥ ५५ ॥
अनलस्तंभनविद्यां सुभगभवान्नियतमेवजानाति ॥
मन्मथशराग्नितप्ते त्वंहृदिमेकथमन्यथावससि ॥ ५६ ॥
मुग्धाकांतस्ययात्रोक्ति श्रवणादेवमूर्छिता ॥
बुद्धावक्तिप्रियंदृष्ट्वा किंचिरेणाऽऽगतोभवान् ॥ ५७ ॥

---

१ अंजनरहिते. २ त्यक्तकरुणे. ३ मनः ४ एका. ५ कुटुंबं. ६ वज्रवत्कठोराणां. ७ गोष्ठीप्रसंगेन. ८ प्रवासगमनं. ९ आगता.

११७

सूर्यास्तवर्णनं

पृथुगगनकबंधस्कंधचक्रंकिमेतत्
किमुरुधिरकपालंकालकापालिकस्य ॥
कललभरितमंतःकिनुतार्क्ष्याऽडखंडं
प्रजनयतिवितर्कंसांध्यमर्कस्यबिंबं ॥ १ ॥
अनुरागवंतमपिलोचनयो र्दधतंवपुःसुखमतापकरं ॥
निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका ॥ २ ॥
विलोक्यसंगमेरागं पश्चिमायांविवस्वतः ॥
कृतंकृष्णंमुखंप्राच्या नहिनार्योविनेर्ष्यया ॥ ३ ॥
सांध्यरागरुधिराऽरुणमारा न्निष्पपातरविमंडलमब्धौ ॥
क्रूरकालकरवालविलूनं वासरस्यसहसैवशिरोनु ॥ ४ ॥
परिपततिपयोनिधौपतंगः सरसिरुहामुदरेषुमत्तभृंगः ॥
उपवनतरुकोटरेविहंग स्तरुणिजनेषुशनैःशनैरनंगः ॥ ५ ॥
कृतोपकारंप्रियबंधुमर्क मद्राक्षमहीनांशुमधःपतंतं ॥
इतीवमन्वानलिनीवधूभि र्निमीलितान्यंबुरुहेक्षणानि ॥६॥
नोरविर्नचतमोनतमीशो नद्युतिर्ग्रहगणोनचसंध्या ॥
यादृशीप्रथमतःकिलसृष्टे स्तादृशींनुभुवनंश्रियमूहे ॥ ७ ॥
विश्लेषाऽऽकुलचक्रवाकमिथुनेरुत्पक्ष्मभिःक्रंदितं
कारुण्यादिवमीलितासुनलिनीष्वस्तंचमित्रेगते ॥
शोकेनेवदिगंगनाभिरभितःश्यामायमानैर्मुखै
र्निःश्वाऽसानिलधूम्रवर्तयइवोद्गीर्णास्तमोराजयः ॥ ८ ॥
शुचिरितिपरितःप्रसिद्धिभाजि प्रकटितनेजसिदुर्जयेकृशानौ ॥
निजवसुनिकुरंबमस्तवेला व्यतिकरवान्निदधेसरोजबंधुः ॥ ९ ॥

---

१ अशिरस्ककलेवरं. २ कालएवकापालिकोभिक्षुः ३ गरुडः ४ अनुरागःप्रीतिस्तयुक्तं. पक्षे रक्तिमयुक्तं. ५ बहिर्निष्कासयामास. ६ अपेतंगतंवसुद्रविणंकिरणाश्चयस्मात्. ७ अपरदिगेवगणिका. ८ सद्यः ९ छिन्नं. १० वियोगाकुलैः ११ निजद्रव्यसमूहं- किरणसमूहंच १२ स्थापयामास. १३ सूर्यः

अस्तंगतवतिसवितरि भर्तरिमधुपनिवेश्यकोशांते ॥
कमलिन्योऽपिरमंते किमत्रचित्रंमृगाक्षीणां ॥ १० ॥
अध्वानंनैकचक्रःप्रभवतिभुवनभ्रांतिदीर्घंविलंघ्य
प्रातःप्राप्तुंरथोमेपुनरितिमनसिन्यस्तचिंताऽतिभारः ॥
संध्याभृष्टावशिष्टस्वकरपरिकरस्पष्टहेमारपंक्ति
र्व्याकृष्याऽवस्थितोऽस्तक्षितिभृतिनयतीवैषदिक्चक्रमर्कः ॥ ११ ॥
यातोऽस्मिपद्मनयनेसमयोममैष
सुप्तामयैवभवतीप्रतिबोधनीया ॥
प्रत्यायनामयमितीवसरोरुहिण्याः
सूर्योऽस्तमस्तकनिविष्टकरःकरोति ॥ १२ ॥
उदयतटांतरितमियं प्राचीसूचयतिदिङ्निशानाथं ॥
परिपांडुनामुखेन प्रियमिवहृदयस्थितंरमणी ॥ १३ ॥

तमोवर्णनं.

पिदधतितिमिरेसमस्तलोकं प्रलयमहाऽब्धिनिभेभृतोच्चनीचे ॥
व्यरुचदुडुगणोवलक्षरोचि र्बहुविधफेनसमूहतुल्यरूपः ॥ १ ॥
कोकोलंकलकंठिकाकुवलयंकादंबिनीकर्दमः
कंसाऽरिःकबरीकृपाणलतिकाकस्तूरिकाकज्जलं ॥
कालिंदीकषपट्टिकाकरिघटाकामाऽरिकंठस्थली
यस्यैतेकरदाभवंतिसखितद्वंदेविनिद्रंतमः ॥ २ ॥
लिंपतीवतमोऽगानि वर्षतीवाऽञ्जनंनभः ॥
असत्पुरुषसेवेव दृष्टिर्निष्फलतांगता ॥ ३ ॥
अविज्ञातविशेषस्य सर्वतेजोऽपहारिणः ॥
स्वामिनोनिर्विवेकस्य तमसश्चाकिमंतरं ॥ ४ ॥

---

१ सूर्ये. २ भृंग. मधुपंच ३ संध्यायांमृष्टाउपसंहृतास्तेभ्योवशिष्टोयःस्वकराणांप-रिकरःसमूहस्तद्रूपास्पष्टाहेमानीमितानामराणांपंक्तिर्यस्मिन्सतु. ४ दिशांचक्रंमंडलं. रथांगंच. ५ विश्वासोत्पादन. ६ कमलिन्याः ७ चंद्रं. ८ तिरोदधतिसति. ९ अंधकारे. १० धवलकांतिः ११ विषभेदः १२ मेघपंक्तिः १३ केशपाशः १४ खड्गलतिका. १५ कसोटीतिलोके, १६ गजसमूहः १७ करप्रदाभवंति.

विन्वद्वीरपिकोर्षिका निषद्यदेआकगोषीसुखं
तन्वानंशर्वसाधनोद्धतरसंनिर्व्याजवीरात्मनां ॥
कुर्वन्कामकशानुतममनसांगुमांऽगनासंगमं
दृप्यत्कोकिलकाककंठमलिनंध्वांतंसमुज्जृंभते ॥ ५ ॥
विरमतिमिरसाहसादमुष्मा यदिरविरस्तमितःस्वतस्ततःकिं ॥
कलयसिनपुरोमहामहोभि र्द्युतिनिधिरभ्युदयत्ययंशशांकः ॥ ६ ॥

प्रभातवर्णनं.

अभूत्प्राचीपिंगारसपतिरिवप्राश्यकनकं
गतच्छायश्चंद्रोबुधजनइवग्राम्यसदसि ॥
क्षणंक्षीणास्तारानृपतयइवाऽनुद्यमपरा
नदीपाराजंतेद्रविणरहितानामिवगुणाः ॥ १ ॥
विरलविरलीभूतास्ताराःकलौसुजनाइवा
ऽप्यपसरतिचध्वांतंचित्तात्सतामिवदुर्जनः ॥
मनइवमुनेःसर्वत्राऽपिप्रसन्नमभून्नभो
विगलतिनिशाक्षिप्रंलक्ष्मीरनुद्यमिनामिव ॥ २ ॥
पुरुहूतदिगंगनाप्रसूता रविमुद्दामसुतंचिरादुपेतं ॥
अलिनोनलिनीदलाद्विमुक्ताः प्रियबाहुद्वयबंधनान्नवोढाः ॥ ३ ॥
व्रजत्यपरवारिधिरंजतपिंडपांडुःशशी
नभांतिजलबुद्बुदद्युतिसपत्निकास्तारकाः ॥
कुरंटकविपांडुरंदधतिधामदीपांकुरा
श्चकोरनयनाऽरुणाभवतिदिक्चसौत्रामणो ॥ ४ ॥
दिशिदिशिभृंगयंतेपल्लवंग्राममेते
मुहुरपगतनिद्राःसंभयोहेषितेन ॥
अयमपिचसरोषैःकामिभिःश्रूयमाणो

---

१ कर्तव्यकर्माणि. २ मंत्रसाधनविधिः ३ अयथावक्रमारंभात् ४ प्रावसि. ५ महद्धिस्तेजोभिः ६ पाद्दव. ७ उद्योगरहिताः ८ दरिद्राणां. ९ प्राचीदिक्. १० लौव्यगोलकवत्पांडुरः ११ ऐंद्री प्राचीत्यर्थः १२ शोषयंति. १३ पल्लवसमूहं. १४ अन्धाः १५ (हिंसणेइतिलोके)

नर्द्दतिमधुरतारंताम्रचूडोविहंगः ॥ ५ ॥
यःसैन्येस्मरपार्थिवस्यविरहिमर्त्यार्थिनामर्पणी
ज्योत्स्नानिर्झरमुझ्झतिस्मजगतांयस्तापनिर्वापणं ॥
सोऽयंतारकनायकःकिमपरंशृंगाररसंजीवनं
जातःपुष्पपरागपांडुरजरत्कुश्मांडपिंडाकृतिः ॥ ६ ॥
कुमुदवनमपश्रिश्रीमदंभोजखंडं
त्यजतिमुदमुलूकःप्रीतिमांश्चक्रवाकः ॥
उदयमहिमरश्मिर्यातिशीतांशुरस्तं
हतविधिललितानांहंतचित्रोविपाकः ॥ ७ ॥
लुलितनयनताराःक्षामवक्त्रेंदुबिंबा
रजनयइवनिद्राक्रांतनीलोत्पलाक्ष्यः ॥
तिमिरमिवदधानाःस्रंसिनःकेशपाशा
नवनिपतिगृहेभ्योयांत्यमूर्वारवध्वः ॥ ८ ॥
कांतेजग्मुषितामेचूडरटितंश्रुत्वाप्रबुध्याजवा
त्किंचिद्वासंविदिङ्मुखमविकमहद्वागवाक्षाऽध्वना ॥
संत्रासेनसमीरितामियतममेम्णाऽवरुध्याशनै
रुथ्यानोपनिवेशनानिकुरुतेतल्पेमुहुः पांसुला ॥ ९ ॥
निर्यान्त्यारतिवेश्मनःपरिणतप्रायांविलोकयक्षपां
गाढाऽऽलिंगनचुंबनानिबहुशःकृत्वाऽप्यसंतुष्टया ॥
एकंभूमितलेनिधायचरणंतल्पेप्रकंप्याऽपरं
तन्वंग्यापरिवर्तितांगलतयाप्रेयाश्चिरंचुंबितः ॥ १० ॥
पद्मिन्याःसकलांविधायविकलांताराऽधिपःसंपदं
तस्मैयस्युदयोन्मुखेसतिरवावृद्धिंगतामाश्रितः ॥

---

१ शब्दंकरोति. २ कुकुटः ३ शत्रूणां ४ श्रेष्ठःअग्रेसरइत्यर्थः ५ ज्योत्स्नाप्रवाह ६ शृंगाररसजीवनौषधं. ७ जीर्णकूश्मांडपिंडः ८ गतशोभं. ९ घूकः १० चंचलनयनकनीनिकाः ११ क्षामकृशवक्त्रेंदुमंडलंयासांताः १२ शिथिलान्. १३ राजगृहेभ्यः १४ वारस्त्रियः १५ कुकुटाराव. १६ सभ्रमेण. १७ गवाक्षमुखं. १८ स्वैरिणी. १९ निर्गच्छंत्या. २० केलीमंदिरात्. २१ प्रभातप्रायां. २२ रात्रिं. २३ निधाय. २४ परिवर्तिताचलिता अंगलताअंगवल्लिर्यया. २५ प्रियतमः २६ हीनां. २७ शोभां. २८ सिक्तस्य.

तारा:स्वस्पकैरैर्विकल्पसहसागच्छन्नितोऽस्ता चलं
लमा:कान्चनता:प्रभाकरकरैरपमनूपरिम्लायति ॥ ११ ॥
संश्लिष्टासाऽनुरागंस्वकरपरिचयमा मभूरिमसादा
यापूर्वाभुक्तपूर्वारैर्विकरकलितांतामुदीक्ष्याऽथैतांशु: ॥
निस्तेजा:पश्चिमाऽब्धौमविशतिहिसतांदु:सहोभाव भंग:
किंवक्तव्यंसितांशो:सतुसकलसतांमंडलस्याऽपिनेता ॥ १२ ॥
उत्सिक्त:कुसुमासवै:कुमुदिनीराजप्रियांपुष्पिणी
मालिंगन्निशिनिर्भयंपरिचयंकुर्वन्पुन:पल्लवै: ॥
यावत्पंकजसौरभस्वंमखिलंगृण्हन्नलंधुंप्रस्थित
स्तावत्कैलैयउपस्थितेमरुद्दयंविष्वग्भयाद्धावति ॥ १३ ॥

मध्यान्हवर्णनं.

स्वेस्वेकर्मणिसंनियोज्यसुन्हदोभूमीसुरान्मंत्रिण
श्चक्रंनिर्भयमारचय्यभगवान्समाप्नरागोदय: ॥
स्वाऽऽलोकक्षणकौंदिशीकमधुनोत्खातुंविचिन्वन्नित
ध्वांतंक्काऽपिनिलीनमंबरेमणिर्व्योमाऽग्रमारोहति ॥ १ ॥
छायासंश्रयतेतलंविटपिनांश्रांतेवपांथै:समं
मूलंयातिसरोजलस्यजडताग्लानेवमानै:सह ॥
आचामत्यहिमांशुदीधितिरपस्तप्तेवलोकै:समं
निद्रागर्भगृहंसहप्रविशतिक्लांतेवकांताजनै: ॥ ३ ॥
उष्मालु:शिशिरेनिषीदतितरोमूंलाऽऽलवालेशिखी
निर्भिद्योपरिकार्णिकारकुसुमान्याशेरतेषट्पदा: ॥
तप्तंवारिविहायतीरनलिनीकारंडव:सेवते
क्रोडावेश्मनिवेशिपंजरशुक:क्लांतोजलंयाचते ॥ २ ॥
पत्रच्छायासुहंसामुकलितनयनादीर्घिकापद्मिनीनां

---

१ किरणै: २ सूर्यहस्तलग्नां. ३ चंद्र: ४ नक्षत्राणांद्विजानांच. ५ नायक: ६ मत्त: संपृक्तश्च. ७ चंद्रप्रिया, नृपप्रियांच. ८ पुष्पयुक्ता, रजस्वलांच. ९ पंकजसौरभंकमला-मोदस्तदेवस्वंधनं. १० सत्वरं. ११ प्रभाते. १२ द्विजान्. १३ भयद्रुतं. १४ गृहं. १५ सूर्य: १६ उष्णक्रांत: १७ मयूर: १८ भ्रमरा: १९ वापी.

सौधाग्रप्रत्यर्कतापाहृल्कमितपरिचयहेमिपारावतानि ॥
विच्छेपानिपिपासुःपरिसरविशिखीभ्रांतिमद्वारियंत्रं
सर्वैरुस्रैःसमस्तस्त्वमिवनृपगुणैर्दीप्यतेसप्तसप्तिः ॥ २ ॥
स्कधान्तिसिंधुरयूथगंडकषणन्यासकदानोदकान्
सेवंतेमधुपामहीरुहशिरःपुष्पाणिहित्वाभृशं ॥
लीयंतेवल्मीकुलायकुहरेनिष्पंदमेतेखगा
जिह्वालीढवधूमुखोमृगगणश्छायासुविश्राम्यति ॥ ५ ॥

वसंतवर्णनं.

माकंदच्युतपुष्परेणुपटलीकुम्भाऽऽलवालोदरे
मंदस्यंदिमरंदपूरभरितेवातोत्थपुष्पप्लवैः ॥
खेलंतोललितंमधोर्गुणगणानुगायंतिपुष्पंधयाः
कांतानामधरेधयंतिमधुरंसक्कंमधूलीरसं ॥ १ ॥
उद्यद्विद्रुमकांतिभिःकिसलयैस्ताम्रांत्विषंबिभ्रतो
भृंगाऽऽलीविरुतैःकलैरविशदव्यापारलीलाभृतः ॥
घूर्णंतोमलयानिलाऽऽहतिचलैःशाखासमूहैर्मुहु
र्भ्रांतिमाप्यमधुप्रसंगजनितांमत्ताइवाऽमीद्रुमाः ॥ २ ॥

ग्रीष्मवर्णनं

देशेदेशेजडिमकुरंगा स्तेजोभल्लैर्दिनकरभिल्ले ॥
धावंधावंप्रहरतिराज्ञां धीरागेहंशरणमवापुः ॥ १ ॥

प्रावृड्वर्णनं.

अथोपगूढेशरदाशशांके प्रावृड्ययौशांततडित्कटाक्षा ॥
कासांनसौभाग्यगुणोऽगनानां नष्टःपरिभ्रष्टपयोधराणां ॥ १ ॥

---

१ किरणैः २ सूर्यः ३ गजसमूहस्य. ४ लिप्तमदोदकान्. ५ मृगाः ६ नीडरंध्रे. ७ निश्चल ८ आम्रः ९ समूहः १० भ्रमराः ११ पिबंति १२ मकरंदं १३ प्रवालं. (पोवळीं ह० लो०) १४ पल्लवैः १५ कंपंतः १६ हिमाक्रांतकुरंगामृगाः १७ धाविं-त्वाधाविंत्वा. १८ (कारंजेइतिम.)

यथारंभभ्योभ्मभ्रलभ्रत्धूमःस्थगयति
स्फुलिंगानांरूपंदधतिचयथाकीटमणयः ॥
यथाविद्युज्ज्वालोल्लसितपरिपिंगाश्चककुभ
स्तथामन्येलग्नःपथिकतरुखंडेस्मरदवः ॥ २ ॥
सर्वत्रोद्गतकंदलावसुमतीवृद्धिर्जलानांपरा
जातंनिष्कमलंजगत्सुमलिनैर्लब्धाघनैरुन्नतिः ॥
सर्पंतिप्रतिमंदिरंद्विरसनाःसंत्यक्तमार्गोजनो
वर्षाणांचकलेश्चसंमतिजयत्यैकैवराज्यस्थितिः ॥ ३ ॥
नैतद्वारिदगर्जितंरतिपतिप्रस्थानढक्कारवो
नैतेवारिधराःस्रवन्मदजलास्तल्लिंसधुराःप्रोद्धुराः ॥
नैषाविद्युदियंविभातिरुचिरातच्चंद्रहासप्रभा
मन्येमानिनिमानदुर्गमधुनाजेतुंकिमायात्यसौ ॥ ४ ॥

शरद्वर्णनं.

धन्याःशरदिसेवंते मोल्लसच्चित्रशालिकान् ॥
मासादानस्त्रीसखाःपौराः केदारांश्चकृषीवलाः ॥ १ ॥
नमिताःफलभारेण नमिताःशालमंजरीः ॥
केदारेषुहिपश्यंतः केदारेषुविनिस्पृहाः ॥ २ ॥

हेमंतवर्णनं.

हेमंतेबहुदोषाऽऽढये द्वौगुणौसर्वसंमतौ ॥
अयत्नशीतलंवारि सुरतंस्वेदवर्जितं ॥ १ ॥
अलंहिमानीपरिदीर्णगात्रः समापितःफाल्गुनसंगमेन ॥
अत्यंतमाकांक्षितकृष्णवर्त्मा भीष्मोमहात्माऽजनिमाघतुल्यः ॥ २ ॥
हेमंतेपथिकजनाःप्रियाविमुक्ता लोकानांगृहबहिरंगणेशयानाः ॥
कंदर्पाऽऽकुलमनसांनिशासुतेषां शीतंकिंलगतिजगत्प्रकंपकारि ॥ ३ ॥
हेमंतेहिमकरबिंबचारुमुख्या रामायामृदुभुजपंजरेशयानाः ॥
येकालंपरमसुखेनयांतितेषां शीतंकिंलग० ॥ ४ ॥
अथशीतंवरीवर्ति सरीसर्तिसमीरणः ॥

अपत्नीकोमरीमर्ति तरीलर्तिकुचोष्मवान् ॥ ५ ॥
हसंतींचहसतीच हसंतींवामलोचनां ॥
हेमंतेयेनसेवंते तेनरादुःखभागिनः ॥ ६ ॥

समस्यापूरणं.

श्री० ॥ चेतोहरायुवतयःस्वमनोऽनुकूलाः
सद्बांधवाःप्रणतिनम्रगिरश्चभृत्याः ॥
गर्जंतिदंतिनिवहास्तरलास्तुरंगाः
संमीलनेनयनयोर्नहिकिंचिदस्ति ॥ १ ॥
अयिखलुविषमःपुराकृतानां भवतिहिजंतुषुकर्मणांविपाकः ॥
हरशिरसिशिरांसियानिरेजुः शिवशिवतानिलुठंतिगृध्रपादाः ॥ २ ॥
सहस्रशीर्षापुरुषः सहस्राऽक्षःसहस्रपात् ॥
चलितश्चकितश्छन्नः प्रयाणेतवभूपते ॥ ३ ॥
वागर्थाविवसंपृक्तौ शतकोटिप्रविस्तरं ॥
तुरासाहंपुरोधाय नेमुःसर्वेसुराःशिवौ ॥ ४ ॥
असमानेसमानत्वं भविताकलहेमम ॥
इतिमत्वाध्रुवमानो मृगारिसहःपलायते ॥ ५ ॥
दामोदरकराऽऽघात विह्वलीकृतचेतसा ॥
दृष्टचाणूरमल्लेन शतचंद्रनभःस्थलं ॥ ६ ॥
भीष्मग्रीष्मर्तुसंतप्त[११] शून्यरथ्यांतरस्थयोः ॥
अन्योन्याऽऽलापसुखिनो[१२] र्यूनोश्चंद्रायतेरविः ॥ ७ ॥

(१) संमीलनेनयनयोरितिचतुर्थपादःसमस्या. (२) हरशिरसीत्युत्तरार्धसमस्या. (३) चलितइत्युत्तरार्धसमस्या. (४) नेमुरितिचतुर्थपादःआद्यपादत्रयसमस्यापरणं. (५) मृगारिसहइतिचतुर्थपाद.समस्या. (६) शतचंद्रमितिचसमस्या. (७) यूनोश्चंद्रायतरविरितिच० स०

१ चेतोहरामनोहारिण्यः २ युवतयस्तरुण्यः ३ दंतिनिवहागजसमूहाः ४ तरलाश्चपलाः ५ संमीलनेनिमीलने. ६ विषमःक्लेशदः ७ विपाकःपरिणामः ८ इदंक्रियाविशेषण ९ तुरासाहमिंद्रं. १० शिवौ पार्वतीशंकरौ. ११ भीष्मोदारुणः १२ अन्योन्यभाषणेन जातानन्दयोः

सीतासमागमोत्कंठा कर्णातोऽकृष्टधन्वनः ॥
राघवस्यशरांऽगारैः समुद्राद्भिरुत्थितः ॥ ८ ॥

घटोजन्मस्थानंमृगपरिजनोभूर्जवसनं
वनेवासःकंदैरशनमपिदुःस्थंवपुरिदं ॥
अगस्तिःपाथोधियदकृतकरांऽभोजकुहरे
क्रियासिद्धिःसत्त्वेवसतिमहतांनोपकरणे ॥ ९ ॥

अस्माकंजलजीविनांजलमिदंसद्बाजिराजिभ्रमैः
पातव्यंपररक्तरक्तमनसांनृभिःपतोनांक्षयः ॥
मत्वैवंकिलराजराजनृपतेर्त्वजैत्रयात्रोत्सवे
मत्सीरोदितिमक्षिकाचहसतिध्योयंतिवैरिस्त्रियः ॥ १० ॥

स्फुरितंजठरेविष्णो र्नवनीतभुजःशिशोः ॥
मक्षिकापादघातेन कंपितंभुवनत्रयं ॥ ११ ॥

रामाऽभिषेकेमदविह्वलाया हस्ताच्च्युतोहेमघटस्तरुण्याः ॥
सोपानमार्गेमकारोतिशब्दं ठंठंठंठंठठंठंठठं. ॥ १२ ॥

उन्नमय्यसकचग्रहमास्यं चुंबतिप्रियतमेहठवृत्त्या ॥
कूजितंभवतिमानधनाया हूंहुंहूंहुंहुंहुंहुंहुंहुंहूं ॥ १३ ॥

श्रुत्वासागरबंधनंदशशिराःसर्वैर्मुखैःकदा
तूर्णपृच्छतिवार्तिकान्सचकितोभीत्यापरंसंभ्रमात् ॥
बद्धःमत्स्यमपांनिधिर्जलनिधिःकीलालधिस्तोयधिः
पाथोधिर्जलधिःपयोधिरुदधिर्वारांनिधिर्वारिधिः ॥ १४ ॥

---

(८) समुद्राद्भिरुत्थितइतिच० स० (९) क्रियासिद्धिःसत्त्वइतिचतु० स० (१०) मत्सीरोदितीतिचतुर्थपादःसमस्या. (११) मक्षिकापादघातेनेतिउत्तरार्धसमस्या. (१२) ठंठंठमितिच० स० (१३) हूंहुंहुमि०च०स० (१४) अपांनिधिरित्यादिसमस्या.

१ शराएवअंगाराः २ उत्पत्तिस्थानं ३ मृगाएवपरिजनः ४ समुद्रं ५ अकरोत्. ६ कार्यसिद्धिः ७ बले. ८ सामग्र्यां. ९ जलैकजीवनानां. १० मृगपक्षिसमूहैः ११ विजययात्रोत्सवे. १२ चिंतयति १३ केशग्रहसहितं. १४ मुखं १५ चुंबनंकुर्वति- सति. १६ कांते. १७ बलात्कारेण. १८ कंठअव्यक्तशब्दः १९ मानएवधनंयस्याःमा- निन्याइत्यर्थः २० सेतुबंधं. २१ रावणः २२ वार्तिकान्, २३ वृत्तांतज्ञापकान्.

अंबाकुण्यतितातमूर्ध्निविधृतागंगेयमुत्सृज्यतां
विघ्नेशषण्मुखकागतिर्ममचिरंमूर्ध्निस्थितावाचद ॥
कोपावेशवशादशेषवदनैःप्रत्युत्तरंदत्तवा
नंभोधिर्जलधिःपयोधिरुदधिर्वारांनिधिर्वारिधिः ॥ १५ ॥
सर्वस्यद्वेसुमतिकुमतीसंपदापत्तिहेतू
एकोगोत्रेप्रभवतिपुमानयःकुटुंबंबिभर्ति ॥
वृद्धोयूनासहपरिचयात्त्यज्यतेकामिनीभिः
स्त्रीपुंवच्चप्रभवतियदातद्धिगेहंविनष्टं ॥ १६ ॥
आषाढीकार्तिकीमाघी वचाशुंठीहरीतकी ॥
गयायांपिंडदानेन पुण्याश्लेष्महराऽनृणी ॥ १७ ॥
कांचिद्दिनार्धसमयेरविरश्मितप्तां
नीलांशुकांचलनिलीनमुखेंदुबिंबां ॥
तांतादृशींसमनुवीक्ष्यकविर्जगाद
राहुर्दिवाग्रसतिपर्वविनाकिलेंदुं ॥ १८ ॥

प्रहेलिका.

अपदोदूरगामीच साऽक्षरोनचपंडितः ॥
अमुखःस्फुटवक्ताच योजानातिसपंडितः ॥ १ ॥
वनेजातावनेत्यक्ता वनेतिष्ठतिनित्यशः ॥
पण्यस्त्रीनतसावेश्या योजानातिसपंडितः ॥ २ ॥

---

(१५) अंभोधिरित्यादिचतुर्थपादःसमस्या (१६) सर्वस्यद्वे, एकोगोत्रे, वृद्धोयूना, स्त्रीपुंवच्च, इतिचत्वारिपादानेःमत्राणिसमस्याचतुर्थपादेषु (१७) पुण्याश्लेष्महराऽनृणीतिचतुर्थपादःसमस्या. (१८) राहुर्दिवाग्रसतीतिचतुर्थपादःसमस्या. (१) संदेशपत्र (लखोटाइतिप्राकृते) उत्तर (२) नौकानागवल्लीचेत्युत्तरं.

१ माता. २ मस्तके. ३ त्यज्यतां. ४ क्रोधपरत्वेन. ५ पद्मभिर्मुखैरित्यर्थः ६ आषाढीकार्तिकीमाघीएकादशीपुण्या. वचाशुंठीहरीतकीश्लेष्महरा. गयायांपिंडदानेनअनृणीपितृऋणान्मुक्तइतियोजना. ७ मध्यान्हे. ८ सूर्यकिरणसंतप्तां. ९ नीलवस्त्रांचलपिहितमुखचंद्रां. १० स्वर्भानुः ११ अरण्येकाष्ठरूपेणोत्पन्ना. १२ उदके. १३ मूल्येदत्वाभोग्यास्त्री. गणिकायथाद्रव्यदानेनभोग्यातथेयमपीत्यर्थः

गोपालोनैवगोपाल स्त्रिशूलीनैवशंकरः ॥
अपिचक्रीसनोविष्णु र्योजानातिसपंडितः ॥ ३ ॥
विजिताऽऽत्मभवद्वेषि गुरुपादहतोजनः ॥
हिमाऽपहाऽमित्रधरै र्व्योमव्योमाऽभिनंदिति ॥ ४ ॥
तरुण्याऽऽलिंगितःकंठे नितंबस्थलमाश्रितः ॥
गुरूणांसन्निधानेऽपि कःकूजतिमुहुर्मुहुः ॥ ५ ॥
काचिन्मृगाक्षीप्रियविप्रयोगे गंतुंनिशापारमपारयंती ॥
उद्गातुमादायकरेणवीणा मुद्वीक्ष्यमालोक्यशनैरहासीत् ॥ ६ ॥
आपांडुपीनकठिनं वर्तुलंसुमनोहरं ॥
करैराकृष्यतेऽत्यर्थं किंवृद्धैरपिसस्पृहं ॥ ७ ॥
दुर्वारवीर्यसरूपित्वयिकामसुमा
श्यामासपत्नन्दद्येसुपयोधराच॥
तुष्टेपुनःप्रणतशत्रुसरोजसूर्ये
सवाऽऽद्यवर्णरहितावदनामकास्यात् ॥ ८ ॥

(३) वृषभः (सांड) इत्युत्तरं. (४) सूर्यकिरणतमोजनोमेघाच्छन्नमाकाशमभिनंदतीतितात्पर्यार्थः (५) कुम्भः (घागर) इत्युत्तरं. (६) उ० गीतप्रियोयंमृगोयदिमत्कृतंगीतमाकर्णयितुंचन्द्राग्निःसरत्तदायंचंद्रोनिष्कलंकोभूत्वामन्मुखसाम्यंलभेत. नैतद्युचितं. यतःप्रियविप्रयोगेसंतापकरोयंहिमांशुर्गच्छत्विरितिधिया्वीणामहासीत् (७) उ० पक्वबिल्वफलं. कुचयुगलंच. नासिकाचूर्णनिःसेवणार्थंवृद्धैरपिबिल्वफलंप्रियतेइतिप्रसिद्धिः (८) उ० शस्त्री. आद्यवर्णरहितास्त्री. हेदुर्वारवीर्यत्वयिसरूपिसतिसपत्नद्दद्येकामसुमा. शस्त्री. प्रणतशत्रुसरोजसूर्येत्वयितुष्टेसतिसपत्नद्दयेसमुमासैवाद्यवर्णरहिताका. स्त्री.

१ धेनूनांपतित्वात्पालकः २ तनत्रिशूलांकितत्वात्तच्चिन्हवान्. ३ तथचक्रांकितत्वात्तच्चिन्हवान् ४ विनागरुडेनजितइंद्रस्तदात्मभवोऽर्जुनस्तद्द्वेषीकर्णस्तस्यगुरुःपितासूर्यस्तस्यपादैःकिरणैस्तमः (अमृताहरणसमयेगरुडेनइंद्रोजितइतिपुराणेषुप्रसिद्धं) ५ हिमापहोऽमित्रस्यशत्रुभूतमुदकंतद्धरैर्मेघैः ६ तरुण्याआलिंगितः (स्त्रियोहिकटिनिहितंकुंभंहस्तेनवेष्टयंतीतिप्रसिद्धं) ७ कटिनिहितत्वादेवनितंबाश्रितः ८ गुरूणांश्वश्रूश्वशुरादीनांसंनिधावपि. (कन्याकलशंनिधायस्त्रीषुगच्छंतीषुसर्वाषुअपूर्णःकलशोध्वनिंकरोतीतिप्रसिद्धं). ९ शब्दंकरोति. १० श्यामवर्णलोहमयत्वात्. अन्यत्रषोडशवार्षिकी. ११ सुष्ठुपयःजलंधरतीतिसुपयोधरा. लोहनिर्मितेशस्त्रेपानीयंदीयतेइतिप्रसिद्धिः पक्षे. सुस्तनी.

सरारिमध्याऽपिनवैरियुक्ता नितांतरक्ताऽपिसितैवनित्यं ॥
यथोक्तवादिन्यपिनैवदूतिका कानामकांतेतिनिवेदयाऽऽशु ॥ ९ ॥

अवलोक्यस्तनौवध्वा गुंजाफलविभूषितौ ॥
निःश्वस्यरोदितिक्लिष्टा कुतोव्याधकुटुंबिनी ॥ १० ॥
गीर्वाकिंमपिव्याधः शृंगंजग्राहतरुणहरिणस्य ॥
तमथसमीक्ष्योद्यतकर मेणीमपिलज्जिताव्याधी ॥ ११ ॥
सर्वस्वापहरोनदस्युकुलजःखट्वांगभृन्नेश्वरो
दोषाऽनिष्टकरोनधर्मनिरतःकीलालपोनाऽसुरः ॥
नृणांपृष्ठपलाशनोनपिशुनःशीघ्रंगमोनोहयः
शश्वद्रात्रिचरोनराक्षसगणःकोऽयंसखिब्रूहिमे ॥ १२ ॥
वृक्षाऽग्रवासीनचपक्षिराज स्त्रिनेत्रधारीनचशूलपाणिः ॥
त्वग्वस्त्रधारीनचसिद्धयोगी जलंचबिभ्रन्नघटोनमेघः ॥ १३ ॥
एकचक्षुर्नकाकोऽयं बिलमिच्छन्नपन्नगः ॥
क्षीयतेवर्धतेचैव नसमुद्रोनचंद्रमाः ॥ १४ ॥
अस्थिनाऽस्तिशिरोनाऽस्ति बाहुरस्तिनिरंगुलिः ॥
नाऽस्तिपादद्वयंगाढ मंगमालिंगतिस्वयं ॥ १५ ॥

---

(९) उ० सारिका. (१०) काचिन्द्व्याधस्त्रीस्नुषाया स्तनौगुंजाफलविभूषितौदृ-ष्ट्वामत्पुत्रएतस्यामनुरक्तःक्षीणतांगतोगजान्निहत्यतत्कुंभस्थलमुक्ताहारैःस्तनौविभूषयितुं-नालं, अतोऽनायासलभ्यैर्गुंजाफलैर्विभूषयति अतःपराक्रमहानेतदर्जिताधीनवृत्तेःसर्व-स्याऽपिकुटुंबस्यजीवितसंदेहःस्यात् अतोव्याधकुटुंबिनीदुःखान्निःश्वस्यरोदिति. (११) शृ-गदानायउद्यतकरंतंहरिणंतांचएणींउद्यतकरांसमीक्ष्यव्याधस्त्रीलज्जितेत्यन्वयः मद्गीतसु-खितस्तस्मैयाचकस्यमेशिरोदानदेहीतिव्याधःशृंगजग्राह अथतहरिणःशिरोदानायोद्यतकरं-समीक्ष्यतज्जायाहरिणीमपिपतिमनुयातिजाशिरोदानायउद्यतकरांसमीक्ष्यअयंहरिणोदाता-तत्पत्न्यपिदात्रीहामिहेनोवरमेतेपशवोनवयमनुष्याइतिलज्जितेत्यभिप्रायः (१२) उत्तर-मत्कुणः (ढेकूणइतिलोके) (१३) उ०- नारिकेरफलं, (नारळइतिलोके०) (१४) उ० सूचिका. (सुई) (१५) उ०- कंचुकः (अंगरखा)

१ रिकारोमध्येयस्याः २ सकारेणइतायुक्ता ३ ककारःअंतेयस्याः, सारिका साळुंकीतिशालिद्रा कोगटीतिवाप्रसिद्धा. ४ अद्भुतं.

नरनारीसमुत्पन्ना सास्त्रीदेहविवर्जिता ॥
अमुष्मीकुलेशार्द्धं जातमात्राविनश्यति ॥ १६ ॥
इतिर्हीनःशिलामक्षी निर्जीवोबहुभाषकः ॥
गुणस्यूतिसमृद्धोऽपि परपादेनगच्छति ॥ १७ ॥
नतस्याऽऽदिर्नतस्यांऽतो मध्येयस्तस्यतिष्ठति ॥
तवाऽप्यस्तिममाऽप्यस्ति यदिजानासितद्वद ॥ १८ ॥

छेकापन्हुतिः

श्लो० ॥ मधुरस्वनाधृतोर्णा मण्याभरणासुशोभनासुदती ॥
मत्स्कंधोचितदंडा भिक्षोर्दयिताऽस्तिकिनमेवीणा ॥ १ ॥
रागीभिनत्तिनिद्रां तल्पंनजहातिनिष्ठुरंदशति ॥
चतुरेकिमाणेशो नहिनहिसखिमत्कुणव्रातः ॥ २ ॥
वदंतीजारवृत्तांत पत्योधूर्तासखीधिया ॥
पतिंबुध्वासखिततः प्रबुध्याऽस्मीत्यपूरयत ॥ ३ ॥
सीत्कारंशिक्षयति व्रणयत्यधरंतनोतिरोमांच ॥
नागरिकःकिमुमिलितो नहिनहिसखिहैमनःपवनः ॥ ४॥
समयेपयोधराणामपतितया नैवशक्यतेस्थातुं ॥
उत्कंठिताऽसिबाले नहिनहिसखिपिच्छिलःपंथाः ॥ ५ ॥
यापाणिग्रहलालितासुसरलातन्वीसुवंशोद्भवा
गौरीस्पर्शसुखाऽऽवहागुणवतीनित्यंमनोहारिणी ॥
साकेनाऽपिहृतातयाविरहितोगंतुंनशक्तोऽस्म्यहं
रेभिक्षोतवकामिनीनहिनहिप्राणाप्रयायष्टिका ॥ ६ ॥
आदौगृहीतपाणिः पश्चादारूढजघनकटिभागा ॥

---

(१६) उ०- छोटिका (चुटकीतिलोके) नरनार्योरंगुष्ठमध्यमांगुली. (१७) उत्तरं— उपानत् (जोडा). (१८) उ०— नयनं (डोळा).

१ धृतोर्णादिदृशा. पक्षेधृतोर्णावस्त्रा. २ शोभनादंतायस्याःसा पक्षे हस्तिदंतनिर्मितालंकारवती. ३ अनुरक्तः पक्षे रक्तवर्णः ४ हैमंतसंबंधी. ५ पंकिलः (चिखलानिसहितो.) ६ पाणिग्रहोविवाहः पक्षे पाणोधारणेनलालिता ७ कुलं वेणुश्च.

नखमुखलालनसुखदा सांकिरामाऽस्तिनैवमेपोमा ॥ ७ ॥
रुचिरस्वरवर्णपदा रसभाववतीजगन्मनोहरति ॥
तंकितरुणीनहिर्नाहि वाणीबाणस्यमधुरशीलस्य ॥ ८ ॥
तन्वीचारुपयोधरासुवदनाश्यामामनोहारिणी
नीतानिष्करुणेनकेनचिदहोदेशांतरादागता ॥
उत्संगोचितयातयारहितयाकिंजीवनाऽपेक्षया
भिक्षांतेदायनाऽस्तिकिंनहिनहिप्राणप्रियातुभिका ॥९ ॥

कूटश्लोकाः

श्री० ॥ विंपंभुंक्ष्वमहाराज स्वजनैःपरिवारितः ॥
विनाकैर्नविनानोभ्यां कृष्णाजिनमकटकं ॥ १ ॥
अहिरिपुपतिकांतातातसंबन्धकांता
हरतनयानिहंतृप्राणदातृध्वजस्य ॥
सखिसुतसुतकांतातातसंपूज्यकांता
पितृशिरसिपतंतीजान्हवीनःपुनातु ॥ २ ॥
अर्जुनस्यइमेबाणा नेमेबाणाःशिखंडिनः ॥
सीदंतिममगात्राणि मांघमासेगवाइव ॥ ३ ॥
वायुमित्रसुतबंधुवाहनाऽ रातिभूषणशिरोऽवलंबिनी ॥

१ कंदूः (स्वरूजइतिलोके) २ समीपस्थानुयोग्यया पक्षे अंकमारोढुयोग्यया. ३ विगतःपकारोयस्मात्. ४ केनाविनाककाररहितं. ५ नाभ्यांविनानकारद्वयरहित. ६ कृष्णाजिनं. अत्रककारषकारणकारनकाराणां निष्कासनेक, आ, जि, अ, इतिशिष्यतेउभयत्रसंधौकृतेराज्यं. ७ शत्रुरहितं ८ अहिःसर्पस्तद्रिपुर्गरुडस्तत्पतिर्विष्णुस्तत्कांताल्क्ष्मीस्तत्तातःसमुद्रःसम्यक्बंधोयेनैतादृशोरामस्तत्कांताजानकीतस्याहरोहर्ताराषणस्तत्तनयइंद्रजित्तस्यहंतालक्ष्मणस्तत्प्राणदाताहनुमान्सध्वजेयस्यैतादृशोऽर्जुनस्तस्यसखाकृष्णस्तत्सुतोमदनस्तत्सुतःप्रद्युम्नस्तत्कांताउषातत्तातोबाणासुरस्तस्यसम्यक्पूज्यःशिवस्तत्कांतापार्वतीतत्पिताहिमालयस्तच्छिरसिपतंतीजान्हवीभागीरथीत्यर्थः ९ माघमासेमाघमासेकर्कटाभक्षितानदपत्यानिसेगवाइन्युक्तेःकर्कटयाअपत्यानियथाजन्मसमयेतस्यांअंगानिविदार्यबहिर्यांतितद्वदिमेबाणाममांगानिविदारयंतीत्यर्थः १० वायुमित्रमग्निस्तत्सुतःषण्मुखस्तद्बंधुर्गजाननस्तद्वाहनमूषिकस्तदरातिस्सर्पस्तद्भूषणःशिवस्तच्छिरोऽवलंबिनीगंगातज्जोभीष्मस्तद्वैरिशिखंडीतद्भगिनीद्रौपदीतस्याःपतिरर्जुनस्तस्यसखाकृष्णः.

तत्रवैरिभगिनीपतेःसखा पातुमांकमललोचनोहरिः ॥ ४ ॥
कंतितेकबरीभारः सुमनःसंगाग्मियेऽतिनीलत्वात् ॥
भवतिचकेलापवत्त्वा न्निर्जरसेव्यःकथंनस्यात् ॥५॥
अतनुज्वरपीडिताऽसिबाले तवसौख्यायमतोममोपवासः ॥
रसमर्पयवैद्यनाथनाऽहं भवदावेदितलंघनेसमर्था ॥ ६ ॥
यामिविधोवभ्युदिते पुनरेष्यामीतियदुदितंभवता ॥
जानात्युदंतमेतं नेदंतत्त्वेनमुग्धवधूः ॥ ७ ॥
पानीयंपातुमिच्छामि त्वत्तःकमललोचने ॥
यदिदास्यसिनेच्छामि नोदास्यसिपिबाम्यहं ॥ ८ ॥
यस्यषष्ठीचतुर्थीच विहस्यचविहायच ॥
अहंकथंद्वितीयास्या द्वितीयास्यामहकथं ॥ ९ ॥
समरेहेमरेखांऽकं बाणंमुंचतिराघवे ॥
सरावणोऽपिमुमुचे मध्येरीतिधरंशरं ॥ १० ॥
शिलार्पितपदद्वद्वा नासाऽर्पितकरद्वया ॥
अभूद्व्यक्तस्तनीनारी कथमेतद्भविष्यति ॥ ११ ॥
सुवेर्णस्यसुवंर्णस्य सुवर्णस्यचजानकि ॥
प्रेषितातवरामेण सुवर्णस्यचमुद्रिका ॥ १२ ॥
केशवंपतितंदृष्ट्वापांडवाहर्षनिर्भराः ॥
रुरुदुःकौरवाःसर्वेहाहाकेशवकेशव ॥ १३ ॥

---

१ कइवमहेषाचरतिकति आचारेक्विप्. २ सुमनसापुष्पाणामन्यत्रदेवानासंगात्. ३ अइवविष्णुरिवाचरतिअति. ४ भवइवशिवइवाचरतिभवति. ५ कलापोभूषणंतद्वत्त्वात् पक्षेकलापश्चंद्रस्तद्वत्वात्. ६ जरारहितैस्तरुणैःसेव्यः पक्षेनिर्जरैर्देवैःसेव्यः. ७ महान् पक्षेकामः ८ लंघनंसमीपस्थितिश्च. ९ मेषजं. प्रीतिश्च. १० उपवासे. उल्लंघनेच. ११ दैवैर्वद्वेष. १२ वृत्तांतं उकारांतंच. १३ इदं तत्त्वेनसत्यत्वेन. तत्त्वेनेतिभिन्नंपद इदंतत्वेनाइकारांतत्वेनच. १४ दासीअसीतिपदच्छेदः १५ सहधर्मिणी. १६ मध्यमागेरीतिःपित्तलंतद्विशिष्टं अथचमध्येरीकारविशिष्टंशरंशरीरमित्यर्थः १७ अधस्ताद्दारुणिशिला, १८ नासाद्दारूपरिस्थितं. १९ हेम्नः २० शोभनाक्षरस्य. २१ शोभनवर्णस्य, २२ स्तुत्यस्य, २३ केउदकं. २४ प्रेत. २५ मत्स्यविशेषाः. अत्रद्रोणोहर्षसमन्वितइत्यपिपाठः द्रोणःद्रोमकाकइतिप्रसिद्धः. अत्राद्यःपाठएवश्रेयान्. २६ काकाः

अकुबेरपुरीविलोकनं नधरांसुनुकरंकदाचन ॥
अथतत्प्रतिकारहेतवे ऽदमघंतीपतिलोचनंभज ॥ १४ ॥
अयिकांतपश्यमेघं नहिनहिपापंतवाऽतिपुण्यायाः ॥
नहिनहिपश्यपयोधर मपसारयकंचुकीमुरसः ॥ १५ ॥
निश्चितंससुरःकोऽपि नकुलीनःसमेमतिः ॥
सर्वथासुरसंबद्धं कोऽप्ययोनाऽभिनंदति ॥ १६ ॥
येनाऽकारिपरोभूत दिनंनायकसूनवे ॥
यद्गोत्रोत्मभवाकांतं तन्महःश्रेयसेऽस्तुवः ॥ १७ ॥
अनेकमुखिरंवीय कांतचक्रापिसंज्ञितं ॥
चक्रिणाचसदाऽऽराध्यं योजानातिसपंडितः ॥ १८ ॥
सुकपरिविदःशब्दः सुब्रह्मण्यस्यवाचकःकेन ॥
स्तनभरनमितानारी कनोपायेनरंजयत्कांतं ॥ १९ ॥
शंकरंपातितंदृष्ट्वापार्वतीहर्षनिर्भरा ॥
रुरुदुःपन्नगाःसर्वे हाहाशंकरशंकर ॥ २० ॥
अंहूशूलाजनपदाः शिवशृंगाद्विजातयः ॥

(१९) इयंबहिर्लापिका अत्रप्रश्नद्वयस्यैकमुत्तरं उपरिविहरणेनेति, आद्येसुकपरिविदशब्दे उ प रि वि इत्येतेषांवर्णानांहरणेननिष्कासनेनस्कंदइतिशब्दःसुब्रह्मण्यस्यवाचकोभवति० द्वितीये उपरिविहरणेनेत्यस्यविपरीतरतेनेत्यर्थः

१ अनल्पकाविधवेत्यर्थः २ मंगलकारकं. ३ अनलोचनशिवं. ४ मेघं अध पक्षे मे अघमितिच्छेदः अघपाप. ५ मेघं स्तनच. ६ सुरयासहितःमद्यपइत्यर्थः पक्षे सःसुरइतिपदच्छेदः सुरादेवः. ७ सत्कुलप्रसूतः पक्षे कौ लीनः ८ समेसाधौअमतिःश्रद्धारहितइतियावत् पक्षे समेविष्णोमतिर्यस्यसः. तत्पुरुषकर्तात्यत्रबहुलग्रहणाद्बहुव्रीहावप्यसमस्याअलुक्. ९ शोभनरसार्थशिव. चद्धंरचितं, पक्षे असुरैःसबद्धंयुक्तं. १० कविकृतिपक्षे शुक्रं. ११ पराजयः पराउत्कृष्टाभूनिरैश्वर्यंच. १२ कर्णाय सुर्पाचाय यमायच. १३ गात्वयतेतेगोपास्तेषामात्मभवागोपिकास्तासांकात्मनोहरं. अथचगोत्रायाःपृथ्व्याआत्मभवासीतासाकांतायस्यतत्. अथच गोत्रस्यहिमालयस्यात्मभवापार्वतीसाकांतायस्यतत्. १४ महःश्रीकृष्णाख्यं रामाख्यं शिवाख्यंच. १५ बिलं १६ बकारः आद्योयस्य. १७ ककारःअंतेयस्य. १८ सर्पेण, उत्तरं वल्मीकं. १९ शकरःश्वेतचंदनः २० पर्वतवासिनो स्त्री. निल्ली. २१ अट्टमन्नमितिप्रोक्तंशिवोवेदउदाहृतः केशोभगमितिप्रोक्तंशूलोविक्रयउच्यते.

भ्रमराःकेशबृलिभ्यो भविष्यंतिकलौयुगे ॥ २१ ॥
अमुनामधुकरपतिना मिलितोऽप्यपकारदंपतीयेन ॥
भ्रातःसपालयेत्त्वां विकारहितोविनायकोलक्ष्म्याः ॥ २२ ॥
कुंदकुंजममुंपश्य सरसीरुहलोचने ॥
अमुनाकुंदकुंजेन सखिमेकिंमयोजनं ॥ २३ ॥
राजन्कमलपत्राक्ष तत्तेभवतुचाऽक्षयं ॥
आसादयतियद्रूपं करेणुःकरणैर्विना ॥ २४ ॥
स्तैनमंडलमाश्रित्य नखस्यवरयोषितां
कदाकर्णयतेगीतं रमयासहरंगराट् ॥ २५ ॥
उपरिगतंहिसवर्णं स्वस्वाकरतोददासिरंतुंमे ॥
धन्यःसरोजयुगलं त्वत्काःस्तनयुगमथाऽस्पृशत्कृष्णः ॥ २६॥
अच्युतभक्तिवशादिह समभावस्तत्प्रसंगेन ॥
सारमतेरभ्युदयति रतिरितिनैवाद्भुतंकिंचित्॥ २७ ॥

---

१ अपगतःधुकारोयस्मात्तेन २ मधुकरपतिर्मकरपातिस्तेन. ३ पकारशून्योदंपती-
दंतीत्यर्थः ४ विइत्यक्षरेणरहितःविनायकःनायकइत्यर्थः ५ अमुनामुकाररहितेन ६ क-
रेणुःकरणैर्विना क् र् ण् एतद्व्यंजनत्रयंविनायद्रूपमासादयतिप्राप्नोतितत्तेऽक्षयंभवत्वित्य-
न्वयः उक्तव्यंजनत्रयरहितं अ ए उः इतिस्वरत्रयंतत्र अ ए इत्यत्रवृद्धौ ऐ उः इत्यत्रआ-
यादेशेआयुरितिसिद्धं. ७ स्वस्यमंडलमाश्रित्यहेकदमेघमास्तनगर्जितंमाकुरुयतोरंगराट्रंग-
नाथःरमयासहवरयोषितांगीतंआकर्णयतेइत्यन्वयः ८ कृष्णोराधिकांपृच्छति— उपरिगतं-
सवर्णंसमानवर्णंसरोजयुगलंकरतोदृस्वास्वहस्तेनआदृत्यमेरतुंददासि ! ततोराधयात-
स्मिन्दातुंगृहीतेसति, उवर्णेनपरिगतंयुक्तंसवर्णरहितंएतादृशंसरोजयुगलंउरोजयुगलमेवइ-
तिधियाकमलयुगंत्वत्काःस्तनयुगलमेवकृष्णोऽस्पृशत्. ९ इहसंसारेअच्युतभक्तिवशात्सम-
भावःसमत्वंशत्रुमित्रादिषु. तत्प्रसंगेनभक्तिप्रसंगेनसारमतेःश्रेष्ठबुद्धेःपुंसःरतिःप्रीतिःअभ्यु-
दयतीतिनकिंचिदत्राऽद्भुतं. व्याकरणपक्षे. भोअच्युतभअच्युताअहीनाभामातिभावस्य
क्तिवशात्क्तिप्रत्ययवशात् समासिद्धोमभावःमकारस्याभावोलोपोभवतिइतिशेषः तत्प्रसंगेन
क्तिप्रत्ययप्रसंगेनरमतेर्धातोःसारतिःअभ्युदयतीत्यपिनाद्भुतं. रमुक्रीडायामित्यस्माद्धातोः-
क्तिनिअनुदात्तोपदेशेतिमलोपेरतिरितिरूपंसिध्यति.

मंजुलघौसंभावित गुणेकचिन्नापदाधारे ॥
अयिसखितत्रोपपतौ ममचेतोनत्वनीदृशेत्यौ ॥ २८ ॥
अयिसखिशस्त:सखिव त्पतिरितिकित्वंनजानासि ॥
शस्तोऽतिसखिवदुपपतिरित्यालिकथंत्वयाऽपिनाऽबोधि॥२९॥
एकोनविंशतिःस्त्रीणां स्नानार्थंशरयूंगता ॥
विंशतिःपुनरायाता एकोव्याघ्रेणभक्षितः ॥ ३० ॥
श्रुत्वामदग्धंतनयंसशोका पुनर्निशम्याऽमशरीरभावं ॥
पश्यत्सुदेवेषुचधावमाना रमामुदाशंकरमालिलिंग ॥ ३१ ॥
रामंसीतांलक्ष्मणंजीविकार्थे विक्रीणीतेयोनरस्तंचधिक्धिक् ॥
अस्मिन्पद्येयोऽपशब्दान्नवेत्ति व्यर्थमज्ञंपंडितंतंचधिक्धिक् ॥३२॥
गोकर्णराडाभरणंयदीयं यद्रव्यहव्येडजमाददाह ॥
कुंभेनचूडामणिरादिगंतात् पायादपायादुरगात्मजार्धः ॥३३॥

(२८) कापिविदुषितरानायिकासखींप्रतिवदति. अयिसखितत्रतस्मिन्उपपतौममचेतःअस्तीतिशेषः कीदृशे. मंजुलघौमजुःसुंदरःसचासौलघःश्रेष्ठश्चेतिविशेषणोभयपदःकर्मधारयः पुनःकी० संभावितगुणे संभाविताःगुणाःसौंदर्यादयोयत्र. क्वचित्कदाचिदपिनआपदाधारे आपद्रहितेइत्यर्थः अनीदृशेउक्तगुणरहित पत्यौममचेतोनास्तीति. व्याकरणपक्षे उपपतौउपपतिशब्देममनोस्ति. की० मंजुलाघिसंज्ञायस्मिन्. संभावितःघेर्ङितीतिगुणोयस्य. नाइतिपदस्यआङोनास्त्रियामितिसूत्रविहितस्याऽऽधारेआश्रये. अनीदृशघिसंज्ञागुणनादेशरहितेकेवलेपतिशब्दे (२९)अयिसखिपतिःसखिवत्शस्तःमित्रवाद्गुश्रवसनीयःइतित्वंकिंनजानासि. सखीप्रत्याह हेआलिउपपतिःजारःअतिसखिवत्भतिशयितमित्रवत्शस्तइतित्वयाऽपिकथंनाऽबोधि. व्याकरणपक्षे. पतिशब्दःशस्तःशसइतिशस्तः पंचम्यंतात्तसिः द्वितीयाबहुवचनात्परंसखिवत्सखिन्त्यरूपोज्ञेयः नादेशाभावेनकार्यैक्यात्. उपपतिशब्दःशस्तःद्वितीयाबहुवचनात्परअतिसखिशब्दवत्नादेशभाक्. (३२) जीविकार्थेचापण्येइत्यत्रअपण्यइत्युक्त्वात्हस्तकान्विक्रीणातिइत्यत्रैव रामकं, सीतकां, लक्ष्मणकं, इतिप्रयोगाणवमाधव: (३३) यदीयंआभरणंगोकर्णराट् गावावेदनेत्रेएवकर्णौयेषांचक्षुःश्रवसइत्यर्थः तेषुराजतेइति. यद्रव्यहव्येट् यस्यगर्विनेत्रेभवःउत्पन्नःहव्येट्हव्यस्वामीअग्निःअजंमदनआददाह. भेनचूडामणिःभानांइनःस्वामीचंद्रइत्यर्थः सचूडामणिःशिरोरत्नंयस्य अगात्मजार्धःउ.शिवःअपायात्आदिगंतात्कुंपृथ्वींपायात् रक्षतु.

१ एकोनाइतिविंशतेर्विशेषणेनविरोधः एकः नानर. इतिपदच्छेदेनपरिहारः २ श्रेष्ठंवंदन.

त्रैलोक्येनोपमैतस्याः सखेकिमितिभाषसे ॥
अनंतरासानादिर्वा नतृतीयेतिमेमतिः ॥ २४ ॥
सुवर्णालंकृताकन्या हेमाऽलंकारवर्जिता ॥
साकन्याविधवाजाता गृहेरोदितितत्पतिः ॥ २५ ॥
द्वंद्वोहंद्विगुरपिचाऽहं मद्गेहेनित्यमव्ययीभावः॥
तत्पुरुषकर्मधारय येनाऽहंस्यांबहुव्रीहिः ॥ २६ ॥
अहंचत्वंचराजेंद्र लोकनाथावुभावपि ॥
बहुव्रीहिरहंराजन षष्ठीतत्पुरुषोभवान ॥ २७ ॥
काचिद्बालारमणवसतिंप्रेषयंतीकरंडं
सातन्मूलेसभयमलिखद्व्यालमस्योपरिष्टात ॥
गौरीनाथंपवनतनयंचंपकंचाऽस्यभावं
पृच्छन्त्यार्यानप्रतिकथमिदमल्लिनाथःकवींद्रः ॥ २८ ॥
विलासिनींकांचनपट्टिकायां पांटीरपंकैर्विरहीविलिख्य ॥
तस्याःकपोलेऽव्यलिखत्पवर्गं तवर्गमोष्ठेचरणेटवर्गं ॥ २९ ॥

---

(२४) कश्चित्स्वनायिकांस्तौति तंप्रतिअन्यःप्रतिभाषते. हेसखेएतस्याःत्रैलोक्येउपमानास्तीतिकिमितिकुतोभाषसे. यतः साउपमैव अनंतरामध्यवर्णरहिताउमेतियावत्. अथवा सैवोमानादिःआद्यवर्णरहिता मालक्ष्मीतियावत् उपमाउपमानंअस्तीतिभावः तृतीयानास्तिइतिमेबुद्धिः

१ शुभ्रवर्णेनकांत्याअलंकृतेतिविरोधपरिहारः २ विविधाःधवाःपतयोयस्याःजारिणीत्यर्थः ३ यतः स्त्रीपुरुषरूपव्यक्तिद्वयात्मकः ४ द्वौगावौयस्य. गोस्त्रियोरितिन्ह्रस्वः ५ माषोवस्तुमात्रं अव्ययीव्ययाभाववान् मद्गेहेकस्यापिवस्तुनोव्ययोनास्तीत्यर्थः यद्वा अव्ययीभवनंअव्ययीभावः६नत्तस्मात्हेपुरुषयेनाहंबहुव्रीहिर्बहुधान्यविशिष्टःस्यांतत्कर्मधारयेत्यन्वयः समासषट्कप्रतिपादनमत्रचित्रं. ७ लोकाजनानाथाःस्वामिनोयस्यैवंविधोऽहं. याचकत्वात् लोकानांजनानांनाथस्त्वं राजत्वेनपालकत्वात् उत्तरार्धेबहुव्रीहिरित्यस्य बहुव्रीहिप्रतिपाद्यार्थभूतइत्यर्थः तत्पुरुषइत्यस्यतत्पुरुषप्रतिपाद्यार्थभूतत्यर्थः८ प्रियानिवासं. ९ करंडस्थितपुष्पसौरभंगंधवाहोहरेदितितद्रक्षकसर्पं. १० पुष्पबाणोबाणार्थंहरेदितितद्वैरिणंशिवं. ११ सूर्यःपुष्पंस्वकरैःशोषयेदितिजन्मकान्निरणबमक्ष्यतुल्याहनुमंतंभयजननायहनूमंत. १२ तन्मकरंदंभृंगोहरेदितिचंपकमलिखदितिभावः चंपकेभृंगानगच्छंतीतिप्रसिद्धेः १३ चंदनद्रवैः १४ गंडे. १५ पवर्गस्योष्ठस्थानीयत्वात्ओष्ठाभ्यांतच्चुंबनंकरिष्यामीतिसूचितं. १६ तवर्गस्यदंतस्थानत्वाद्दंतैस्तवोष्ठौसंदशयिष्यामीतिसूचितं. १७ टवर्गस्यमूर्धस्थानत्वात्पादद्वयंकृत्वासिनर्तित्वांशिरसानमामीतिसूचितं.

काचिद्वियोगानलतप्तगात्री प्राणान्समाधारयितुंलिलेख ॥
बाह्वोर्भुजंगंत्वदिराहुबिंबं नाभौचकर्पूरमयंमहेशं ॥ ४० ॥

अपःपिबन्प्रपापाली मनुरक्तोविलोकयन् ॥
अगस्त्यंचिंतयामास चतुरःसाऽपिसागरान् ॥ ४१ ॥

रामंवानरवाहिनींपुररिपुंराहुंरवेःसारथिं
कुंभीगर्भसमुद्भवंमुररिपुंमारस्यमौर्वीरवं ॥
तन्वीनूतनपल्लवैर्विरचितेशय्यातलेशायिनी
सख्यावीजिततालवृंतपवनाबालामुहुर्निंदति ॥ ४२ ॥

नेतुःप्रयाणोन्मुखतांसमीक्ष्य नक्षत्रमुक्तावलिमस्यकंठे ॥
अधारयत्सासतुवासराणां संख्यापरोऽभूत्सखिकोऽत्रभावः॥४३॥

त्वद्विरहमसहमाना निंदतिबालादिवानिशंशंभुं ॥
राहुमपिरामचंद्र रामानुजमपिचपन्नगारातिं ॥ ४४ ॥

सर्वज्ञःसन्त्वदसिबहुधादीयतेदीयतेवै
दाधातूनांभवतिसदृशंरूपमेषांचतुर्णां ॥
द्वौदानार्थौभवतिचतथापालनेखंडनेवा
नोजानीमःकथयतिभवान्कस्यधातोःप्रयोगं ॥ ४५ ॥

---

(४०) सर्पाःसमीरणप्राणाःस्वमोनंनिर्गमिष्यतीत्याशयेनबाह्वोर्भुजगंलिलेख. चंद्रअमृतभागनयाश्रुतिसिद्धंमूनानामनोमर्हातुमागच्छेदित्याशयेनत्वद्दिराहुं. मन्मथग्रासायशिवंचलिलेखेतिभावः (४१) समुद्रमपिकरेचुलकयतोमुनेःसामर्थ्यंममचेत्स्यात्तर्हिसटिति. मृदृशात्यभावाचिरमेनापश्यामीतिपांथाभिप्रायः यदिसागराःसन्निहिताःस्युस्तदानवरतंजलधारांविसृजंतीचिरमेतद्दर्शनसुखमनुभवेयामितिप्रपापाल्यभिप्रायः (४२) कोकिलरवकाकावशेषकत्वाद्रामं. मलयाद्रिपवशेषणाद्वानरवाहिनीं. मन्मथावशेषणात्पुररिपुं चंद्रावशेषणाद्राहुं. रवेःशीघ्रमस्ताद्रिप्रापणेनरात्रिसंपादनादनूरुं. चंद्रोत्पादकसमुद्रावशेषणादगस्त्यं. मन्मथोत्पादनान्मुररिपुंनिंनिंदेतिभावः. कोकिलादीनांकामोद्दीपकत्वंरसशास्त्रेप्रसिद्धं. (४३) नक्षत्रमालाधारणेननक्षत्रोदयवेलायामागमनकर्तव्यमितितयासूच्यते. वासरसंख्याकरणेनसप्तविंशतिदिनमध्यएवमयाऽऽगन्तव्यइतितेनसूचितं. (४४) मन्मथावशेषणाच्छंभुं. चंद्रावशेषणाद्राहुं. मलयाद्रिपवशेषणाद्रामचंद्रं. मन्मथजनकत्वाल्लक्ष्मणरामानुजं वायुभक्षिसर्पहननात्पन्नगारातिंगरुडंनिंदितवतीतिभावः. (४५) त्वंसर्वज्ञःसन्बहुधावारंवारंदीयतेदीयतइतिवदसि. दीयतेइतिरूपंचतुर्णामपिदाधातूनांसदृशंभवतितन्मध्येद्वौदानार्थौ. दाणूदाने डुदाञ्दाने इति. एकःपालने. देङ्रक्षणेइति. एकःखंडने. दोऽवखंडनेइति. एतन्मध्येभवान्कस्यधातोःप्रयोगंकृत्वावदतीतिनंजानीमः

ब्रह्मनांतमपिक्षीबं मनःसांतंनपश्यति ॥
किंचित्रंलोकजनकं वाक्कांतानैत्यकांतकं ॥ ४६ ॥

क्रियागुप्तकारकगुप्तादि.

प्रांतःप्रातःसमुत्थाय द्वौमुनीचकमंडलू ॥
अत्रक्रियापदंवक्तुमवधिर्ब्रह्मणोवयः ॥ १ ॥
ललाटतिलकोपेतः कृष्णःकमललोचनः ॥
गोकुलेऽत्रक्रियांवक्तुं योजानातिसपंडितः ॥ २ ॥
पंपासरसिरामेण ससेहंसविलासया ॥
सीतयाकिंकृतंसार्धं मत्रैवोत्तरमीक्ष्यतां ॥ ३ ॥
राजन्नवघनश्याम निस्त्रिंशाऽऽकर्षदुर्जय ॥
आकल्पंवसुधामेनां विद्विषोवैरणेबहून् ॥ ४ ॥
कांतयाकांतसयोगे किमकारिनवोढया ॥
अत्रापिचोत्तरंवक्तु मवधिर्ब्रह्मणोवयः ॥ ५ ॥
आगतःपांडवाःसर्वे दुर्योधनसमीहया ॥
तस्मैगांचसुवर्णंच रत्नानिविविधानिच ॥ ६ ॥
दामोदरायपुण्यात्मन् पुष्पमूलफलान्यपि ॥
अत्रक्रियापदंगुप्तं मर्यादादशवार्षिकी ॥ ७ ॥
विराटनगरेराजन् कीचकादुपकीचकं
अत्रक्रियापदं० ॥ ८ ॥

---

(४६) नविद्यतेअंतोयस्यतन्नांतं, अथचनकारांतं, ब्रह्म. अंतेनसहितंसांतं, अथचसकारांतं. सांतंमनोनांतंब्रह्मनपश्यतीतियुक्तमेव. ककारोंतेयस्याःअथचकांतारमणी अकस्यदुःखस्यांतकंनाशकंअथचककारांतंनभवतीत्यकांतकं. स्वार्थेकः. स्वयंकांतावाक्अकांतकमपिलोकजनकत्वात्कांतंब्रह्मनैतीतिचित्रमितिभावः. १ प्रान्इतिक्रिया. प्रापूरणे. लङ्प्रथमपुरुषद्विवचनं. २ ललाट, लट्बाल्ये. लिट् ३ ससे, षणाशौचे. कर्मणिलिट्. ४ अव, अवरक्षणे. ५ ऊ दो ऽवखंडने. लोट्. ६अत्रापि. अपूपत्ज्जायाँ. कर्मणिलुङ्.

(६) धनसमीहयाधनेच्छयायआगतस्तस्मैसर्वेपांडवागांसुवर्णंविविधानिरत्नानिचअदुरित्यन्वयः (७) हेदामोदरपुष्पमूलफलानिआयआनय. इटकिटकटीत्यस्मभिन्नस्यईधातोराङ्.पूर्वस्यलोटोरूपमिदं. उपसर्गसमभिव्याहारेणआनयनार्थकत्वं. (८) विःपक्षीकीचकादुपेणोःकीचकांतंरमाडवखाम.

कांतंविनानदीतीरं मदमालोक्यकेकिनी ॥
अत्रक्रियापदं० ॥ ९ ॥
अम्लानपंकजमाला कंठेरामस्यसीतया ॥
मुधाबुधाभ्रमंत्यत्र मत्यक्षेपिक्रियापदे ॥ १० ॥
नारसिंहाऽऽकृतिवीक्ष्य वनेमत्तमतंगजः ॥
अत्रक्रिया० ॥ ११ ॥
संध्यावंदनवेलायां तडागेचद्विजोतमैः ॥
अत्रक्रियापदंगुप्तं० ॥ १२ ॥
गौरीनखरसादृश्य श्रद्धयाशशिनंदधौ ॥
इहैवगोप्यतेकर्ता वर्षेणाऽपिनलभ्यते ॥ १३ ॥
अन्नवस्त्रसुवर्णानि रत्नानिविविधानिच ॥
ब्राह्मणेभ्योनदीतीरे ददातिव्रजसत्वरं ॥ १४ ॥
राक्षसेभ्यःसुतांहृत्वा जनकस्यपुरीययौ ॥
अत्रकर्तृपदंगुप्तं मया० ॥ १५ ॥
नकरोतिनामरोषं नवदतिपरुषंनहंत्ययंशत्रून् ॥
रंजयतिमहीमखिलां तथाऽपिधीरस्यवीरस्य ॥ १६ ॥
शरदिंदुकुंदधवलं नगपतिनिलयंमनोहरंदेवं ॥
येःसुकृतंकृतमनिशं तेषामेवप्रसादयति ॥ १७ ॥
एहिहेरमणिपश्यकौतुकं धूलिधूसरतनुंदिगंबरं ॥
सापिनद्वदनपंकजंपपौ भ्रातरुक्तमपिकिनबुध्यते ॥ १८ ॥

---

(९) कोकिलनामपरीहरंमदंमेघज्योतिर्विद्युतमितियावत् आलोक्यविनाशदीति-विशेषणपुनःपुनर्वाशब्दकरोतीत्यर्थः. (१०) प्रत्यक्षेपिस्मिता. (११) गजःसिंहस्या-कृतिंवीक्ष्यवनारनजगाम कृगतौ. कर्तरिलिट् (१२) हेद्विजोतमऐःआगछ. (१३) इःका-मस्तंहंतीतिइहाशिवः. (१४) हेब्राह्मणकश्चित्तुभ्यःधनिकः (१५) राक्षसानांइभ्यः-स्वामीरावणः जनकस्यसुतांहृत्वापुरींलंकांययौ. (१६) अयंपुरुषोरोषंनकरोति, परुषं-कठोरंनवदति शत्रून्नहंति नामेतिप्रसिद्ध तथापिअस्यवीरस्यधीःअखिलांमहींरंजयति. (१७) येरनिशंसुकृतकृतंतेषामेवमनःशरदिंद्वित्यादिविशेषणविशिष्टंदेवंहरंप्रसादयति. (१८) हेरमणिइहिकौतुपश्यपिब्यानुकंपालंधुजीत्यादिविशेषणविशिष्टंपश्य. कर्मगुप्तं.

शीकराऽऽसारसंवाहि सरोजवनमारुतः
मक्षोभयतिपांथस्त्री निःश्वासैरिवमांसलः ॥ १९ ॥
सुभगतवाननपंकज दर्शनसंजातनिर्भरमीतेः ॥
शमयतिकुर्वन्नदिवसः पुण्यवतःकस्यरमणीयः ॥ २० ॥
पूतिपंकमयेऽत्यर्थं कासारेदुःखिताअमी ॥
दुर्वारामानसंहंसा गमिष्यंतिघनाऽऽगमे ॥ २१ ॥
अहंमहानसायातः कल्पितोनरकस्तव ॥
मयामांसादिकंभुक्तं भीमंजानीहिमांबक ॥ २२ ॥
अंभोरुहमयेस्नात्वा वापीपयसिकामिनी ॥
ददातिभक्तिसंपन्ना पुष्पसौभाग्यकाम्यया ॥ २३ ॥
मशास्त्यायुक्तमार्गस्य तवसंमानितांश्रिताः ॥
स्पृहयंतिनकेनाम गुणरत्नालयमभो ॥ २४ ॥
शिलीमुखैस्त्वयावीर दुर्वारैर्निर्जितोरिपुः ॥
बिभेत्यत्यंतमलिनो वनेऽपिकुसुमाऽऽकुले ॥ २५ ॥
याकटाक्षच्छटापातैः पवित्रयतिमानवं ॥
एकांतेरोपितमीति रस्तिसाकमलालया ॥ २६ ॥
विपद्यमानतासिद्धा सर्वस्यैवनिरूष्मणः ॥
यथाऽत्रभस्मपद्भ्यांच निर्वाणंहंत्ययंजनः ॥ २७ ॥
तूणेवमधुमासेऽस्मिन् सहकारद्रुमंजरी ॥
इयमुन्निद्रमुकुलै र्भातिन्यस्तशिलीमुखा ॥ २८ ॥

---

(१९) पांथस्त्रीनिःश्वासैर्मांसलःपुष्टइवेत्युत्प्रेक्षा. शीकरेत्यादिविशेषणविशिष्टोजलजमारुतःवेगवान्वायुःसरःप्रक्षोभयति. कर्मगुप्त. (२०) दिवसःशंसुखंकुर्वन् अयतिगच्छति. कर्मगुप्तं. (२१) दुर्वाःजलंतेनदुर्वारा कर्तृभूतजलवत्त्वेनहेतुनेत्यर्थः हेतुगुप्तं (२२) महानसामहताशकटेनआयातःआगतः नरकोमृत्युः करणगुप्त. (२३) अंभोरुहंअयेइतिपदच्छेदः इःकामस्तस्मैअयेकामाय. संप्रदानगु० (२४) मशास्त्यै उक्तमार्गस्येतिपदच्छेदः मशास्त्यैकल्याणाय. संप्रदानगु० (२५) आलिनःभ्रमरात्. अपादानगुप्तं. (२६) एकांतेकांतिभर्तरि. सप्तमीगुप्तं. (२७) विपदि अमानताइतिपदच्छेदः निर्गतःऊष्माद्रव्यरूपोयस्मात्तस्य. अमानताआदराभावः शांतमूष्मरहितमित्यर्थः सप्तमीगु० (२८) उन्निद्रमुकुला एः इतिपदच्छेदः एःकामस्य.

भानुर्वैजायतेलक्ष्म्या सरस्वत्याऽथवामता ॥
अत्रषष्ठीपदंगुप्तं मर्यादादशवार्षिकी ॥ २९ ॥
भवानिशंकरोमेशं मतिर्पूजापरायण: ॥
कर्तृकर्मक्रियागुप्तं मर्या० ॥ ३० ॥
कमलेकमलेनित्यं मधूनिपिबतस्तव ॥
भविष्यतिनसंदेह: कुहंदोषाकरोदये ॥ ३१ ॥
सर्वज्ञेनस्त्वयाकिंचि न्नास्त्यविज्ञातमीदशं ॥
मिथ्यावचस्तथाषत्व मसत्यंवेत्तिनकश्चित् ॥३२॥
विषादीभैक्ष्यमश्नाति सदारोगंनमुंचति ॥
दृष्टेनाऽपित्वयावोर शंभुनाऽरि:समःकृतः ॥ ३३ ॥
पिबतस्तेशरावेण वारिकल्हारशीतलं ॥
केनेमौदुर्विदग्धेन त्दृदयेसन्निरोपितौ ॥ ३४ ॥
वटवृक्षोमहानेष मार्गमावृत्यतिष्ठति ॥
तावत्त्वयानगंतव्यं यावन्नाऽन्यत्रगच्छति ॥ ३५ ॥
नमयागोरसाभिज्ञं चेत:कस्मात्प्रकुप्यसि ॥
अस्थानरुदितेरते रत्नमालोहितेक्षणे ॥ ३६ ॥

अंतर्लापिका.

श्री० ॥ काशंभुकांताकिमुचंद्रकांतं कांतामुखंकिंकुरुतेभुजंग: ॥
क:श्रीपति:काविषमासमस्या गौरीमुखंचुंबतिवासुदेव: ॥ १ ॥
कालोकमाताकिमुदेहमुख्यं रत्ने:किमादौकुरुतेमनुष्य: ॥
कोदैत्यहंतावदवैक्रमेण गौरीमुखंचुंबतिवासुदेव: ॥ २ ॥

---

(२९) भाकांति: नु:मनुष्यस्य. (३०) हेकरउमेशंप्रतिअनिशंपूजापरायण:भव. (३१) कं अलेइतिपदच्छेद: कमितिमुखे. सुखंयथास्यात्तथापिबत:संबुद्धिगुप्ति: (३२) सर्वज्ञाना इन:स्वामीतत्संबोधनं, संबुद्धिगुप्ति: (३३) विषादीशिव: पक्षेविषमस्तीतिविषादी. सदासर्वदारोगंव्याधिनमुंचति. पक्षेसदार:सस्त्रीक:अगशैलनमुंचति. (३४) हे एणमृग कल्हारशीतलंवारिउदकंपिबत:तेत्दृदयेकेनदुर्विदग्धेनइमौशरौसन्निरोपितौइत्यन्वय: अत्रापिसंबुद्धिगुप्ति:. (३५) वटोवबयोरैक्यात्वटो ब्रह्म:अछभल्ल: आवृत्यरुत्वा. संधिगुप्तमेतत्. (३६) नमेआगोरसाभिज्ञंइतिच्छेद: मेचेत:अगोरसाभिज्ञंअपराधरसाभिज्ञमित्यर्थ:. संधिगुप्तमेतत् (१) शंभुकांताका उ० गौरी. एवमेवअन्यत्रऊह्यं. भुजंगोजार:.